विवेक-वीची

डॉ० राजदेवमिश्रः

विवेक-वीची

[विविधविषयकसमीक्षादिरूपत्रिंशत्संस्कृतनिबन्धसङ्ग्रहः]

लेखक.

डॉ. राजदेवमिश्रः

कुलपतिचर

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणस्याम्

प्रकाशक

शारदा-प्रकाशनम्

फैजाबादनगरस्थम्

'राष्ट्रियसंस्कृतसंस्थानम्', नई-दिल्ली द्वारा प्रदत्तेन वित्तीयसाहाय्येन प्रकाशितम्

प्रकाशक

शारदा प्रकाशन

आलोकपुरी (नयी कॉलोनी)

नियावॉ रोड, फैजाबाद (उ० प्र०)

फोन २०२३३

प्रकाशनाधिकार लेखकाधीन

प्रथमसस्करणम्, २००१

१००० प्रतिरूपाणि

मूल्यम् रू० ५६ ०० (षट्पञ्चाशत् रूप्यकाणि)

मुद्रक

सीमा प्रेस

ईश्वरगङ्गी, वाराणसी

फोन २११०९२

समर्पणम्

येषां प्रसादात्खलु सुप्रवृत्तौ
यस्या विधाने च विवेकवीच्याः ।
ज्ञानप्रभाभासितदेवरूपा-
स्तेभ्यो गुरुभ्यः सुसमर्प्यते सा ।।

— राजदेवमिश्रः

विषयानुक्रमः

क्रम०	विषयः	पृष्ठ-संख्या
	भावभूमिः	क - ठ
१	कारुण्य भवभूतिरेव तनुते	१-८
२	भारवेरर्थगौरवम्	९-२०
३	मम्मटस्य काव्यलक्षणम्	२१-२८
४	शकुन्तला-चरित्र-चन्द्रिका	२९-३८
५	सस्कृतकाव्यालङ्कारशास्त्रे काव्यस्वरूपविमर्श	३९-५३
६	काव्यप्रकाशे गुणविमर्श	५४-६१
७	काव्यप्रकाशे वृत्तिविचार	६२-७५
८	महाभाष्ये शब्दानुशासनप्रयोजनविमर्श	७६-८६
९	उपमा कालिदासस्य	८७-९६
१०	अहिसयैव विश्वशान्ति	९७-१०१
११	वीरभेदचतुष्टय तदपेक्षा च	१०२-११३
१२	दशरूपकपर्यालोचनम्	११४-११८
१३.	किराते राजनीतिदर्शनम्	११९-१२६
१४	उत्तररामचरिते प्रकृतिचित्रणम्	१२७-१३३
१५	वेदेषु विश्वबन्धुत्वभाव	१३४-१३९
१६	वैदिकवाङ्मये पर्यावरणम्	१४०-१४५
१७	भारतीया सस्कृतिर्वाल्मीकीयरामायणे	१४६-१५०
१८	वाल्मीकिरामायणे रामवनगमनम्	१५१-१६०
१९	वाल्मीकिरामायणे वर्षावर्णनम्	१६१-१६९
२०	श्रीमद्भागवत-सन्देशः	१७०-१७४
२१	श्रीमद्भागवते शैशवचित्रणम्	१७५-१८२
२२	देवीभागवते विश्वमङ्गलभावना	१८३-१८७
२३	कालिदासीयकाव्येषु राष्ट्रियचेतना	१८८-१९३
२४	माघे सन्ति त्रयो गुणा	१९४-२०४
२५	कादम्बर्यां महाश्वेता	२०५-२०८
२६	मृच्छकटिके समाजचित्रणम्	२०९-२१३
२७	भारतीयसंस्कृति सस्कृतञ्च	२१४-२१९
२८	नीतिशतकपर्यवेक्षणम्	२२०-२२९
२९	राजकविर्भर्तृहरि	२३०-२३५
३०.	युगपुरुष· पण्डितजवाहरलालनेहरू	२३६-२४०

●●

भावभूमिः

सस्कृतवाङ्मयानुशीलनेन तस्य प्राचीनत्व व्यापकत्वञ्च स्वत एव प्रकाश्येते। उभयोरपि विषये नास्ति कस्यचित् सन्देहलेशोऽपि। एतदपि नि सन्दिग्धमस्ति यत्सस्कृतवाङ्मयसृष्टिधारा वैदिककालादेव प्रवहन्ती सती साम्प्रतमपि गतिशीला राजते। केचित् सस्कृतवाङ्मयाविच्छिन्नधाराऽनभिज्ञा दुराग्रहग्रस्ता पण्डिता पण्डितराजजगन्नाथकाल यावदेव सस्कृतवाङ्मयस्याविच्छिन्ना स्थिति मन्यन्ते। तेषा मतमिद नून हास्यास्पद यत्सस्कृतवाङ्मयस्य गतिशीलता पण्डितराजकाल एवावरुद्धा। तन्मते सस्कृतवाङ्मयस्यातीतमेव स्वर्णमय न तु वर्तमानम्। ईदृशेषु पण्डितेष्वेवविधा अपि दुराग्रहग्रहपीडिता विद्वासो राजन्ते, ये सस्कृत मृतभाषात्वेन घोषयित्वा स्वजिह्वालौल्य प्रकाशयन्ति। एतद्विपरीत ये खलु सस्कृतवाङ्मयाम्बुधिमन्थनपरा सस्कृतानुरागिणो विद्वास सन्ति, ते सस्कृतस्य व्यापकस्वरूप प्राक्तनी स्थिति गतिशीलताञ्च सम्यक्तया जानन्ति। ते सस्कृतप्रशस्ति सतत कुर्वाणा अपि सन्तुष्टि न लभन्ते, न वा विश्रान्ति भजन्ते। एतादृशानामेव कस्यचिद् विदुष सूक्तिरिय समेषा गीर्वाणवाणीविचक्षणाना जिह्वामञ्चे नृत्यतितराम्—

यावद् भारतवर्ष स्याद् यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम्।।

सस्कृतवाङ्मयस्य प्राक्तन स्वरूपन्तु निर्विवादरूपेणाप्रतिम वैशिष्ट्यमावहत्येव, तस्य साम्प्रतिकमपि रूप नूनमाश्चर्यकर भव्यञ्च। ज्ञानकलादिनानाक्षेत्रेषु तदीया गतिशीलता सर्वातिशायिनीत्यत्र न काचित् सशीति। सम्प्रति सस्कृतसाहित्यस्य गद्याश्रितवाङ्मयविषये किञ्चिद् वक्तव्यमपेक्ष्यते।

सस्कृतसाहित्यस्य गद्यलेखनपरम्पराऽतिप्राचीना। वस्तुतोऽस्या (परम्पराया) प्रारम्भ कृष्णयजुर्वेदस्य तैत्तिरीयसहितायामेव जात। अन्यसहितास्वपि गद्यस्य दर्शनन्तस्य प्राचीनत्व प्रकाशयति। आरण्यकग्रन्थेषूपनिषत्सु च गद्योपलब्धिर्दृष्टिगोचरता याति। दर्शनव्याकरणादिग्रन्था अपि प्रायेण गद्याश्रिता एव। शङ्करपतञ्जलिप्रभृतीनामाचार्याणा भाष्येषु गद्यच्छटा भासमाना दृश्यते। कथात्मका ग्रन्थास्तु गद्यनिबद्धा एव प्राप्यन्ते। रूपकेषु तु समे सवादा गद्यमाध्यमेनैव सञ्चाल्यन्ते। रसभावमयगद्यकाव्यशोभा दण्डि-सुबन्धु-बाणभट्टादीना काव्येषु दृष्टिङ्गता सरसजनचेतासि नितरा मोहयतीव। कविनिकषत्वेन गद्यस्वरूपवर्णनन्तदीयमाहात्म्यमेव प्रख्यापयति—

'गद्यं कवीनां निकषं वदन्ति'।

सन्दर्भेऽस्मिन् नेद बोध्य यत्सस्कृतालङ्कारशास्त्रेषु गद्यलिखितग्रन्था न दृष्टिगता कृता सन्ति। काव्यस्वरूपभेदादिविमर्शरतैराचार्यैर्गद्यकाव्य नून विचारपथमानीतमस्ति। दण्डि-वाग्भट-भोजप्रभृतिभिरलङ्कारशास्त्राचार्यै कृते काव्यभेदे गद्यकाव्य महनीयस्थानभाग् विद्यते। एतदर्थ काव्यादर्शसरस्वतीकण्ठाभरणादिग्रन्थाना समवलोकनमपेक्षणीयमस्ति। आकारदृष्ट्या तै काव्यस्य भेदत्रय कृतम्—गद्य, पद्य मिश्रञ्च — 'गद्य पद्य च मिश्र च तत्त्रिधैव व्यवस्थितम्'—(काव्यादर्श)। भामहवामनविश्वनाथैस्तद्दृष्ट्या श्रव्यकाव्यस्य भेदद्वितय विहितम्—गद्य पद्यञ्च। आचार्यदण्डिकृतलक्षणानुसारमछन्दोबद्ध पदसमूहो गद्यत्वेनाभिधीयते—'अपाद पदसन्नानो गद्यम्'। अस्या काव्यविधाया कथाऽऽख्यायिकाप्रभृतिगद्यकाव्यानि परिगण्यन्ते।

सस्कृतस्य प्राचीनवाङ्मये विद्यमानायामपि गद्यस्थितौ तथा सस्कृतालङ्कारशास्त्रे विचारपथ यातेऽपि गद्ये याथार्थ्यमेतत्तु विज्ञेयमेव यत् प्राचीनसस्कृतसाहित्ये मध्यकालिकसस्कृतसाहित्ये वा कमप्येक विषयमवलम्ब्य स्वातन्त्र्येण लिखिताना सस्कृतनिबन्धाना प्रायेणाभाव एव। वस्तुत सस्कृतगद्यस्य निबन्धमूला विधा नवीनैव। प्रथम योरोपीयभाषासाहित्ये प्रादुर्भूता सा (निबन्धरूपा विधा) साम्प्रत विविधभारतीयभाषास्वपि स्थानमवाप्ता। आङ्ग्लभाषायास्तथाऽऽधुनिकभारतीयभाषाणा सान्निध्येन सा निबन्धविधा वर्तमानकालीने सस्कृतसाहित्येऽपि प्रतिष्ठिता। अधुना गद्यस्येय विधाऽन्यभाषासाहित्येष्विव सस्कृतसाहित्येऽपि विकासपथमारूढा सती यात्यग्रे।

परमामोदावहोऽय विषयो यत् सस्कृतगद्यलेखनपरम्पराऽधुनाऽपि नितान्तभव्यरूपेण प्रगतिपथमारूढा गतिशीला राजते। अद्य नैकलघुकथोपन्यासादय सस्कृतगद्ये विरच्यन्ते। निबन्धजातन्तु गद्याश्रितमेव।

अत्रेद नून दृष्टिपथ नेयमिदन्तथ्य यद् गद्यपरम्पराया प्राचीनत्वेऽपि प्राचीनसस्कृतसाहित्ये नावाप्यते अद्यतनेव गद्यलेखनपरम्परा, विशेषत सस्कृतनिबन्धलेखनपरम्परा। सस्कृतनिबन्धविषये त्विदमेव वक्तु युज्यते यत्साम्प्रतिकसस्कृतनिबन्धलेखनपरम्परा नास्ति प्रभाविता कथमपि प्राच्यसस्कृतगद्यपरम्परया। वस्तुत आधुनिक-सस्कृतनिबन्धोऽपीतरभाषानिबन्धा इवाङ्ग्लभाषाया एसे (Essay) इति शब्दस्य पर्यायत्वेन गृह्यते। सस्कृतपत्रिका अपि सस्कृतनिबन्धपरम्पराया मूलकारणत्वेन भ्राजन्ते। साम्प्रतिकयुगे देशे विदेशे, विशेषतो भारते, नैकानि सस्कृतसम्मेलनानि, प्राच्यविद्यासम्मेलनानि, सस्कृतशोधगोष्ठ्याश्रित्यायोजनान्यन्यानि च विविधसस्कृतसम्मेलनानि समायोजितानि जायन्ते, येषु शतशश्छोधच्छात्रा सस्कृताध्यापका, सस्कृताभिज्ञा पण्डिताश्च सस्कृतभाषाबद्धानि स्वशोधपत्राणि, प्रस्तुवन्ति पठन्ति वा। सस्कृतविषयसम्बद्धविविधपरीक्षासु कमपि विषयमवलम्ब्य सस्कृतनिबन्धलेखनविषयकप्रश्ना अपि प्रश्नपत्रेषु स्थानमाप्नुवन्ति। फलत सस्कृतविद्यार्थिन, सस्कृतनिबन्धलेखानम्प्रति समाकृष्टा जायन्ते। आकाशवाण्या विभिन्नकेन्द्रेभ्य शतश सस्कृतवार्ता प्रसार्यन्ते। ताभि (सस्कृतवार्ताभि) सस्कृतनिबन्धपरम्परा परिपुष्टिमेव याति। विभिन्नविषयानवलम्ब्य लिखिता सस्कृतवार्ता निबन्धरूपा एव भवन्ति।

नून सस्कृतनिबन्धपरम्पराऽधुना स्वभव्यरूपेण विराजमाना गतिशीलाऽस्तीति समेषा कृते मोदावहम्। आचार्यभामहेन बहुकालपूर्वमेवोक्त यत्ससारस्य नास्ति कोऽपीदृशो विषयो य काव्यविषयत्व न यायात्—

न स शब्दो न तद्वाच्यं न सा विद्या न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः।।

भामहोक्तिरेषाऽऽधुनिकसस्कृतनिबन्धविषयेऽपि घटते। साम्प्रतिकवैज्ञानिके युगे पूर्वकालीना समस्ता परिस्थितय परिवर्तिता। परिवार-समाज-राजनीति-साहित्य-प्रभृतिसर्वक्षेत्रेषु भृश परिवर्तनञ्जातम्। विज्ञानद्वारा प्रदत्तसौविध्येनाखिल जगत्परिवर्तित भूतम्। सस्कृत-निबन्ध-जगदपि पूर्वोक्तपरिस्थितिभि स्वभावत प्रभावितमवलोक्यते। राजतन्त्रस्थाने लोकतन्त्रस्य प्रतिष्ठया विविधविषयसम्बद्धा मान्यता अपि परिवर्तनङ्गता। समाजराजनीतीत्यादिगता नैका समस्या अपि समापतिता समक्ष समेषाम्।

सस्कृतवाङ्मयानुशीलनेन विज्ञायते तथ्यमेतद् यद् आधुनिकसस्कृतसाहित्य एकतोऽलङ्कारशास्त्रविधानानुसार नैकानि महाकाव्यानि, खण्डकाव्यानि, रूपकाणि, चम्पूकाव्यानि, गद्यकाव्यानि, इतराणि च काव्यानि विरचितानि विरच्यन्ते च, पुनरपरतस्तत्रालङ्कारशास्त्र-विधानमुपेक्ष्यान्यविधास्वपि साहित्यसृष्टिर्जाता जायते च। समासतो वक्तु युज्यते यदद्य प्राच्यप्रतीच्योभयकाव्यपद्धतिमाश्रित्य विरचिता काव्यसृष्टि धारयच्छोभते सस्कृतकाव्यजगत्। इदीन्तनाना सस्कृताराधनपराणा विदुषा लेखनी सर्वेषु विषयेषु सर्वासु च काव्यविधासु रमते। परिणामतोऽद्य सस्कृते नैका लघुकथा, उपन्यासा, एकाङ्किरूपकाणि, रेडियोरूपकाणि, मुक्तककाव्यान्यपराणि च व्यङ्ग्यचित्राणि हास्यपराणि विरचितानि विरच्यन्ते च। तै सह विविधविषयगता नानाविधा निबन्धा अपि लिखिता लिख्यन्ते च। आधुनिकसस्कृत-निबन्धलोकपरिशीलनेन यातीद तत्त्व प्रकाशता यदद्यं शतश सस्कृतनिबन्धा प्रकाशिता प्रकाश्यमानाश्च दृश्यन्ते। तेषा विषयपरिधौ व्याकरण-शब्दशक्ति-सङ्गीत-भक्ति-दर्शन-मनोविज्ञान-धर्म-समाजेतिहासायुर्वेद-गणित-ज्योतिष-काव्य-काव्यशास्त्रादिसम्बद्धा निबन्धा प्रकाश याता अधुनाऽपि प्रकाश्यमाना वर्तन्ते।

'नी'त्युपसर्गपूर्वकबन्धधातोर्घञ् प्रत्ययोगान्निबन्धेति शब्दो निष्पद्यते। 'विशेषेण बध्यन्ते विचारा अस्मिन्निति निबन्ध' अर्थाद् यस्मिन् विचारस्य विशेषतो बन्धनम्भवति स निबन्ध इति कथ्यते। वस्तुत प्रत्येकनिबन्धः स्वत एव परिपूर्णो भवति। कोषग्रन्थानुसारं निबन्धेति पदस्यानेकार्था भवन्ति, यथाबन्धनम्, अवलम्ब, अधीनता, आधार.. इति। निबन्धशब्दस्य प्रतिपादितार्थेषु पुस्तकटीका, सविस्तरो विवेचनात्मको लेख, लेखनशक्ति विवेकबुद्धिञ्च वर्धयितुमभ्यासमूलको लघुलेखश्चेत्यर्था महनीया· सन्ति। सत्स्वपि निबन्धभेदेष्वेषु विस्तारपूर्वकविवेचनात्मकलेखरूपो भेदो नितरा वाञ्छित. प्रस्तुतसन्दर्भे। वस्तुतोऽय कमपि

विषयमवलम्ब्य तत्स्वरूपमहत्त्वादिविषये मनोहरोदात्तशैल्या परिष्कृतया सरलया च भाषया विहित विवेचनमेव 'निबन्ध' इति पदेन विशेषतोऽभिप्रेतञ्चायते गद्यकाव्येष्विव विचारात्मकनिबन्धेषु भावमयतादिकृते विशेषस्थान न भवति।

निबन्धपर्यायत्वेन प्रबन्धशब्दोऽपि गण्यते, परन्तु निबन्धो नितरा लोकप्रियत्व यातो विद्यते। एतत्तु ध्येयमवश्यमेव यन्निबन्धे (प्रबन्धे वा) प्रतिपाद्यविषय एव केन्द्रीभूतो भवति। तत्र मुख्यप्रतिपाद्यस्यैव विवेचन विश्लेषणञ्च भवत । असम्बद्धविषयकृते तु तत्रावसर एव न जायते। महाकविमाघस्याधस्तनकथनेन निबन्धस्य (प्रबन्धस्य वा) यथार्थस्वरूपमेवाभिव्यज्यते—

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते।
अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः।। (शिशु० द्वि० स०)

साराशत्वेन वक्तु शक्यते यन्निबन्ध प्रतिपाद्यविषयसम्बद्ध एव भवति। तत्रा-सम्बद्धविषयस्य कृते नावकाशो जायते।

अत्रेद बोध्य यन्निबन्धाना वर्गीकरणमपि पाश्चात्त्यमापदण्डेनैव क्रियतेतरामधुना। प्राच्यसस्कृतालङ्कारशास्त्रीयग्रन्थेषु काव्यभेदोपभेदेषु नास्त्यवसरो निबन्धविधाया कृते। सम्प्रति दृश्यमानेषु विविधभाषानिबन्धेषु नैकरूपशैल्यादिदर्शनम्भवति, परिणामतस्तद्भेदा अपि नैका भवितुमर्हन्ति। मामान्यतो निबन्धानामधोलिखिता भेदा भवन्ति—

१ विचारात्मका, २ वर्णनात्मका, ३ समीक्षात्मका (आलोचनात्मका), ४ व्याख्यानात्मका, ५ भावात्मकाश्च।

प्रथमनिबन्धभेदे पारिवारिकसामाजिकादिविषयाणा कमपि पक्षमेक समवलम्ब्य तद्गुणदोषमहत्त्वादिविचार क्रियते। **द्वितीय**भेदे समुद्रपर्वतादीना रोचकशैल्या वर्णन जायते। **तृतीय**भेदे कविलेखकादीना तत्कृतग्रन्थाना वाऽऽलोचनात्मकपद्धत्या विवेचन विधीयते। एतस्मिन्नेव कविसम्बन्धिन्य प्रख्यातसूक्तयोऽपि विविच्यन्ते। **चतुर्थ**भेदे कवीना प्रसिद्धविदुषा महापुरुषादीना वा चरितादिकमाश्रित्य विवेचना विधीयते। आत्मकथाऽप्यस्मिन्नेव परिगण्यते। **पञ्चमे** भेदे कस्यचिदपि वस्तुनो दृश्यादीना वा भावमय वर्णन जायते। एतस्मिन् काव्यात्मकता भावमयता स्वच्छन्दभावाभिव्यक्तिश्चाधिगम्यन्ते।

कैश्चिद्विद्वद्भिर्निबन्धानामन्यरूपेण वर्गीकरण क्रियते। तेषा मते निबन्धाना वर्गत्रयमेव न्याय्यम्—१ विचारात्मका, २ वर्णनात्मका, ३ आख्यानात्मका। एतेषु भेदेषु विचारात्मको भेदो निबन्धाना व्यापक। पाश्चात्यसाहित्यशास्त्रे निबन्धलेखनशैल्यादिविषयेऽपि सम्यग् विचारो जात। तत्र निबन्धसौष्ठवाय तस्य विविधखण्डेषु विभाजनमपि विहित वर्तते।

विवेकवीच्याख्ये निबन्धसङ्ग्रहेऽस्मिन् त्रिशत्सख्याका निबन्धा सङ्कलिता सन्ति। वेद-पुराण-व्याकरणशास्त्र-काव्यशास्त्र-नाट्य-काव्यादिसम्बद्धानान्तेषा प्रतिपाद्यविषयवैविध्यमस्ति। केषुचिन्निबन्धेषु साम्प्रतिकास्ते विषया अपि वर्णनीयविषयता याता येषामवस्थान प्राचीनकाव्यादिग्रन्थेषु

नयनगोचरता न याति । निबन्धसङ्ग्रहगता समस्ता निबन्धा निम्नाङ्कितवर्गेषु विभक्तु युज्यन्ते—

१ अलङ्कारशास्त्रविषयका ,
२ व्याकरणशास्त्रविषयगता ,
३ कविवैशिष्ट्यप्रशस्तिमूलका ,
४ काव्यनाट्यादिचित्रितप्रकृतिसम्बद्धा ,
५ ग्रन्थविशेषपर्यवेक्षणपरा ,
६ वैयक्तिकचारित्र्यादिविश्लेषणगता ,
७ प्रकीर्णा (विविधविषयगता) ।

१. अलङ्कारशास्त्रविषयका

अलङ्कारशास्त्रगतनिबन्धाना सङ्ख्या पञ्च विद्यते । एतद्वर्गगतानामपि निबन्धाना वर्गद्वय विधातु युज्यते—

(क) अलङ्कारशास्त्रीयग्रन्थविशेषसम्बद्धा ,

(ख) सामान्यतोऽलङ्कारशास्त्रगता ।

(क) अलङ्कारशास्त्रीयग्रन्थविशेषसम्बद्धाः –

वर्गेऽस्मिन् काव्यप्रकाशगतमधोलिखितनिबन्धत्रितय विद्यते—

(१) मम्मटस्य काव्यलक्षणम् ,

(२) काव्यप्रकाशे गुणविमर्श·,

(३) काव्यप्रकाशे वृत्तिविचारश्च ।

(१) एतद्वर्गीयप्रथमनिबन्धे (मम्मटस्य काव्यलक्षणाभिधाने) मम्मटकृतकाव्यलक्षणस्य सम्यक्तया विश्लेषण विहितम् । तद्गतवैशिष्ट्यमपि विशेषत प्रकाशित येन मम्मटीयकाव्यसिद्धान्तोऽपि सहजत प्राकाश्य यात ।

(२) 'काव्यप्रकाशे गुणविमर्शाख्ये' निबन्धे काव्यप्रकाशस्याष्टमोल्लासे मम्मटस्थापिता गुणविषयिणी मान्यता स्फुटतया स्पष्टीकृता तथा वामनादिगुणविषयकमतनिरसनपूर्वक मम्मटेन प्रतिपादितगुणलक्षणस्य स्वरूपादिक विशद मीमासितम् ।

(३) 'काव्यप्रकाशे वृत्तिविचार' नामके निबन्धेऽस्मिन् मम्मटाभिमतस्य 'शब्दत्रयस्य (वाचक-लाक्षणिक-व्यञ्जकस्य), अर्थत्रितयस्य (वाच्य-लक्ष्य-व्यङ्ग्यत्रितयस्य), व्यापारत्रयस्य (अभिधा-लक्षणा-व्यञ्जनाख्यस्य) च विमर्शो विशदो विहित । सम्बद्धविषयगतान्यमतानामपि विश्लेषण यातमस्मिन् ।

अत्रेदमवश्य ध्येय यद्वर्गेऽस्मिन्नधोलिखितोऽपि निबन्ध परिगणयितु युज्यते—

'वीरभेदचतुष्टयन्तदपेक्षा च'

प्रथम साहित्यदर्पणानुसार वीररसस्य चत्वारो भेदा —दानवीरो दयावीरो धर्मवीरो युद्धवीरश्च सम्यग् विवेचितास्तदनन्तर तेषामाधुनिकयुगे भृशमुपयोगित्व प्रदर्शितम्।

(ख) सामान्यतोऽलङ्कारशास्त्रगताः

उपवर्गेऽस्मिन् 'अलङ्कारशास्त्रे काव्यस्वरूपविमर्श'नामको निबन्ध परिगणयितु शक्यते। एतस्मिन् प्राय समेषामलङ्कारशास्त्राचार्याणा मतानुसार विहितकाव्यलक्षणस्य व्यापको विमर्शो जात । विभिन्नकाव्यलक्षणाना, केषाञ्चिद् विस्तरश ऊहापोहो विहित । नूनमय निबन्धो स्वव्यापकस्वरूप धारयन् राजते।

२. व्याकरणशास्त्रविषयगतः

वर्गेऽस्मिन् व्याकरणशास्त्रविषयके खल्वेक एव निबन्ध समायाति। स चास्ति—

'पातञ्जलमहाभाष्ये शब्दानुशासनप्रयोजनविमर्श '

एतस्मिन् निबन्धे पातञ्जलमहाभाष्यस्य पस्पशाह्निके शब्दानुशासनगतमुख्यप्रयोजनाना (रक्षोहादीना) तथाऽऽनुषङ्गिकत्रयोदशप्रयोजनानाञ्च महाभाष्यकारानुसार व्याख्यान जातम्। मुख्यप्रयोजनानान्तु विशदरूपेण तथाऽऽनुषाङ्गिकानाञ्च समासतो विश्लेषण विहितम्।

३. कविवैशिष्ट्यप्रशस्तिमूलकाः

वर्गेऽस्मिन् ते निबन्धा परिगणिता ये कविवैशिष्ट्यप्रशस्तिमूलका. सन्ति। काव्यजगति नैका लोकख्यातिङ्गता उक्तय सन्ति याभि सम्बद्धकवीना काव्यगतमुख्यविशेषताया प्रकाशनम्भवति। ईदृशा सूक्तय सम्बद्धकवीना विशिष्टगुणप्रख्यापकत्वेन राजमाना विभान्ति। अस्मिन् वर्गेऽधोलिखिता निबन्धा वर्तन्ते—

१ भारवेरर्थगौरवम्,

२. कारुण्य भवभूतिरेव तनुते,

३. उपमा कालिदासस्य,

४. माघे सन्ति त्रयो गुणाश्च।

(१) प्रथमनिबन्धे भारवेर्नितरा ख्यातस्यार्थगौरवरूपगुणस्य विश्लेषणपरा सोदाहरणा चर्चा विहिता। तथोक्तेरस्या याथार्थ्यं प्रसाधितम्।

(२) द्वितीयनिबन्धे करुणरसचित्रणेऽपूर्वां ख्यातिङ्गतस्य भवभूतेर्लोकोत्तरगुणस्य कारुण्यचिन्तनपरस्य प्रख्यापिका 'कारुण्यं भवभूतिरेव तनुते' इति प्रशस्तिर्विचारपथमानीय तद्गतो विमर्शो सोदाहरणो जात । सम्बद्धविषयस्य न कोऽपि पक्ष परित्यक्त ।

(३) 'उपमा कालिदासस्य' इति लोकख्यातामुक्तिमाश्रित्य निबन्धोऽय रचित । एतस्मिन् निबन्धे उपमालङ्कारस्य स्वरूपादिक प्रदर्श्य कालिदासीयकाव्येषु प्रयुक्तोपमाना वैशिष्ट्य विविधैरुदाहरणै प्रख्यापितम् । प्रायेण कालिदासस्य सर्वमुपमागत वैशिष्ट्य समुद्घाटितम् ।

(४) 'माघे सन्ति त्रयो गुणा ' इतिरूपा प्रशस्ति समाश्रित्य लिखितेऽस्मिन् चतुर्थनिबन्धे महाकविमाघगतगुणत्रयस्य (उपमाया, अर्थगौरवस्य पदलालित्यस्य च) विशद तुलनात्मक विवेचन कृतम् । निबन्धे साधितमेतदपि यन्माघे गुणत्रयस्य प्रयोगनैपुण्य दृश्यतेतरा, परन्तूपमाप्रयोगे स कालिदासस्य तथाऽर्थगौरवनिवेशे भारवेश्च साम्य न याति ।

४. काव्यनाट्यादिचित्रितप्रकृतिसम्बद्धाः

वर्गेऽस्मिन् निबन्धद्वयस्य गणना कर्त्तु युज्यते—

(१) उत्तररामचरिते प्रकृतिचित्रणम्,

(२) वाल्मीकिरामायणे वर्षावर्णनम् ।

(१) प्रथमनिबन्धे भवभूतिकृतलोकविश्रुतनाटके 'उत्तररामचरिते' यानि प्रकृतिगतानि सौन्दर्याणि विद्यन्ते, तेषा समेषा विवेचना विहिताऽस्ति । चित्रितप्रकृतेर्बिम्बग्राहित्वस्य, कठोरस्वरूपस्य तथा मानवेन सह सान्निध्यस्य च विशदा मीमासा विहिता । प्रकृतिवर्णनावसरेषु भवभूतिप्रयुक्तया पदावल्या ध्वनिता नादव्यञ्जनाऽपि विवेचनाविषयत्व याता ।

(२) द्वितीये निबन्धे महाकविवाल्मीकिविरचिते रामायणे विहितस्य वर्षावर्णनमस्य सोदाहरण विश्लेषण कृत वर्तते । निबन्धेऽस्मिन् वर्षावर्णनस्य सहजता, अलङ्कृतरूपता बिम्बग्राहिता च सप्रमाण समुद्घाटिताः । महाकविवाल्मीके प्रकृतिदर्शनदक्षता तथा तद्वर्णनकौशलञ्चापि दृष्टिविषयता नीते ।

५. ग्रन्थविशेषपर्यवेक्षणपराः

अस्मिन् वर्गेऽधस्तनयोर्द्वयोर्निबन्धयो परिगणना समीचीनता व्रजति–

(१) दशरूपकपर्यालोचनम्,

(२) नीतिशतकपर्यवेक्षणम् ।

(१) प्रथमनिबन्धे दशरूपकस्य प्रकाशचतुष्टयगता समे वर्ण्यविषया पर्यालोचिता । रूपकगतवस्तु-नेतृ-रसानाञ्च विश्लेषणेन सार्धं दशरूपकाणा नाटक-प्रकरणादीना तत्राङ्कितानि लक्षणान्यपि विशेषरूपेण पर्यवेक्षितानि ।

(२) द्वितीयनिबन्धे महाकविभर्तृहरिविरचितस्य नीतिशतकस्याखिलानि महनीय-स्वरूपाणि पर्यवेक्षितानि । नीतिशतके विद्यासत्सङ्गतिसज्जनदुर्जनकोविदादीनां विषये यदुक्त

न्नून जनजीवने उपयोगित्व भजते। एतत्सर्व सोदाहरण मीमासितमस्मिन् निबन्धे।

६. वैयक्तिकचारित्र्यादिविश्लेषणगताः

उपर्युक्तवर्गेऽस्मिन् निबन्धसङ्ग्रहगताश्चत्वारो निबन्धा निवेष्टु शक्यन्ते। परन्तु तेषाञ्चतुर्णामपि वर्गद्वयमस्ति —

(क) काव्यनाट्यगतपात्रविश्लेषणपरा निबन्धास्तथा

(ख) महापुरुषचारित्र्यादिमीमासापरा निबन्धा ।

(क) काव्यनाट्यगतपात्रविश्लेषणपराः

१ शकुन्तला-चरित्र-चन्द्रिका,

२ कादम्बर्या महाश्वेता।

(ख) महापुरुषचारित्र्यादिमीमांसापराः

१ राजकविभर्तृहरि ,

२ युगपुरुष पण्डितजवाहरलालनेहरू ।

'क'वर्गगता निबन्धाः

(१) प्रथमोपवर्गस्य प्रथमे निबन्धे (शकुन्तला-चरित्र-चन्द्रिकाख्ये) कालिदास-कृताभिज्ञानशाकुन्तलस्य नायिकाया शकुन्तलाया अप्रतिमसौन्दर्यप्रकृतिप्रेमादि-सम्बद्धान्यखिलानि बिम्बानि बिम्बीकृतानि सोदाहरणानि। एतेन तद्गतसौन्दर्य-प्रकृतिप्रेम-पतिप्रेम-सखिप्रेम-पितृभक्तिप्रभृतीनामेक भव्यमुदात्तमाकर्षकञ्च चित्रमङ्कित सत् सर्वान् सहृदयान् निरतिशयमाह्लादयति। एतदत्रोल्लेख्य यच्छकुन्तलागतान्तरिकगुणरूपस्वाभिमानोऽपि वर्ण्यत्वेन जातो, येन तदीय प्रभावमण्डित व्यक्तित्व नृत्यन्दिव जायते पाठकनेत्रसमक्षम्।

(२) प्रथमोपवर्गस्य द्वितीयनिबन्धे महाकविबाणभट्टस्य लोकविश्रुतकृते कादम्बर्या उपनायिकाया महाश्वेतायास्तप पूतं दिव्यप्रेमभावभावित निरतिशयलावण्यमयञ्च स्वरूप सविवेक समुपस्थापित समक्ष समेषाम्।

'ख'वर्गगता निबन्धाः

(१) खवर्गस्य प्रथमे निबन्धे राजकवेभर्तृहरेर्जीवनवृत्तस्य तत्काव्यकृतीनाञ्च विषये विस्तारशो विविच्य भर्तृहरिसम्मतविविधविषयगतविचारा विचारपथ समानीता ।

(२) 'ख'वर्गस्य द्वितीयनिबन्धे भारतस्य पूर्वप्रधानमन्त्रिणो राष्ट्रनायकस्य स्वर्गीयपण्डितजवाहरलालनेहरूमहाभागस्य जीवनवृत्तादिक समीक्ष्य भारतराष्ट्रस्य निर्माणे तदीययोगदान विशेषतो विवेकपथमवतारितम्।

७. प्रकीर्णाः (विविधविषयविवेचनपराः)

वर्गेऽस्मिन् पतिताना निबन्धाना सख्या द्वादश अस्ति । विविधविषयसम्बद्धानामेतेषामपि निबन्धाना चतुर्वर्गेषु विभाजन कर्तुं युक्तम्—

(क) प्राचीनमहाकाव्यनाट्यचित्रितसस्कृति-समाज-राजनीतिविवेकपरा ,

(ख) ग्रन्थगतवर्ण्यविशेषसम्बद्धविचारपरा ,

(ग) वेद-पुराण-महाकाव्यवर्णिताधुनिकचर्चितविषयसम्बद्धा ,

(घ) अन्यमहनीयविषयविवेकपराश्च ।

(क) प्राचीनमहाकाव्यनाट्यचित्रितसंस्कृति-समाज-राजनीतिविषयकाः

अस्मिन्नुपवर्गेऽधोलिखिता निबन्धा गणनीया सन्ति—

(१) वाल्मीकिरामायणे भारतीया संस्कृति ,

(२) किराते राजनीतिदर्शनम्,

(३) मृच्छकटिके समाजचित्रणम् ।

(१) एतद्वर्गीयप्रथमनिबन्धे रामायणे चित्रिता भारतीयसस्कृतिर्विविधोदाहरणैर्विवेचनापूर्वक प्रकाश नीता ।

(२) द्वितीयनिबन्धे भारविकृतकिरातार्जुनीयमहाकाव्ये वनेचर-द्रौपदी-भीम-युधिष्ठिरादीनामुक्तिभि प्रकाशित राजनीतिस्वरूप सम्यग् विश्लेषितम् ।

(३) अस्मिन् निबन्धे शूद्रकप्रणीते 'मृच्छकटिकाभिधाने प्रकरणे चित्रिता सामाजिकी स्थिति सम्यक् समुद्घाटिता । सामाजिकस्थितेश्चित्रणप्रसङ्गे वर्णाश्रमादिदशाऽपि दर्शिता ।

(ख) ग्रन्थगतवर्ण्यविशेषसम्बद्धविचारपराः

अस्मिन् खवर्गेऽधोलिखितनिबन्धद्वयमस्ति—

(१) वाल्मीकिरामायणे रामवनगमनम्,

(२) श्रीमद्भागवते शैशवचित्रणम् ।

(१) खवर्गस्य प्रथमनिबन्धे वाल्मीकिरामायणगतरामवनगमनस्य नितान्तभावमय प्रसङ्ग· सातिशयं विवेचित· । कौसल्यादशरथयो. करुणवात्सल्यं विशेषेण चित्रितम् ।

(२) द्वितीयनिबन्धे श्रीमद्भागवतगतशैशवचित्रणस्य बिम्बं बिम्बीकृतम् । अस्मिन् विशेषतो बलरामेण साक बालकृष्णस्य बाललीलावर्णनेन सह देवकीवसुदेवयो प्रताडितवात्सल्यमपि विवेचनीयतां प्रापितम् ।

(ग) वेद-पुराण-महाकाव्यवर्णिताधुनिकचर्चितविषयसम्बद्धाः

अस्मिन्नुपवर्गेऽधोलिखिता निबन्धा निवेशयितु शक्यन्ते—

(१) वेदेषु पर्यावरणम्,

(२) वेदेषु विश्वबन्धुत्वभाव ,

(३) देवीभागवते विश्वमङ्गलभावना,

(४) कालिदासीयकाव्येषु राष्ट्रियचेतना च ।

(१) प्रथमनिबन्ध आधुनिककाले बहुचर्चितस्य पर्यावरणस्य चेतना वेदकालेऽप्यासीदिति दर्शितम् । वैदिकसाहित्यगतानेकोद्धरणैस्तत्कालीना पर्यावरणचेतना सम्यक् प्रदर्शिता ।

(२) अद्यतने काले विश्वबन्धुत्वभावस्य चर्चा सर्वत्र चलन्ती राजते । निबन्धेऽस्मिन् नैकोदाहरणै साधितमिद यद् वैदिककाले विश्वमाङ्गल्यभावभरिता ऋषयो विश्वबन्धुत्वभावस्थापनार्थ लोके कथ यतमाना आसन् ।

(३) अस्मिन् निबन्धे देवीभागवतपुराणे प्रकाशिताया मङ्गलभावनाया यथेष्टा मीमासा जाता ।

(४) विश्वविख्यातो महाकविकालिदास ईदृशो महाकविरस्ति यस्य काव्येषु बहुमूल्यानि भावरत्नानि भरितानि विद्यन्ते । तत्काव्येषु रसभावालङ्कारच्छटा तु नितान्तभव्यरूपेण राजमाना तिष्ठत्येव, तत्र राष्ट्रिया भावनाऽपि प्रकाश याता विद्यते । निबन्धेऽस्मिन् तत्काव्यगता राष्ट्रिया भावना विशदरूपेण दृष्टिविषयता प्रापिता विविधोदाहरणै —

(घ) अन्यमहनीयविषयविवेकपराः

एतस्मिन् वर्गेऽधोलिखितास्त्रयो निबन्धा परिगणिता —

(१) अहिसया विश्वशान्ति ,

(२) श्रीमद्भागवतसन्देश ,

(३) भारतीयसस्कृति सस्कृतञ्च ।

(१) प्रथमनिबन्धेऽहिंसास्वरूपमहत्त्वादिप्रख्यापनपूर्वक विश्वशान्त्यर्थन्तदीयमुयोगित्व विमृष्टम् ।

(२) निबन्धेऽस्मिन् विश्ववन्द्यभागवतपुराणगतसन्देशस्य प्रख्यापन जातम् । श्रीकृष्णभक्तिपरेण पुराणेनानेन कृष्णभक्तिपरो जगकल्याणाय य सन्देशो निर्दिष्ट स एवास्य निबन्धस्य विषय ।

(३) सस्कृतभाषा भारतीयसस्कृतेर्वाहिका कथ्यते । सस्कृतमन्तरा भारतीयसस्कृतिस्वरूपमपि निर्धारयितु न पार्यते । एवत्सर्वमस्मिन् निबन्धे विवेचितम् ।

विवेकवीचीगतनिबन्धेषु प्रायेणासमस्तप्रसादमयी पदावली तथा सुबोधोदात्ता शैली

समाश्रिता । विचारप्रधानेषु (समीक्षाप्रधानेषु) शोधपरेष्वपि च निबन्धेषु क्लिष्टा श्लिष्टा भाषा कठिना च शैली यथाशक्ति नाङ्गीकृता । यत्र कुत्रचित् समाश्रितायामपि समस्तपदावल्या दुर्बोधताकृते नास्ति स्थानम् । एतादृशप्रयासस्य मूलत्वेन निबन्धसङ्ग्रहस्यास्य सुबोधतैव विराजते । कस्यचिदपि ग्रन्थस्य क्लिष्टा, श्लिष्टा समस्ता च भाषा ज्ञानाम्बुधिमन्थनपराणा विदुषा विषयबोधमार्गे न कञ्चिद् बाध जनयति, परन्तु साधारणपाठकाना समक्षन्तु दुर्बोधसमस्या समुपस्थापयत्येव । देववाणीसमाराधनपराणा समेषा बुधाना कृते विवेकवीचीगतनिबन्धविषया सुबोधताम्प्रयान्त्विति मदीया बलवती कामना ।

सम्प्रति परीक्षार्थिना कल्याणकामनया नैकनिबन्धसङ्ग्रहा प्रकाशिता सन्तो दृष्टिगोचरता यान्ति यत्र तत्र सर्वत्र, परन्तु विवेकवीच्या स्थिति सर्वथा भिन्ना । केवल परीक्षापयोधि तर्त्तुमेव न तद्रचनागत प्रयास । वस्तुतो विविधविषयजिज्ञासूना जिज्ञासा समाधातुमेव मे किञ्चित्कर सारस्वतप्रयासोऽयम् । विवेकवीच्या सङ्गृहीता समे निबन्धा सर्वाङ्गपूर्णा इति वक्तु जिह्रेति मे जिह्वा, परन्तु वक्तुमेतत्तु प्रवर्तत एव यदेते (निबन्धा) प्रवृत्तिसारा भविष्यन्त्येव मत्प्रयास सफलयितुमेतदपि बहुतर मन्ये ।

पूर्वप्रकाशितविचारवीथीपर्यवेक्षणपरै शिष्यैर्हितानुबन्धिभिर्मित्रैर्माम्प्रति सदाऽहैतुकी कृपा धारयद्भिर्मनीषिभिश्च सम्प्रेरितोऽह विवेकवीचीरचनाप्रवृत्तो जात । अत कृतेरस्या लेखनप्रकाशनयज्ञे येषा सहयोगाहुति सम्प्राप्ता तान् सर्वान् प्रति कृतज्ञाताप्रकाशनमवश्य-कर्त्तव्यतया समापतति मे समक्षम् ।

सरस्वतीसेवनपराणा मादृशा कृते लक्ष्मीकृपाभाजनत्व सुदुर्लभमेव । अत सरस्वती-सेवकस्य मम समक्षमपि यन्महत्यार्थिकी समस्या सुरसेव समापतिता तत्र नाश्चर्य किञ्चिदपि । सौभाग्यवशाद् राष्ट्रियसस्कृतसस्थानस्यौदार्यभारभरितकृपया विवेकवीचीमुद्रणाय यथेष्टार्थिकानुदान-प्रदानस्वीकृतिपत्रमधिगतम् । समाहितसमस्योऽह ग्रन्थस्यास्य मुद्रणाय सोत्साह प्रवृत्त । फलतो ग्रन्थोऽय मुद्रित सन् प्रकाशमायात । अह राष्ट्रियसस्कृतसस्थानम्प्रति विशेषतो हार्दिकमाभारमावहामि ।

राष्ट्रियसस्कृतसस्थानस्य निरतिशयौदार्य्यभावेनार्थिकप्रकाशनानुदानप्रदाने मूलरूपेण राष्ट्रियसर्वकारस्य मानवससाधनविकासमन्त्रालयो राजतेऽतस्तद्विभागे मन्त्रिपदमलङ्कुर्वाणान् सुरभारतीभक्तिभावितहृदयान् मानिनो डॉ० मुरलीमनोहरजोशिमहाभागान् प्रति नितान्तभावसवलितेन हृदा स्वाभार प्रकटयामि । नून तन्मन्त्रालयसञ्चालनकाले राष्ट्रियसस्कृतसस्थानगत-प्रकाशनानुदानविभागस्यार्थिकसहयोगेन शतश सस्कृतग्रन्था प्रकाश्यमाना सस्कृतवाङ्मयभाण्डागार निरतिशयेन समृद्धि नेष्यन्ति ।

सन्दर्भेऽस्मिन् राष्ट्रियसंस्कृतसंस्थाननिदेशकान् विद्वद्वरेण्यान् माननीय डॉ० वि० कुटुम्बशास्त्रिमहानुभावान् प्रत्यपि स्वकृतज्ञताभाव प्रकाशयामि येषाममूल्यसहयोगेनार्थिकानुदानप्राप्तौ न किमपि काठिन्यमभूत् ।

ग्रन्थगतनिबन्धलेखने तत्प्रतिलिपिकरणे च सुताकल्पशिष्याया डॉ० शुचिताया यादृश सहयोग सम्प्राप्तस्तम्प्रकाशयितु नाह प्रभवामि । समये-समये, पदे-पदे च तत्कृतसाहाय्य बिम्बितमिव जायते चित्तपटले मामके । तदाशीर्वादभाजनत्वन्तु सर्वदा सुरक्षितमेव । पुत्रकल्पशिष्यस्य डॉ० शिवाकान्तशुक्लस्य सहयोगोऽपि न विस्मर्त्तु शक्य । सोऽपि ममाशीर्वादपात्रत्व भजमानस्तिष्ठत्वियमेव मदीया कामना ।

सन्दर्भेऽस्मिन् मण्डलद्वयस्य (फैजाबादस्य देवीपाटनस्य च) परिवहन-निगमक्षेत्रीयप्रबन्धकमाननीयश्रीमूलचन्दमहाभागस्य तथा तद्धर्मपत्न्या बालविकास-परियोजनाधिकारिपदमलङ्कुर्वाणाया श्रीमत्या मालतीमहाभागाया मुद्रणयज्ञगत सहयोग विस्मर्त्तु नाह शक्तोऽतस्तत्सहयोगकृते विशेषेण कृतज्ञताभाव प्रकटयामि ।

ग्रन्थप्रकाशने पौत्रीकल्पयो कु० किरणाभिधानायास्तथा कु० उषसश्च सहयोगोऽपि समुल्लेखनीयोऽतस्तदर्थ ते ममाशीर्वादभाजनत्व यात ।

विवेकवीचीगतविविधविषयकनिबन्धाना लेखने नैकविधग्रन्थाना साहाय्य-मवाप्तमतस्तद्ग्रन्थानां विद्वद्वर्यलेखकान् प्रति निरतिशयविनीतभावेन कृतज्ञता ज्ञापयामि । नि सशयन्तत्कृतिगतवर्ण्यविषयानुशीलनजनितज्ञानयोगेन कृतिरेषा विवेकवीची मूर्तिमती जाता ।

विवेकवीच्या मुद्रणे ग्रन्थमुद्रणकलाकोविदस्य सीमाप्रेसस्वामिन डॉ० दर्शनानन्दमहाभागस्य मुद्रणगतसाहाय्यमपि दृष्टिपथाद् दूरीकर्त्तुमशक्यमेवात सोऽपि विशेषतो धन्यवादार्ह ।

प्रस्तुतग्रन्थविषये नानाविधविषयज्ञानपयोधिमन्थनपराणा विदुषा काचिदपि सम्मतिर्मत्कृते प्रेरणारूपैव भविष्यतीति निवेदयामि ।

फैजाबादनगरम्
श्रावणी पूर्णिमा
विक्रमसवत् २०५८
४-८-२००१ ई०

विदुषा वशवद
राजदेवमिश्रः

●●

कारुण्यं भवभूतिरेव तनुते

काव्येषु नाटक रम्यमित्यादिना बहुप्रशसित सस्कृतस्य नाट्यसाहित्य येषा नाट्यरचनापटूनाममरमहाकवीना रचनाभिरतीव महत्त्वपूर्ण स्थान गत तेषा महाकविभवभूतिरन्यतम । सस्कृतनाट्यकारेषु भवभूतेर्नाम कालिदासानन्तरमेव सादर गण्यते। अनेनामरनाटककारेण (महाकविना) नाटकत्रय विरचितम्—

१ महावीरचरितम्,

२ मालतीमाधवम्,

३ उत्तररामचरितम्।

महावीरचरितनाम्नि नाटके रामायणीयपूर्वार्धकथा सुचारुतया वर्णिता। नाटकेऽस्मिन् वीररसस्य प्राधान्यमस्ति। अत्र मर्यादापुरुषोत्तमस्य रामस्यानेके दोषा अन्यथा प्रदर्शिता । रामस्यादर्शपुरुषत्वमेव समेषा समक्ष समायादित्येवाभिप्राय उक्तदोषावरणस्य प्रतिभाति। 'मालतीमाधव' तु दशाङ्कयुक्तमेक प्रकरण वर्तते। अस्य कथावस्तु कविकल्पनाप्रसूतम्। अस्मिन् मालतीमाधवयो प्रणय सम्यक् चित्रित । प्रेम्णोऽतीवोदात्तकल्पनाऽत्र पाठकाना मानस हठादाह्लादयति। महाकविभासस्याविमारकनाटकस्य प्रभावेण प्रभावितो भवभूति प्रकरणमिद विरचितवानिति प्रतीयते। तृतीयं खलु 'उत्तररामचरितम्' नामक नाटक भवभूतेरमरा कृति , यद्रचनावशादेव भवभूति सस्कृतनाट्यकाराणा मध्येऽमरता गतवान्। नाटकेऽस्मिन् रामायणकथाया उत्तरभागो वर्णित । डॉ० बेलकरमहोदयोऽस्य कथाया मूल पद्मपुराणमिति मन्यते। वस्तुतोऽस्य नाटकस्य कथाया मूल वाल्मीकियरामायणस्योत्तरकाण्डम्। परन्तु मूलकथायामनेकानि परिवर्तनानि महाकविना कृतानि। कथाया चित्रदर्शनदृश्यं, आत्रेय्या वनदेवतया वासन्त्या साक तमसायाश्च मुरलया साक सलाप , छायासीतोपस्थिति वाल्मीकेराश्रमपदे जनककौशिल्यादीना सम्मेलनमन्तिमेऽङ्के सीतारामयो सम्मेलनमित्यादयो बहवोऽशा कविकल्पनाप्रसूता । कथावस्तुन्युक्तपरिवर्तनेन महाकवि स्वोद्देश्ये साफल्यं गतवान् नात्र मनागपि सन्देहलेशः। रामायणीया कथाऽन्ते शोकपर्यवसायना। तस्यामन्ते सीता पृथिव्या गर्भे समाविष्टा भवति। परञ्च नाट्यकलाया आदर्शमाश्रित्य भवभूतिः नाटकान्ते सीतारामयो सम्मेलनद्वारा तत्कथा सुखान्तता नीतवान्।

यद्यपि भवभूतिनोक्तनाटकत्रयं विरचितम्, परन्तु तत्कीर्तिरुत्तररामचरितमवलम्ब्यैव ख्यातिं गताऽपि चोत्तररामचरितविरचनेन स सर्वत्र सादरं गीयते। अत एवोच्यते 'उत्तरे

रामचरिते भवभूतिर्विशिष्यते ।' उत्तररामचरिते तस्य कलाया सर्वातिशायिस्वरूप सुष्ठु विलोक्यते । भवभूतिरस्ति रसकवि विशेषत स करुणरसस्य कवि । करुणरससृष्टौ तु संस्कृतस्य विशाले साहित्ये नास्त्यपर कश्चित् कवि. नाटककारो वा योऽस्य समकक्षता गन्तु समर्थ । कविताकामिनीकान्त· महाकविकालिदासोऽपि करुणरसचित्रणे सुतरा प्रवीण । तेन रघुवंशनाम्नि महाकाव्ये रतिविलापेऽजविलापे च करुणरसस्योन्मेष· कृत सफलताञ्च गत । परन्तु करुणरससर्जने सोऽपि भवभूतितुल्यतां गन्तुमक्षम । अत एव साधूच्यते 'कारुण्यं भवभूतिरेव तनुते' ।

'उत्तररामचरितम्' भवभूते सर्वोत्कृष्टा रचनेति पूर्वमेव मयोक्तम् । तस्मिन्नेव कवे करुणरसस्यापूर्वा व्यञ्जना अभूत् । यद्यपि—

एको रसोऽङ्गीकर्त्तव्यो वीरः शृङ्गार एव वा ।
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम् ।। (दशरूपकम्)

इति नाट्यशास्त्रविधानानुसारेण सस्कृतनाटकस्य प्रधानभूतो रस· शृङ्गारो वीरो वा भवेदिति नाट्यशास्त्रस्योक्ता रूढिमाश्रित्य केचिद् उत्तररामचरितेऽपि विप्रलम्भशृङ्गारस्य प्राधान्यमङ्गीकुर्वन्ति, परन्तु वस्तुत भवभूतिना करुणरस एव मुख्यतया चित्रित , यतो हि तत्रोत्तररामचरितेऽखिलानि पात्राणि करुणरससवलितानि वर्तन्ते । करुणरसराड् भवभूति करुण सर्वरसमूलकत्वेन प्रतिपादयितुमेव नाट्यशास्त्रस्योपेक्षा कृतवानिति वक्तुं शक्यते । यद्यपि नाटकान्ते सीतारामयो पारस्परिक सम्मेलनमभूत् परञ्च तृतीयेऽङ्के निर्वासिता वैदेही प्रति विश्वासोऽस्ति—

ज्योत्स्नामयीव मृदुबालमृणालकल्पा,
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ।। (उत्तर०, ३।२८)

अपि च सीताविरोगविषये रामो वदति.. . 'निरवधिरय तु प्रविलय ' इत्यादिना करुणरसस्यैव सिद्धिर्भवति न तु विप्रलम्भशृङ्गारस्य । नाटके प्रायेण सर्वत्रैव करुणस्थायिनः शोकस्य सुतरां प्रकाशो दरीदृश्यते । एव भवभूतिद्वारा करुणरसप्राधान्यस्वीकृतिः संस्कृतनाट्यसाहित्येतिहासेऽभूतपूर्वा घटना । एषा नूतनाऽपि भवभूतिप्रचालिता परिपाटी समालोचकैर्बहुप्रशंसिता । आदिरसविषय आलङ्कारिकाणां मध्ये पारस्परिको मतभेद. । महाराजो भोजदेवः शृङ्गार· रसराडिति मन्यते । केचन शैवा. कश्मीरदेशनिवासिनः कवयस्तु शान्तरसमेव प्रधानभूतत्वेनाङ्गीकुर्वन्ति । महाकविभवभूतिस्तु करुणरसमेव समेषामन्येषा रसानां मूलभूतत्वेन स्वीकुरुते । तन्मते एकाकी करुणरस एवालम्बनादिभेदात् विलक्षण· सन् भिन्नान् शृङ्गारादीन् अवलम्बत इव—

एको रसः करुण एव निमित्तभेदा–
द्विन्नः पृथक्पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुद्तरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत्समस्तम् ।। (उत्तर० ३।४७)

समस्ते खलूत्तररामचरिते करुणरसस्यैव छटा विलोक्यते । महाकवे करुणरसस्योद्रेक विलोक्यैवानेकानि प्रशसात्मकानि वाक्यानि पद्यानि उपलब्धानि भवन्ति । करुणरसस्यास्य प्रशसा कुर्वन् श्रीगोवर्धनाचार्य स्वार्यासप्तसत्या कथयति—

भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ।। (आ० स०)

साम्प्रत करुणरसाचार्यभवभूते उत्तररामचरितमेवाश्रित्य तस्य कारुण्यचित्रणपटुता-प्रदर्शनाय कानिचिदुदाहरणान्युपस्थाप्यन्ते । उत्तररामचरितस्य सम्यक् विवेचनेनेद सुष्ठु द्रष्टु शक्यते यदुत्तररामचरितस्य सर्वा घटना. प्रत्यक्षतोऽप्रत्यक्षतो वा रसिकजनमानसे कारुण्यमेव सञ्चारयन्ति । प्रथमेऽङ्के जनकवियोगविक्लवा जनकनन्दिनी जानकीवल्लभो राम समाश्वासयति—'देवि ! वैदेहि ! विश्वसिहि, ते हि गुरवो न शक्नुवन्ति विहातुमस्मान् ।' चित्रदर्शनसमये सीतारामावुभावपि अतीतदु ख स्मृत्वा यादृश परितापमनुभवत स तु करुणरसेन पूर्णतया सिक्त एव । पञ्चवटीदर्शनेन पारस्परिकवियोगभीत्या तौ वैक्लव्य भजेते। क्लेशमापन्नो रामो वदति—

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः ।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां तनोति ।। (उत्तरराम० १।३०)

'स्त्रीविरहोत्पन्न शोकानलस्तु तस्मिन् काले सीताहरणकर्तु रावणस्य वधेच्छया मर्षितः, परन्तु इदानी तु चित्रदर्शने भूयोऽपि विपच्यमानो वक्षोमर्मस्फोटक इव यातना विस्तारयति ।' चित्रदर्शने शूर्पणखाविवाद विलोक्यातीव भयत्रस्ता सीता राम 'अयि वियोगत्रस्ते ! चित्रमेतत् इति सान्त्वयति परञ्च स्वय चित्रविलोकनेनातीतमपि दण्ड-कारण्योदन्तं (सीताहरणरूपं) वर्तमानमिव स्मरति । तदवसर एव लक्ष्मणो रामस्य वनवासकालिकसीताहरणावसरे कीदृशी कारुण्यपरिपूर्णा स्थितिरभूदिति प्रकटयितुं वक्ति—

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तया वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावारोदित्यपि दलति वज्रस्य हृदयम् ।। (उ० १।२८)

रामदु खेन चेज्जडानामपि विलपनम्! वज्रस्यापि हृदयदलनम् । तर्हि चेतनाना प्राणिनां का कथा? चित्रवीथीदर्शनेन परिश्रान्ता सीता रामस्य वक्ष स्थलमाश्रित्य शेते । तदवसर एव पूर्वप्रेषितो दुर्मुखनामा दूत उपस्थितो भवति । स सीतापवादवृत्तान्त श्रावयति, तच्छ्रुत्वा रामस्यापूर्वा दशा भवति । स तु 'हा राममयजीविते । हा महारण्यवासप्रियसखि । हा तातप्रिये । कथमेवविधायास्तवायमीदृश परिणाम·'?

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यते ।।

इत्यादिभिर्बहुविलाप कुरुते । सीतालोकापवादरूपदारुणवार्तया रामो मूर्छितो भवति । परञ्च लोकाराधनतत्परस्य मर्यादापुरुषोत्तमस्य रामस्य स्वीये क्रोडे निद्रां गताया परिश्रान्ताया सीताया लोकापवादभयात्पुनर्निर्वासन तस्य विवशता सूचयन् क न भृश पीडयति?

करुणरसप्रतिपादनप्रवीणोऽय महाकविस्तत्सिद्धावन्येषामपि रसाना साहाय्य गृह्णाति । अपररसचित्रणमपि करुणस्य पोषकतां गच्छति —

किमपि किमपि मन्दं मन्दमासक्तियोगा–
दविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो–
रविदितगतवामा रात्रिरेव व्यरंसीत् ।। (उ० १/२७)

श्लोकेऽस्मिन् वर्णितसम्भोगशृङ्गारस्य करुणरसपोषकता सुष्ठु विलोकनीया । 'अयमागृहीतकमनीयकङ्कणस्तवमूर्त्तिमानिव महोत्सव· कर ' इत्यादिना 'प्रतनुविरलै '— इत्यादिना च दम्पत्यो प्रगाढानुरागो लक्ष्यते योऽनुपदमेवागन्तुकस्य शोकस्य प्रगाढता गरिमाणञ्च वर्धयति ।

इत्थ सुष्ठु विलोकयितु शक्यते यन्नाटकस्य प्रथमेऽङ्क एव कविना करुणरसस्य गम्भीरा पृष्ठभूमि· निर्मिता ।

नाटकस्य द्वितीयेऽङ्के चिरपरिचिते दण्डकारण्ये तथा पञ्चवट्या यदा रामस्य प्रवेशो जायते, तदा तत्र सीतया साकमनुभूतं सौख्यं स्मरन् स भृशं व्यथते—

चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः,
कुतश्चित् संवेगात्प्रचल इव शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हन्मर्मणि पुनः
धनीभूतः शोको विकलयति मां मूर्च्छयति च ।। (उत्तर० २।२६)

तृतीयेऽङ्के तु करुणरससागर एवोद्वेलता गत । करुणस्य यादृशी व्यञ्जनाऽत्र परिदृश्यते तादृशी न कुत्रापि । पतिनिर्वासिताया पतिपरायणाया दैवदुर्विपाकात् प्रताडिताया सीताया अधोलिखित करुणामय वर्णनं कस्य हृदये ताम्प्रति करुणा नोत्पादयति । सीतां विलोक्य तस्या दशा वर्णयन्ती तमसा कथयति—

परिपाण्डु दुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ।।
(उत्तर० ३४)

अधस्तने श्लोकद्वये विलपतो रामस्य शोकपूर्णा दशा करुणस्य पराकाष्ठा गता विद्यते—

दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ।। (३/३१)
हा हा देवि ! स्फुटति हृदयं, ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ।। (३/३८)

शोकविधुरस्य रामस्य विलाप श्रुत्वा कस्य चित्त न पीड्यते? मर्यादापुरुषोत्तमस्य विलपन कस्य कृते न हृदयद्रावकम् ? भवभूतिर्गम्भीरमपि शोक व्यञ्जयितु स्वल्पा शब्दावली न प्रयुङ्क्ते । एतदेव कारण यत्तेन वर्णनविस्तारः कृत । प्रवाह गता हृदयस्य पीडा यावदन्यानपि द्रवितान् न करोति, तावत् सा शान्तिं न गच्छति । यतो हि विलपनेन शान्तिः प्राप्यते । एतदर्थमेव तमसामुखेन कविर्ब्रूते—

पूरोत्पीडे तडाकस्य परीवाहः प्रतिक्रिया ।
शोके क्षोभे च हृदयं प्रलापैरेव धार्यते ।। (उत्तर० ३/२९)

परञ्चात्रावश्यमवधेय यत् सीताविरहपरितप्यमानस्य रामस्य विलापे मर्यादाहीनताऽस्वाभाविकता वा न दृश्यते। सर्वत्र कविनाऽभिप्रेतगाम्भीर्यस्य दर्शन भवति। अत एव स रामस्य व्यथाविषयेऽन्यमुखेन प्रतिपादयति यत् रामस्यान्तर्गूढा घनत्व गता व्यथा स्वगाम्भीर्येणैतादृश कारुण्य सृजति यत् पुटपाकवद्वाह्यत शान्तमपि सदन्तस्तीव्रतापेन प्रज्वलति—

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः।। (उत्तर० ३/१)

चतुर्थेऽङ्के जनक स्वकीया प्राणप्रिया तनूजा सीता मृता परिज्ञाय विलपति 'हा वत्से। समन्ताद् व्याघ्रादिवर्गेषु मण्डलीकृत्याप्नुवत्सु सुतरा भीतया त्वया पतिद्वारा त्यागरूप तिरस्कार, भयङ्कर वनं प्रसूतकालिकी वेदनाञ्च प्राप्य 'यद्यत्र मदीय पिताऽभविष्यत्तर्हि नून स मम त्राताऽभविष्यत्' इत्येव रीत्या बारवारमहं स्मृतोऽभवम्—

नूनं त्वया परिभवं च वनं च घोरं तां च व्यथां प्रसवकालकृतामवाप्य।
क्रव्याद्गणेषु परितः परिवारयत्सु सन्त्रस्तया शरणमित्यसकृत्स्मृतोऽहम्।।
(उत्तर० ४/२३)

पद्येऽस्मिन् स्वकीयपुत्र्या जानक्या असहायावस्था स्मार-स्मारं विलपतो जनकस्य करुणामय्यवस्था सर्वानपि सहृदयान् पीडयति।

षष्ठाङ्के लवकुशयो सम्मेलनावसरे रामस्तयो र्गीताया सौन्दर्य्य पश्यति तथा तन्मानसपटले करुणामूर्त्ति· सीता समागच्छति। स बार वार ता स्मरति तथैव च विलपति—

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः।
जगज्जीर्णारण्यं भवति च कलत्रे ह्युपरते
कुकूलानां राशौ तदनुहृदयं पच्यत इव।। (उत्तर० ६/३८)

चरमेऽङ्के सीतारामयो समागमद्वारा महाकविना करुणरसपरिपूर्णमपि नाटकमिद सुखान्त विहित परन्तु तत्रापि गर्भाङ्के सीताया: निर्वासनस्य कथा रामस्य कृते शोककारिणी भवति। नाटके यदा गङ्गापृथिव्यौ लवकुशयो रामतुल्यतां दर्शयत। तदैव सीता चिन्तयति "भगवत्यौ। क एतयो क्षत्रियोचितविधिं कारयिष्यति?" अबलासीताया स्वपुत्रसंस्कारविषये चिन्तनं राममत्यन्त दु खीकरोति—

एषा वशिष्ठशिष्याणां रघूणां वंशनन्दिनी ।
कष्टं सीताऽपि सुतयोः संस्कर्तारं न विन्दति ।। (उत्तर० ७/१३)

'यस्य रघुकुलस्य वशिष्ठ इव गुरु सस्कर्त्ताऽस्ति तत्कुलवधू रामस्य भार्या स्वपुत्रकृते सस्कर्तारमाचार्य न प्राप्नोत्यत पर कि कष्ट स्यात्'—इति स्मृत्वा राम शोकमनुभवति । वस्तुतोऽङ्कोऽय तृतीयाङ्कस्य चरमोत्कर्ष एव प्रतीयते तथा भावगाम्भीर्येण साकमेव करुणं सीतारामयोर्मधुरसम्मेलने परिवर्तयति ।

एवमुक्तप्रकारेण सम्यक् परिज्ञातु शक्यते यत् भवभूतिकृतौ (उत्तररामचरिते) सर्वत्र कारुण्यसृष्टिरेव दृष्टिगोचरतां गच्छति । शृङ्गारवीररसयोरप्यपूर्वा व्यञ्जना नाटकेऽभूत् सा त्वतीवाह्लादकारिणी मोददायिनी चास्ति । परञ्च समेषा परिणति कारुण्य एव भवति, इत्यध्ययनेन सम्यक् विवेचनेन च ज्ञातु सुगमम् । सीतया साक रामस्य करुणभावस्तु परा कोटि गतो विद्यते परं जनककौशल्यासुमन्त्रादीनामपि कारुण्यवृत्तिरतीव मर्मस्पर्शकरी । पूर्वकालिकं पूर्वानुभूतञ्च दाम्पत्यप्रेम, पूर्वसेवित च दण्डकारण्य, पित्रो वात्सल्यप्रेमादीना स्मृती रामस्य शोक हठात् विवर्धयति ।

भवभूतिर्वस्तुतो रसकवि । स न केवलं करुणरसस्यापि तु प्रायेण समेषा रसाना सर्जने सिद्धहस्त । स शृङ्गारस्योभययो· (सयोगवियोगयो) पक्षयोस्तथा करुणस्य भावमयताया कोमलता याश्च वर्णने यथा पटुस्तथैव वीररौद्रभयानकरसादीनामपि सफलचित्रकार· । मालतीमाधवे शृङ्गारस्य, श्मशानप्रसङ्गे वीभत्सस्य भयानकरसस्य च महावीरचरिते वीरस्य, उत्तररामचरिते शृङ्गारस्य, वीरस्य, करुणस्य चापूर्वपरिपाकोऽभूत् । भवभूते· शृङ्गाररसोऽपि तत्प्रकृतिरिवातीव गम्भीरस्तस्मिन् गाम्भीर्य, विशुद्धता वासनाहीनता चास्ति ।

यद्यपीदं सत्य यद् भवभूतेर्नाट्येषु नाटकीयसविधान न तथाऽऽकर्षकम्, तत्कवित्वे न तथा व्यञ्जनाप्राधान्यं यथा कालिदासस्य । यो भाव कालिदासेन स्वल्पैरेव शब्दैर्वर्ण्यते स एव भावो भवभूतिना विपुलै शब्दै वर्णनविस्तारेण च वर्ण्यते तथापि कथनेऽस्मिन् नास्ति मनागपि सन्देहलेशो यत् रससिद्धौ तन्नाम कालिदासानन्तरमेव सर्वैर्गृह्यते । करुणरसक्षेत्रे तु सोऽनुपम. । करुणस्य यादृशी मन्दाकिनी कवित्वललामभूत उत्तररामचरिते नाटके प्रवाहिता सा निस्सन्देह सर्वातिशायिनी । 'करुणस्य मूर्त्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी' इत्यादिना जनकतनूजाया करुणाकरं दैन्यमापन्न स्वरूपं यथा सहृदयजनचेतांसि करुणासरिति निमज्जयति तथैव रामकौसल्याजनकादीना विलापोऽपि जनान् सुतरां पीडयति । रामकृतविलापेन विलपमानान् जडानपि वज्रादिपदार्थान् 'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' इत्यादिना वर्णयतो भवभूतेः प्रशंसा चेत् 'भवभूते

सम्बन्धात्' इत्यादिरूपेण श्रीगोवर्धनाचार्येण कृता सा तु सर्वथा समीचीनैव प्रतिभाति। 'एवमेव जडानामपि चैतन्यं भवभूतेरभूद् गिरा' इति प्रसिद्धिमागतमाभाणक सत्यमेव प्रतीयते। अत सस्कृतसाहित्ये 'कारुण्यं भवभूतिरेव तनुते' इति यदुच्यते तत्तु सर्वथा समीचीनमेव। करुणरससर्जनपटुरय महाकवि सदैव सस्कृतसाहित्याकाशे देदीप्यमाननक्षत्रमिव कवित्वालोक वितरन् स्थास्यति, इति मे द्रढीयान् विश्वास इति।

●●

भारवेरर्थगौरवम्

सुविशाले सस्कृतकाव्यजगति महाकवेर्भारवेर्नाम सादर स्मर्यत आलोचकै सहृदयकाव्यरसाभिज्ञै पाठकैश्च । अयं कविवर सस्कृतकाव्यक्षेत्रेऽलङ्कृतमार्गस्य प्रवर्तकत्वेन समधिकमादरभाजनत्व भजते । यद्यप्यनेन केवलमेकमेव किरातार्जुनीयनामक महाकाव्य विरचितम्, परञ्च तेनैव स महाकविपदवीमधिगत्य तथ्यमिद तारस्वरेण घोषयन् विभाति यत् कोऽपि कविर्न रचनाप्राचुर्येणापि तु रचनागुणगौरवेणैव महत्त्वपूर्ण स्थान समधिगच्छति । महाकविना महाभारतस्याख्यानात् स्वीयमहाकाव्यवस्तु परिगृहीतम् । सम्यगालोचनेन सुस्पष्टमिद भवति यन्महाभारतस्य स्वल्पमेव कथानकमाश्रित्य महाकविना स्वकाव्यप्रतिभाबलेन काव्यविरचनशक्तिवैभवेन च सुविशालमष्टादशसर्गात्मक महाकाव्य विरचितम् । मूलकथावस्तुन स्वल्पाकारत्व विलोक्य वक्तुमिद शक्यते यत् कोऽपि कविरन्यो मूलकथामिमामाश्रित्य एतावद्विस्तृतकायमहाकाव्यं विरचयितु कष्टेनैव समर्थ स्यात् । साहित्याचार्यप्रतिपादित-महाकाव्यलक्षणानुसार कविना स्वकीयकाव्ये ऋतुपर्वतसन्ध्यासूर्योदयादीना विस्तरतो वर्णन कृतम् । अनेन वर्णनाधिक्येनैव काव्यस्य कलेवरमेतावती विस्तृतिमधिगतम् । महाकाव्ये सर्वत्र कवि· कमपि विषय सरलया रीत्या वक्तु नोत्सहते । एकतो महाकाव्यस्य विभिन्नपात्रकृतसवादैस्तस्य काव्यशैल्या परिचय प्राप्यतेऽपरत· ऋतुवर्णने, प्रकृतिवर्णने, युद्धादिवर्णने च कवे· कल्पनामण्डिताऽलङ्कृतिभरा कृत्रिमा च शैल्यनायासेनैव द्रष्टु शक्यते । महाकवेरलङ्कारप्रियता तु सर्वत्रैव पदे पदे दृष्टिगोचरता याति । उपमाश्लेषार्थान्तरन्यासादीनामलङ्काराणा प्रयोगे कवि सुतरा समर्थ । कुत्रचित्तु तस्यालङ्कारयुता शैली सरसहृदयाना पाठकाना चेतासि पीडयन्त्यपि विलोक्यते । भारविद्वारा काव्यमार्गे प्रचालितेयमलङ्कृतशैली परवर्तिमहाकविभिर्माघादिभिर्यथाशक्ति अनुकृतेति सर्व एव जानन्तितराम् ।

भारविविरचितकिरातार्जुनीयनामकमहाकाव्यस्य सस्कृतसाहित्येऽपूर्व स्थानमस्ति । सस्कृते ख्यातिमागताना महाकाव्याना तदन्यतममस्ति । सस्कृतस्य बृहत्त्रय्यां किरातार्जुनीयस्यापि नामास्ति । अन्ये द्वे महाकाव्ये स्त माघस्य 'शिशुपालवधम्' श्रीहर्षस्य च 'नैषधीयचरितम्' । सम्यक् चेद्विवेचन क्रियेत तर्हि नूनमेव स्पष्ट भवति यदुक्तकाव्यद्वयापेक्षया किरातार्जुनीये सन्त्येतादृशा काव्यगुणा यै काव्यमिद ते अतिक्रम्य काव्यजगति सुतरा लोकप्रियतामाप्नोति । नास्मिन् सन्देहलेशोऽपि कथने यत् कालिदासमहाकाव्यानन्तर किरातार्जुनीयस्य स्थानमस्ति । एतदेव कारणमस्ति यन्महाकविभारवेर्बहुभि काव्यरसमर्मज्ञैरालोचकैर्विद्वद्भिश्च सुविशदा प्रशस्ति· कृता । एतादृश्योऽप्युक्तय सन्ति

यासु महाकवेर्माघाद्यपेक्षयाऽऽश्रेष्ठता प्रतिपादिता । उक्तय· सन्तु प्रशस्तिमूलाऽप्रशस्तिमूला वा ताभिरिद तु सिध्यत्येव यदय कविरालोचकाना चर्चाविषयत्व गतो बहुशोऽतस्तत्र तस्य काव्यजगति सुमहती प्रसिद्धिरेव हेतु । कविप्रसिद्धेरनुमानन्त्वनेनैव कर्तु शक्यते यदानन्दवर्धनवामनमहिमभट्टमम्मटरुय्यकभोजविश्वनाथप्रभृतिभिराचार्यै किरातार्जुनीयस्यानेकानि पद्यान्युद्धृत्यनि स्वग्रन्थेषु । अत्रास्माभिरिदानी काश्चित् कविविषयिका उक्तय उद्धियन्ते ।

महाकवेर्नाम कालिदासादिभिस्साकं गृहीतमपरै. कविभि । राजशेखरस्याध कथनेन ज्ञायते यदुज्जयिन्यामन्येषा कवीनामिव भारवेरपि परीक्षा सञ्जाताऽऽसीत् – श्रूयते चोज्जयिन्या काव्यकारपरीक्षा—

'इह कालिदासमेण्ठावत्रामररूपसूरभारवयः ।
हरिश्चन्द्रचन्द्रगुप्तौ परीक्षितावह विशालायाम्' ।।

भारवे परीक्षाऽभून्नवाऽभूदित्यस्मिन् विवादे न किञ्चिद् वक्तुमना , यतो हि न तेन काचिदभिप्रायसिद्धिः । अनयोक्त्या स्पष्टमिदं भवति यद् भारविरेतादृश कविर्य सम्यक् सुपरीक्षित । काव्यपरीक्षोत्तीर्ण एव स समेषा प्रशस्तिभाग्जातो नान्यथा ।

दक्षिणभारते 'ऐहोल'नामके स्थाने जैनकविरविकीर्तेरेकश्शिलालेख. प्राप्तो यस्मिन् कविकालिदासेन साकं भारवेर्नाम सादर गृहीत, येन प्रमाणितमिद भवति यत् कालिदासानन्तर काव्यक्षेत्रे भारवेर्नाम विख्यातमासीत्—

'येनायोजि नवेश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ।।

केषाञ्चिन्मते भारविर्मेधावी विद्वान् कविरस्ति—

स मेधावी कविर्विद्वान् भारविः प्रभवो गिराम् ।

(अवन्तिसुन्दरीकथासारः)

केनचिद् विदुषा भारवेर्वाण्या औपम्य वकुलमालया कुर्वता सा (वाणी) चमत्कृतिजनिकोद्घोषिता—

विमर्दव्यक्तसौरभ्या भारती भारवेः कवेः ।
धत्ते वकुलमालेव विदग्धानां चमत्क्रियाम् ।।

आचार्यक्षेमेन्द्रेण सुवृत्ततिलके भारविप्रयुक्तवंशस्थछन्दसः प्रशसा कृता—

वृत्तच्छत्रस्य सा काऽपि वंशस्थस्य विचित्रता ।
प्रतिभा भारवेर्येन सच्छायेनाधिकीकृता ।।

केचिदेतादृशा आलोचका (प्रशसका वा) सन्ति ये खलु भारवेस्स्वभावमधुरवाच प्रशंसन कुर्वन्ति—

'प्रकृतिमधुरा भारविगिरः' (सदुक्तिकर्णामृते)

राजशेखरेण भारवेर्वाणी समग्रज्ञानप्रकाशिकेति प्रतिपादितम्—

'कृत्स्नप्रबोधकृद् वाणी भा रवेरिव भारवेः' ।

आचार्यशारदातनयस्तु भारवि रसभावयो कविमुक्तवान्—

'तादात्म्यं भावरसयोर्भारविः स्पष्टमूचिवान्' ।

सुप्रसिद्धटीकाकारो मल्लिनाथो महाकविभारविकाव्यस्य नारिकेलफलवद् बाह्यकाठिन्य स्वीकुर्वन्नपि तत् (काव्यम्) रसान्वित स्वादु चोररीचकार—

नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ।।

अन्येऽपि समालोचका सन्ति ये भारवे कृति रसभरामर्थगौरवयुताञ्च स्वीकुर्वन्ति । श्रीकृष्णकवि कथयति—

'प्रदेशवृत्त्याऽपि महान्तमर्थ प्रदर्शयन्ती रसमादधाना ।
सा भारवेः सत्पथदीपिकेव रम्या कृतिः कैरिव नोपजीव्या ।।'

(भारतचरितम्)

सस्कृतक्षेत्र एतादृशानि कथनानि प्राप्यन्ते येषु कवीनां ते ते गुणा उल्लिखिता सन्ति यदर्थे ते (कवय) प्रसिद्धा सन्ति । एतादृश्येवैका बहुश्रुता बहुचर्चिता चोक्तिरस्ति यस्या महाकविकालिदासस्योपमाया , भारवेरर्थगौरवस्य, दण्डिन पदलालित्यस्य चोल्लेख विधाय माघगुणत्रयस्य (उपमार्थगौरवपदलालित्यस्य) प्रशस्तिरस्ति—

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

इत्थ प्रतिभाति यदस्यामुक्तौ कालिदासादिकविद्वितयापेक्षया माघस्य श्रेष्ठत्वप्रतिपादनं कृतमस्ति । इत्थमेवान्या अप्युक्तयोऽधिगम्यन्ते यासु भारव्यपेक्षया माघादीना श्रेष्ठत्वप्रतिपादनस्य प्रयास कृतो वर्तते—

तावद् भा भारवेर्भाति यावन्माघस्य नोदयः ।
उदिते च पुनर्माघे भारवेर्भा रवेरिव ।।

अस्या माघस्य भारवे श्रेष्ठता प्रतिपादिता। अन्याप्युक्तिरस्ति—

उदिते नैषधे काव्ये क्व माघः क्व च भारविः।।

अस्या भारव्यपेक्षया माघ, भारविमाघयोरपेक्षया श्रीहर्षस्य वरीयस्त्वमुक्तम्।

श्रीधनपालेनाधोलिखितायामुक्तौ पदयोजनाया भारवेर्माघस्याधिकशक्तिमत्व-मुद्घोषितम्—

माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे।
स्मरन्तो भारवेरेव कवयः कपयो यथा।।

उक्तरीत्या सुष्ठु विलोकयितु शक्यते यन्महाकविभारवि समधिकां दृष्टिमाकृष्टवान् स्वकाव्यम्प्रति। समालोचकैस्तस्य रसभावसिद्धि प्रशसिता, केनचित् स्वभावमधुरा वाणी, पुन केचिदर्थगौरवम्। अन्येऽपि सन्ति ये खलु भारविमाघयोर्मध्ये माघस्यैव श्रेष्ठत्वमङ्गीकृतवन्त। प्रायश सर्वासामुक्तीनां युक्तायुक्तत्वविचारे कृते समालोचकाना स्तुतिवादत्व निन्दावादत्व वा सुस्पष्ट भवति। 'अर्थगौरव' खलु भारवेरेतादृशो गुणोऽस्ति यस्य कृते कविरयमत्यन्तां ख्यातिमधिगत.। अतो 'भारवेरर्थगौरवम्' इत्यस्य कथनस्य युक्तायुक्तत्वविचार. सम्यग्वर्णनीयतामपेक्षते। सर्वजनकण्ठहारतामापन्नाया अस्या उक्तेर्विवेचनात्प्राक् भारवेर्व्यक्तित्वविषये (तस्य) कवित्वसिद्धान्तविषये च तत्काव्याङ्कितेनैव तस्य विचारेण विवेचनमप्यपेक्षामावहति।

भारविर्व्याकरणशास्त्रकामशास्त्रराजनीतिशास्त्रालङ्कारशास्त्रपिङ्गलशास्त्रा-द्यनेकशास्त्रपारङ्गतोऽस्ति। राजनीतिविषये तस्य ज्ञान न केवल शास्त्रीयमेवास्त्यपि तु व्यावहारिकमप्यस्ति। किरातार्जुनीयस्य प्राय समेषां पात्राणामुक्तिषु राजनीतिविषयकं ज्ञान प्रस्फुटित भवति येनानुमातुमिदमतीव सुकर यद् भारविर्नूनमेव राजनीतिज्ञ। महाकवेरस्य राजनीतिज्ञानेन साकमेव नीतिविषयकमपि ज्ञान सुसंश्लिष्टम्। एव राजनीतिज्ञानविचक्षणोऽयं कविः स्वीयप्रकृत्यनुकूलमेव महाभारतस्य वनपर्वण स एव कथांशो गृहीतो यस्य मूल कौरवपाण्डवयोः राजनीतिरेवास्ति। महाकाव्यस्यास्य मल्लिनाथानुसार नायको मध्यमपाण्डव (अर्जुन) सुविख्यातवीर, प्रधानो रसो वीरश्चास्ति। यद्यपि स्वीये काव्ये तेन शृङ्गाररसस्यापि सुविशदचित्रणं कृतं तथापि वक्तुमिदं नि सङ्कोचं शक्यते यद् भारवि शृङ्गारप्रियो नास्ति। अस्य शृङ्गारवर्णनेऽपि न तथा भावनाविकासो यथा कालिदासस्य काव्ये। शृङ्गारस्य कलापक्ष एव तस्य काव्ये सम्यगुद्घाटित। इत्थं प्रतिभाति यद् भारविर्महाकाव्यस्य लक्षणमाश्रित्यैव शृङ्गाररसस्य सुविशदं वर्णनं कृतवान् किरातार्जुनीये।

किरातार्जुनीयस्य पात्राणामुक्तिप्रत्युक्तिभिरिदं प्रकाश्यते यद् भारवि· स्वभावतोऽतीव

गम्भीर , स्वाभिमानी चास्ति। तस्य सम्मतौ स्वाभिमानस्यातीव महत्त्वमस्ति। कवे स्वाभिमानित्व द्रौपदीभीमयोर्मुखेन स्पष्टमेव प्रकटितमस्ति।

सस्कृतमहाकाव्यविकासक्रमपर्यालोचनेन भारविरलङ्कृतशैल्या प्रवर्तकत्वेनाङ्गीक्रियते। अस्या शैल्या शब्दार्थालङ्काराणा प्रचुरप्रयोग पाण्डित्यप्रदर्शन सन्ध्यासूर्योदयपर्वतादिवर्णनञ्च प्रायो दृश्यते। भारविकाव्ये एतत्सर्व परिलक्ष्यते। किरातार्जुनीयमलङ्कारै प्रकृतिवर्णनै. शाब्दिकचमत्कृत्या च विभूषितमस्ति।

इदानी काव्यशैलीविषये भारवेरपि विचारोऽवश्यमेव विचारणीय । यद्यपि महाकविना काव्यशैलीविषये प्रत्यक्षतो न किमप्युक्त तथापि किरातार्जुनीयस्याध्ययनेन तद्विषये किञ्चिदवश्यमेव ज्ञायते।

किरातार्जुनीयस्य द्वितीये सर्गे भीमस्योक्तिप्रशसन कुर्वन् युधिष्ठिर कथयति—

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते।।

(किरात० २।२६)

अस्य कथनस्याभिप्रायोऽस्ति यत् प्रामाणिके, चित्ताकर्षके भीमस्य वचनविन्यासे तस्य विमला बुद्धिस्तथैव प्रतिबिम्बिता भवति यथा सुनिर्मले दर्पणे कस्यचिदाकृति प्रतिबिम्बिता भवति। अनेन स्पष्टं भवति यद् भारविमते एतादृशेन काव्येन भाव्यं यस्मिन् चमत्कृतिजनकैः शब्दैर्बुद्धिवैभव स्पष्टत प्रकाश्येत।

भारवि· काव्यस्य वास्तविक स्वरूपं जानाति। तस्य मते काव्येऽर्थवैभवमेतादृश्या पदावल्या प्रकाश्येत या स्फुटवर्णालङ्कृता, कर्णसुखदा, समेषामानन्दप्रदा प्रसादगुणयुता च भवेत्—

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती।।

(किरात १४।३)

भारविर्विजानाति यच्छब्दार्थयोः साहित्यमेव काव्य भवति। महाकविमाघेन सत्कवेर्विदुषश्च कृते शब्दोऽर्थश्चोभावप्यपेक्षणीयावित्युद्घोषितम्—

शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।

(शिशुपालवधम्—२।८६)

इयमेव दृष्टिर्भारवेरप्यस्ति। तन्मते ससारे द्विप्रकारका जना सन्ति तेषां

केचित्काव्यस्यार्थसम्पदेवाभिलषन्ति पुनरपरे शाब्दिकसौन्दर्यमेव केवलमभिवाञ्छन्ति। एतादृशयोर्द्वयोरपि वर्गयोर्दृष्टिर्नोचिता यतो हि केवलमेकैकमेव पक्ष स्वीकुर्वतो वर्गद्वयस्य दृष्टिसङ्कीर्णता प्रकाशमायाति। यद्यपि शब्दार्थरुचीना समेषा जनानामाह्लाददायिनी वाणी सुदुर्लभा भवति, परन्तु सैवादर्शरूपाऽस्ति। अतो भारविमतेऽपि तदेव काव्य प्रशस्य यस्मिन् उपयुक्ता शब्दयोजनाऽर्थयोजना च स्याताम्—

स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभा सर्वमनोहरा गिरः।।

(किरात० १४।५)

वस्तुतोऽधोलिखिते श्लोके महाकविभारवे काव्यकलाविषयकदृष्टि सुतरा प्रकाशिता भवति। किरातार्जुनीयस्य द्वितीये सर्गे भीमस्योक्ते प्रशस्ति कुर्वाणो युधिष्ठिरो वदति यद् भीम। त्वदीयोक्तिरेतादृशयस्ति यस्यां सर्वाणि पदानि स्पष्टानि सन्ति, अर्थगाम्भीर्यस्योपेक्षा नास्ति, पुनरुक्तिदोषराहित्यमस्ति, न वा क्वचिच्छैथिल्य वर्तते—

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्।।

(किरात० २।२७)

श्लोकेऽस्मिन् प्रतिपादिता उक्तगुणा एव भारवे काव्यगुणा सन्ति। पद्येऽस्मिन् प्रतिपादितविचारदृष्ट्या भारविकाव्यञ्चेत्परीक्ष्येत तर्हि नूनमेव तत् (काव्यम्) परीक्षोत्तीर्णं सिध्येत्।

इत्थञ्चेद् भारवे प्रकृते·, पाण्डित्यस्य, व्यक्तित्वस्य, तेन परोक्षरीत्या प्रकटितकाव्यकलाविषयकसिद्धान्तस्य च सम्यग् विचार क्रियेत तर्हि सुस्पष्टं भवति यत्तस्य स्वभावगरिमा, पाण्डित्यगाम्भीर्यं, व्यक्तित्वगौरव च काव्यकलासिद्धान्तविषयेऽप्येकमद्भुतं गाम्भीर्यमुदपादयत्। तद् गाम्भीर्यं तत्कृतकाव्येऽर्थगौरवरूपेण प्रकटितमभूत्। अयमेव तस्यैतादृशो गुणो यस्य कृते स काव्यानन्दरसमर्मज्ञैर्विपश्चिद्भिरद्यावधि स्मर्यते। तस्य (भारवे.) मते प्रायो विद्वास स्वमनोगतं भावं स्ववाणीषु निवेशयन्ति परञ्च तेषां मध्ये विरलानामेव व्युत्पन्नानां विदुषां वाणी गम्भीरमर्थ प्रकाशयितुं समर्था भवति—

भवन्ति ते सभ्यतमा विपश्चितां मनोगतां वाचि निवेशयन्ति ये।
नयन्ति तेष्वप्युपपन्ननैपुणा गम्भीरमर्थं कतिचित्प्रकाशताम्।।

(किरा० १४।४)

वस्तुतस्तेषां विरलानामेवान्यतमो भारविर्यस्य काव्य गम्भीरमर्थ प्रकटयितुं क्षमता गतं विराजते।

साम्प्रतमिद प्रसङ्गोपेत यदर्थगौरवस्य वास्तविक स्वरूप परिज्ञायेत यस्य कृते भारविरेतावती ख्याति गत । अर्थगौरवस्यार्थोऽर्थगाम्भीर्य भावगाम्भीर्य वा अस्ति । वस्तुत स्वल्पै· शब्दैर्विपुलार्थसन्निवेश एवार्थगौरवपदेनोच्यते । एतदेवार्थगौरव भारविकाव्ये पदे पदे परिलक्ष्यते तेन कवेरर्थगौरवप्रतिपादनसामर्थ्य सम्यक् परिज्ञायते । भारवेरर्थगौरवच्छटा दर्शयितु किरातार्जुनीयनामकमहाकाव्यात् कानिचिदुदाहरणानि समुद्धियन्ते ।

किरातार्जुनीयस्य प्रथमसर्गे दुर्योधनस्य शासनपद्धतिं परिज्ञायागतो वनेचरो युधिष्ठिरम्प्रति कथयति यत् कार्यनियुक्तै सेवकै स्वस्वामिनोऽसत्यकथनेन न प्रतारणीया , एवमेव राजभिरपि सेवकानां यथार्थकथनम्प्रति क्रोधो न विधेयो यतो हि ससारे हितकर मनोहारि च वच सर्वथा दुर्लभम्—

क्रियासु युक्तैर्नृप ! चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ।।

(किरात० १।४)

दुर्योधनस्य लोकप्रियशासन वर्णयन् वनेचरो वदति यद् दुर्योधनेन कुत्रापि शस्त्रास्त्र नोत्थापितम्, क्वचित्क्रोधोऽपि न कृतस्तथापि तद्गुणगणगौरवाकृष्टा नराधिपास्तस्य शासन माल्यमिव शिरोभिर्धारयन्ति—

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ।।

(किरात० १।२१)

द्रौपद्या उक्तौ युधिष्ठिरस्य शान्तिनीतेर्विविधरूपेण भर्त्सना जाता । सा स्वराजलक्ष्मी शत्रुभिरपहारयितारं युधिष्ठिरं भर्त्सयति—

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ।।

(किरात० १।३१)

मानिनां कृते दैवकृतपराभवोऽप्युत्सव एव भवति, परन्तु स (पराभव) चेच्छत्रुकृत· स्यात्तर्हि नूनमेव गर्हणीय इत्थं विचारयन्ती सा (द्रौपदी) यदा युधिष्ठिरस्य शत्रुकृतां विपत्तिं स्मरति तदा तस्या हृदयं समूलं विनष्टं भवति—

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ।।

(किरात० १।४२)

कवे कृते मान यथाऽभिप्रेत तथैव भीमस्य कृतेऽपि । द्वितीये सर्गे द्रौपदीकथन समर्थयन् युधिष्ठिरस्य शान्तिनीतिञ्च निन्दन् भीमो वदति यन्मानिनोऽनायासेनैव प्राणान् परित्यजन्ति परञ्च मान न त्यजन्ति—

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ।।

(किरात० २।२०)

अधस्तने श्लोके भीमस्योक्तावर्थगौरवस्यापूर्वा छटाऽङ्किता । भीमो युधिष्ठिर कथयति यदैश्वर्याभिलाषिणा कृते शत्रूणा क्षयोन्मुख उत्कर्षस्तु सह्यो भवति परञ्चाभ्युदकोन्मुखो विनाश कथमपि सोढव्यो न भवति—

द्विषतामुदयः सुमेधसा गुरुरस्वन्ततः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ।।

(किरात० २।८)

द्रौपद्या राज्ञा कृते क्रोधस्य महत्त्वम् 'अबन्ध्यकोपस्य विहन्तुरापदाम्, इत्यादिना प्रतिपादितवती तस्या समर्थनं भीमेनापि कृत परञ्च युधिष्ठिर फलसिद्धौ क्रोधपरित्यागमावश्यकत्वेनाङ्गीकरोति—

शिवमौपयिकं गरीयसी फलनिष्पत्तिमदूषितायतीम् ।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ।।

(किरात० २।३५)

एवमेव स (युधिष्ठिर) अविवेकमापदां हेतुत्वेनाङ्गीकुर्वन् तस्य परित्यागमावश्यक मन्यते—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।।

(किरात० २।३०)

समस्ते खलु भारविकाव्येऽर्थगौरवस्य छटा पण्डितानां चित्तचञ्चरीकमाह्लादयन्ती विराजते । तत्र प्रेमविषयका , मनोविज्ञानसम्बन्धिन्य , भौतिकविषयसम्बद्धा.,

स्वाभिमानमहत्त्वप्रतिपादिका , राजनीतिविषयका , नीतिप्रतिपादिकाश्च सहस्रश सूक्तय सुष्ठु विलोकयितु शक्यन्ते । राजनीतिविषये नीतिविषये च यावत्य सूक्तयोऽत्र सङ्गुम्फिता अन्यत्र काव्यग्रन्थे नूनमेव सुदुर्लभा । उपर्युक्तविषयका काश्चित् सूक्तयो मूलरूपेणैवोद्धियन्ते—

प्रेमविषयकसूक्तय —

वसन्ति हि प्रेम्णि गुणा न वस्तुनि । (८।३७)

प्रेम पश्यति भयान्यपदेऽपि । (९।७०)

मनोविज्ञानसम्बद्धसूक्तय —

विमल कलुषीभवञ्च चेत कथयत्येव हितैषिण रिपु वा । (१३।६)

अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मन· । (११।८)

गुणगौरवादिप्रतिपादिका सूक्तय —

प्रकर्षमाधारवश गुणानाम् । (३।१८)

गुणा प्रियत्वेऽधिकृता न संस्तव । (४।२५)

कमिवेशते रमयितु न गुणा । (६।२४)

दुलर्भ हि गुणार्जनम् । (११।११)

गुरुता नयन्ति हि गुणा न संहति. । (१२।१०)

महता सता मानिना मानस्य च महत्त्वस्वरूपादिबोधकसूक्तय —

न महानिच्छति भूतिमन्यत. । (२।१८)

नातिपीडयितु भग्नानिच्छन्ति हि महौजस· । (१५।६)

दुर्लक्ष्यचिह्ना महता हि वृत्ति· । (१७।२३)

महतां हि धैर्यमविभाव्यवैभवम् । (१२।३)

सुदुर्ग्रहान्त करणा हि साधव । (१४।१)

न्यायाधारा हि साधव. । (११।३०)

दिशत्यपायं हि सतामतिक्रमः । (१४।९)

सता हि वाणी गुणमेव भाषते । (१४।११)

प्रकृत्यमित्रा हि सतामसाधव । (१४।२१)

अभिभूतिभयादसूनत. सुखमुज्झन्ति न धाम मानिन । (२।२०)

प्रकृति खलु सा महीयस सहते नान्यसमुन्नति यया। (२।२१)

किमिवास्ति यन्न सुकर मनस्विभि । (१२।६)

जन्मिनो मानहीनस्य तृणस्य च समा गति । (११।५९)

पुरुषस्तावदेवासौ यावन्मानान्न हीयते। (११।६)

परैरपर्यासितवीर्यसम्पदा पराभवोऽप्युत्सव एव मानिनाम्। (१।४१)

विश्वासयत्याशु सता हि योग । (३।३१)

समृद्धिस्वरूपवर्णनमूला सूक्तय —

निवसन्ति पराक्रमाश्रया न विषादेन सम समृद्धय. । (२।१५)

असुरक्षा हि बहुलच्छला श्रिय· । (२।३९)

विपदन्ता ह्यविनीतसम्पद । (२।५२)

सहायसाध्या· प्रदिशन्ति सिद्धय । (१४।४४)

राजनीतिविषयकसूक्तय —

न वञ्चनीया: प्रभवोऽनुजीविभि । (१।१४)

सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पद । (१।५)

शमेन सिद्धिं मुनयो न भूभृत· । (१।४२)

अरिषुहि विजयार्थिन क्षितीक्षा विदधति सोपधि सन्धिदूषणानि। (१।४५)

अगरीयान्न पदं नृपश्रिय: । (२।१४)

अतिमूढ उदस्यते नयात्। (२।४९)

नयहीनादपरज्यते जन· । (२।४९)

प्रकर्षतन्त्रा हि रणे जयश्री । (३।१७)

परमं लाभमरातिभङ्गमाहु. । (१३।१२)

महापकाराय रिपोर्विवृद्धि । (१६।२४)

राजनीतिर्भारवेर्मुख्य. प्रियश्च विषयोऽस्ति। उपरि प्रतिपादित यत्कविना स्वकीयमहाकाव्यस्य कृते महाभारतस्य राजनीतिसम्बन्धिकथानकमेव गृहीतमतस्तस्य काव्ये राजनीतेर्विशद काव्यमयं व्याख्यानमभूत्। अखिले खलु महाकाव्ये राजनीतेर्विविधाङ्गप्रतिपादकानि बहूनि सुभाषितानि कवे· तद्विषयक शास्त्रीयं व्यावहारिकञ्च परिपक्वं ज्ञानं प्रकटयन्ति। स्वीयराजनीतिज्ञानं चित्ताकर्षकं कवित्वमयञ्च विधातु कविरलङ्कृतामेव शैलीमाश्रितवान्।

अर्थान्तरन्यासालङ्कारद्वारा स स्वोद्देश्य पूरितवान्। प्रायश सूक्तयोऽर्थान्तरन्यासालङ्कारेणैव विभूषिता सन्ति। वस्तुतोऽयमेवालङ्कारो भारवेरर्थगौरवस्यापि सहायकत्वेन तिष्ठति। उपर्युक्तविषयानन्तर कवेरन्यान्यविषयसम्बन्धिज्ञानमपि न स्वल्पम्। नीतिशास्त्रस्य तु भारवि पण्डित एवात पदे पदे तत्काव्ये तद्विषयकसूक्तय प्राप्यन्ते। एतादृशीनामपि सूक्तीनामत्रोद्धरणमत्यन्तमावश्यकमवसरानुकूलञ्चास्ति।

नीत्यादिविषयकसूक्तय —

नहि प्रिय प्रवक्तुमिच्छन्ति मृषा हितैषिण । (१।२)
हित मनोहारि च दुर्लभ वच । (१।४)
वर विरोधोऽपि सम महात्मभि । (१।८)
अहो दुरन्ता बलवद्विरोधिता। (१।२३)
व्रजन्ति ते मूढधिय पराभवं भवन्ति मायाविषु ये न मायिन । (१।३०)
अबन्ध्यकोपस्य विहन्तुरापदा भवन्ति वश्या स्वयमेव देहिन । (१।३३)
विचित्ररूपा खलु चित्तवृत्तय । (१।३७)
ननु वक्तृविशेषनि स्पृहा गुणगृह्या वचने विपश्चित । (२।५)
सहसा विदधीत न क्रियाम्। (२।३०)
न तितिक्षासममस्ति साधनम्। (२।४३)
सहते न जनोऽप्यथ क्रियाम्। (२।४७)
भवन्ति भव्येषु हि पक्षपाताः। (३।१२)
मोह विधत्ते विषयाभिलाष । (३।१३)
न हीङ्गितज्ञोऽवसरेऽवसीदति। (४।२०)
रम्याणां विकृतिरपि श्रिय तनोति। (७।५)
लङ्घ्यते न खलु कालनियोग । (९।१३)
दु.खिते मनसि सर्वमसह्यम्। (९।३०)
हरति मनो मधुरा हि यौवनश्री·। (१०।१७)
न हि लभतेऽवसरं सुखाभिलाष । (१०।६२)
असन्मैत्री हि दोषाय कूलच्छायेव सेविता। (११।५५)
किमिव ह्यस्ति दुरात्मनामलङ्घ्यम्। (१३।७)

सवृणोति खलु दोषमज्ञता । (१३।६३)

सुदुर्लभा सर्वमनोहरा गिर· । (१४।५)

भवत्यपाये परिमोहिनी मति । (१४।१९)

उपर्युक्तविविधविषयसम्बद्धसूक्तिपर्यालोचननेन भारवेरर्थगौरवस्य महत्त्व परिपूर्णरूपेण प्रकाशमायाति । अत्रेदमवश्यमेवावगन्तव्यं यद् भारवेरर्थगौरवस्य नायमभिप्रायो यत्तेन स्वीये महाकाव्ये शब्दसौन्दर्यस्योपेक्षाविहिता । विवित्तवर्णाभरणा सुखश्रुति —'स्तुवन्ति गुर्वीममिधेयसम्पदम्'—'स्फुटता न पदैरपाकृता' इत्यादिश्लोकाभिव्यक्ततद्विचारेण तत्काव्यगतशब्दसौन्दर्यदर्शनेन चेदमेव स्पष्ट भवति यत्तस्य दृष्टि. शब्दस्यार्थस्य चोभयोरपि सौन्दर्योपर्यासीत् । भारविवाणी यथा कोमलातिकोमलभावान् प्रकाशयितुं क्षमा तथैव कठिनातिकठिनविषयानपि । तस्या इदमेव वैशिष्ट्यं यत्सा प्रसादमयी सती गम्भीराऽप्यस्ति—'प्रसन्नगम्भीरपदा सरस्वती' । गम्भीरमर्थ व्यञ्जयन्त्यपि भारविभारती स्वमनोहरतां न जहाति । इत्थ भाति यत् किरातार्जुनीयस्य द्वितीये सर्गे द्रुपदात्मजागिरं स्तुवन् भीमो भारवेरेव वाण्या गुणगौरवं वर्णयति—'विहिता प्रियया मन प्रियामथ निश्चित्य गिरं गरीयसीम्' ।

यथोक्त पूर्व यद् भारविरलङ्कृतशैल्या पण्डितकविरस्ति । किरातार्जुनीये यत्र कुत्रचित् श्लेषाद्यलङ्कारप्रयोगेण पाण्डित्यप्रदर्शनाभिलाषेण च दुर्बोधता समायाता, तथाप्येतादृशस्थलेष्वपि भारविस्तेभ्यो दोषेभ्य सर्वथा दूरस्थो ये खलु माघश्रीहर्षादिकाव्येषु शाब्दीक्रीडया, अलङ्कारवैचित्र्येण, कल्पनावैभवेन पाण्डित्यप्रदर्शनेन च समुत्पादिता । कठोरबाह्यावरणेनावृताऽपि भारवे कविताकामिनी रसवत्तां सहृदयजनचित्तहारित्वञ्च न विजहाति । अत एवालोचनगुणगौरवमण्डितेन काव्यमर्मज्ञमूर्धन्येन मल्लिनाथेन नाग्किेलसम्मित भारविवचो रसभरभरितञ्चोक्तम् 'नारिकेलफलसम्मित भारविवच ' कवितावरचनविचक्षण-कविवरकृष्णस्य शब्देषु 'महान्तमर्थ प्रदर्शयन्ती रसमादधाना' भारवे कविता कस्य काव्यरसिकस्य मनोमोदकारिणी न भवेत्? वस्तुतो महाकविभारविस्सदैव सर्वातिशायिन काव्यरसिककण्ठहारीभूतस्य लोकविश्रुतस्यार्थगौरवरूपगुणस्य कृते 'भारवेरर्थगौरवमि'त्युच्चारयता सहृदयाना स्मृतिपटलाद् दूर न गमिष्यति ।

●●

मम्मटस्य काव्यलक्षणम्

सस्कतसाहित्यशास्त्रस्य पर्यालोचनेन सुगमतयावगन्तु शक्यते यत्तत्र काव्यस्य स्वरूपादिकमाश्रित्य विभिन्नानि मतानि सन्ति। रसालङ्कारादिषट्सम्प्रदायाचार्यै काव्यस्य प्रयोजनविषये तत्स्वरूपादिविषये च स्वस्वमतान्युपस्थापितानि सन्ति। 'काव्यस्य किमङ्ग प्रधानमिति' प्रश्नोपरि च ते नैकमता। रसवादिभिराचार्यविश्वनाथमहोदयैः 'रसात्मक वाक्य काव्यमिति' रीत्या काव्ये रसस्य, अलङ्कारवादिभि भामहजयदेवप्रभृतिभिः 'अङ्गीकरोति य काव्य शब्दार्थावनलङ्कृती' इत्यादिरीत्या अलङ्कारस्य, रीतिवादिभिर्दण्डिवामनादिभि 'रीतिरात्मा तु काव्यस्य' एवं रीते, वक्रोक्तिवादिभि. कुन्तकादिभि 'वक्रोक्ति काव्यस्य जीवितमि'त्युक्त्वा वक्रोक्ते, ध्वनिसम्प्रदायाचार्यैरानन्दवर्धनाचार्यादिभि 'काव्यस्यात्मा ध्वनिरिति' रीत्या ध्वने, औचित्यमतावलम्बिभि· क्षेमेन्द्रमहोदयै 'औचित्येन विना रुचि प्रतनुते नालङ्कृतिर्नो गुणा' इति कथनेन औचित्यस्यैव च प्राधान्यमङ्गीकृतम्। एतदेव कारणं यद् य खलु आचार्यो यस्य मतस्य पोषक स तदनुसारमेव काव्यस्य लक्षणादिक कृतवान्। तेषां काव्यलक्षणाना सम्यक् विचारे च कृते कोऽपि जनः सुष्ठु वक्तु प्रभवेत् यत् 'स आचार्य. कस्य मतस्य पोषक अस्ति।' ध्वनिप्रस्थापनपरमाचार्य-मम्मटेनापि स्वसिद्धान्त मनसि निधाय स्वकीये काव्यप्रकाशनाम्नि ग्रन्थे काव्य-प्रयोजननिरूपणानन्तरमधोरीत्या काव्यलक्षणं प्रतिपादितम्—

''तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि''

लक्षणमिदमित्थ व्याख्यातु शक्यते—शब्दार्थौ काव्यमित्यभिधीयते। कीदृशौ शब्दार्थौ काव्यम्? इति जिज्ञासायाः शान्त्यर्थ मम्मटेनोक्ते काव्यलक्षणे विशेष्यभूतस्य 'शब्दार्थौ' इति पदस्य, 'अदोषौ' 'सगुणौ' 'अनलङ्कृती पुन· क्वापि' इति च विशेषणत्रयस्य सुनिवेश कृतः। अत सामान्यतो वक्तुं शक्यते यत् गुणयुतौ, दोषरहितौ, यत्र कुत्रचित् अनलङ्कृती (स्फुटाङ्काररहितौ) च शब्दार्थौ काव्यमिति मम्मटस्याभिप्राय। मम्मटकृत काव्यलक्षणमिदमाश्रित्य साहित्यजगत· कतिपयप्रमुखाचार्यैस्तत्रानेकानेकदोषानुद्भावयद्भि. स्वकीया विचारा आग्रहपूर्वकं प्रकटिता। अतोऽत्रावश्यकं प्रतिभाति यदुक्तलक्षणगत-प्रत्येकपदस्य सम्यक् विवेचनं तथा तदादायोद्भावितानाञ्च दोषाणा सुष्ठु पर्यवेक्षण क्रियेत।

सर्वप्रथममस्माभि· लक्षणगतविशेष्यभूतस्य 'शब्दार्थौ' इति पदस्य विचारः क्रियते। रसगङ्गाधरकर्तृभि· पण्डितराजजगन्नाथमहाभागै शब्दार्थयो समष्टौ व्यष्टौ वा काव्यत्वमनादृत्य शब्द एव तत् (काव्यत्वम्) स्वीकृतम्। स्वीये रसगङ्गाधरनाम्नि ग्रन्थे

तेनाधोरीत्या मम्मटस्य शब्दार्थोभयरूपस्य काव्यस्वरूपस्य खण्डन कृतम्—

'यत्तु प्राञ्च (काव्यप्रकाशकारादय) शब्दार्थौ काव्यमित्याहु तत्र विचार्यते अपि च काव्यप्रवृत्तिनिमित्त शब्दार्थयोर्व्यासक्त (व्यासज्यवृत्ति) प्रत्येकपर्याप्त वा? नाद्य , एकौ न द्वौ इति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारापत्ते । न द्वितीय , एकस्मिन् पद्ये काव्यद्वयव्यवहारापत्ते । तस्माद्वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता' ।

पण्डितराजस्यास्य कथनस्यायमभिप्रायोऽस्ति 'ये खलु साहित्यशास्त्राचार्या शब्दार्थौ काव्यमिति' वदन्ति तत्राय प्रश्न स्वाभाविकोऽस्ति यत् काव्यत्वधर्म शब्देऽर्थे च सम्मिलितरूपोऽस्ति वा तत्र (शब्दे अर्थे च) पृथक् पृथक् तिष्ठति? चेत् शब्दार्थयोरुभयत्रापि सम्मिलितरूपेण काव्यत्वधर्म स्वीक्रियेत तर्हि 'एको न द्वौ' इति व्यवहारवत् 'इद श्लोकवाक्यन्तु वर्तते परन्तु काव्य नास्ति इत्यपि वक्तु शक्येत। इत्थ च काव्येऽप्यकाव्यत्वबुद्धिर्जायेत। यथा द्वित्वबुद्धिस्तु द्वयोरेव पदार्थयोरुपस्थितौ सत्या जायते नत्वेकस्योपस्थितावपरस्यानुपस्थितौ। अत उभयो (शब्दार्थयो) काव्यत्वमङ्गीकर्त्तु न युज्यते। इत्थमेव काव्यत्वधर्म शब्देऽर्थे च पृथक्तया तिष्ठतीत्यपि स्वीकर्तु न शक्यम्। यतो हि एकस्मिन्नेव काव्यमये पद्ये शब्दस्यार्थस्य च दृष्ट्या काव्यद्वयव्यवहारापत्ति स्यात्। अत स्पष्टमिद यत् काव्यत्वं शब्दार्थयो न सम्मिलितरूपेण न वा पृथग्रूपेण तिष्ठति। इत्थमुक्तदोषापत्ते काव्यत्वस्य शब्दनिष्ठतैव स्वीकार्या। एतदेव कारण यत्तेन 'रमणीयार्थप्रतिपादक शब्द काव्यमिति' काव्यलक्षण स्वीकृतम्।

पण्डितराजस्योक्त कथन युक्तिसङ्गत न वेति विचारोऽवसरप्राप्त । रसगङ्गाधरस्य टीकाकर्त्रा नागेशभट्टेनैव तन्मत दूषयित्वा मम्मटमतपोषण कतिपययुक्तिद्वारा कृतम्। मन्ये तदेवास्मिन् प्रसङ्गे पर्याप्त स्यात्—

'आस्वादव्यञ्जकत्वस्योभयत्राप्यविरोधात् चमत्कारिबोधजनकज्ञानविषयता-वच्छेदकधर्मत्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च काव्य पठित श्रुत काव्य बुद्धमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृतिनिमित्त व्यासज्यवृत्ति । अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादक· 'तदधीते तद्वेद' इति सूत्रस्थो भगवान् पतञ्जलि सङ्गच्छते। लक्षणयाऽन्यतरस्मिन्नपि तत्त्वात् एको न द्वौ इतिवत् न तदापत्ति· । तेनानुपहसनीयकाव्यलक्षण प्रकाशोक्त (काव्यप्रकाशोक्त) निर्बाधम्' ।

उक्तरीत्या विचारान्तरं स्पष्टतो वक्तुमिद शक्यते यत् शब्देऽर्थे चोभयत्रा-विशेषेणास्वादव्यञ्जकत्व कथमप्यपलपितु न शक्यम्। 'काव्यं पठित, श्रुत, गीत, रचितमिति रीत्या चेत्काव्यस्य व्यवहारस्तस्य शब्दमयत्वं प्रतिपादयति। 'काव्य बुद्धम्' इत्यादिव्यवहारस्तस्य (काव्यस्य) अर्थमयत्व सूचयति। इत्थं काव्यस्य शब्दार्थमयत्व तु

निर्विवादमेव। अत 'शब्दार्थौ' (शब्दार्थयुगलं) काव्यमि'ति मम्मटकृत लक्षण कथमपि नासङ्गतम्। 'शब्दार्थौ' इत्यत्र शब्दस्य प्रागुक्तिस्तु तस्यार्थाश्रयत्वात्कृता, न तत्र अन्यत्किञ्चित्कारणम्। उक्तकारणादेव "नामरूपे व्याकरवाणि" इति वैदिके प्रयोगे 'वागर्थाविव सम्पृक्तौ' इति लौकिके प्रयोगे च शब्दस्य प्राथम्येनोक्ति सङ्गच्छते। वस्तुत काव्ये तु विभावादिसयोजनव्यापारनिष्पाद्यरसस्यैव प्राधान्य भवति शब्दार्थयोस्तु अप्राधान्यमेवास्ति। अत एव मम्मटेन 'शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षण यत् 'काव्यम्' इत्युक्तम्।

अत्रेद न विचारणीय यत् शब्दार्थयो काव्यत्वाङ्गीकारद्वारा मम्मटेन कश्चित् नूतन पन्था सस्कृतसाहित्यशास्त्रे सस्थापित। पण्डितराजजगन्नाथमन्तरा प्राय सर्वै खल्वाचार्यै शब्दार्थौ काव्यमिति स्वीकृतम्। अलङ्कारशास्त्रस्य प्रसिद्धि गतैराचार्यैर्भामहादिभिरपि 'शब्दार्थौ सहितौ काव्यमि'त्यादिना काव्यत्वस्य शब्दार्थोभयमयत्वमुररीकृतम्। अतो मम्मटकृते काव्यलक्षणे विशेष्यभूतस्य शब्दार्थौ इति पदस्य सार्थक्ये न कोऽपि शङ्कावकाश।

इदानी काव्यलक्षणगतस्य शब्दार्थौ इत्यस्य विशेषणभूतस्य अदोषौ इति पदस्य विचार क्रियते। विशेषणत्रये अदौषौ इति पदस्य प्राथम्येनोक्ति काव्ये दोषाभावस्य प्रधानत्वं सूचयति। यतो हि सति दोषे गुणादीना किमपि महत्त्वं न विद्यते। दोषस्तु कस्यचिदपि वस्तुन गुणाधिक्यमपहर्त्तु सर्वथा क्षम। सौन्दर्य्यापहारिदोषस्य स्वरूपमुद्वीक्ष्यैव दण्डी काव्ये स्वल्पमपि दोष सोढुं नोद्यत। अत एव स काव्यादर्शे तारस्वरेणोद्घोषयति—

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्।।

अर्थात् यथा स्वल्पोऽपि कुष्ठरोग सुन्दरमपि शरीर दूषयति तथैव स्वल्पोऽपि काव्यगतदोष· काव्यगतसौन्दर्यमपहरति। अत काव्ये दोष कथमपि नोपेक्ष्य। सति दोषाभावे तु काव्य गुणादिकं विनाऽपि किञ्चिदाह्लादयितु क्षमम्। अत एव 'अपदोषतैव विगुणस्य गुण·' इति न्यायो याथार्थ्य व्रजति। इति सर्व मनसि निधायैव मम्मटेन 'अदौषौ' इति विशेषणपद निबद्धम्। 'अदोषौ' इति पदेन मम्मटस्याभिप्रायो वर्तते यत् काव्यत्वविनाशका ये खलु च्युतसस्कारादय· दोषा सन्ति तद्रहितावेव शब्दार्थौ काव्यं भवितुं शक्नुयाताम्।

'अदोषौ' इति पदस्यानौचित्य प्रतिपादयताऽचार्यविश्वनाथेन सर्वथा तस्य (पदस्य) खण्डन विहितम्। स्वकीयमतमण्डने तेन प्रदत्तानां युक्तीना साराशोऽयमस्ति यन्नितान्तदोषरहितौ तु शब्दार्थौ संसारे सर्वथा सुदुर्लभौ। अतस्तयोरभावे तन्मूलककाव्यस्यापि दौर्लभ्यमापतेत्—एव काव्य प्रविरलविषय निर्विषयं वा स्यात्—सा० द०)। न केवलमेतावदेव तेन

मम्मटोद्धृतस्य विमृष्टविधेयाशविशिष्टस्य 'न्यक्कारो ह्ययमेव मे यदरय ' इति श्लोकस्यापि चर्चा कृता। तस्य कथनमस्ति यद् उक्तश्लोको ध्वनिकाव्यस्य (उत्तमकाव्यस्य) उदाहरणमस्ति। यदि तस्मिन् कोऽपि दोषो भवेत् तर्हि कथ तस्योत्तमत्व सुरक्षित स्यात् ? यद्युच्येत यत् श्लोकस्य 'न्यक्कारो ह्ययमेव' इत्यादिस्वल्पे स्थल एव दोषताऽस्त्यतो न कापि विप्रतिपत्तिस्तदा तु यस्मिन्नशे दोष तस्याकाव्यत्व, यस्मिन् पुनर्ध्वनित्व तस्योत्तमकाव्यत्व स्यात्। एतादृश्या दोलायमानस्थितौ तस्य (श्लोकस्य) काव्यत्वमकाव्यत्व वा सर्वमसिद्ध स्यात्—(यत्राशे दोष· सोऽकाव्यत्वप्रयोजक , यत्र ध्वनि स उत्तमकाव्यत्वप्रयोजक इत्यशाभ्यामुभयत आकृष्यमाणमिद काव्यमकाव्य वा किमपि न स्यात्'— (सा० द०)।

यदि सूक्ष्मदृष्ट्या विश्वनाथमतालोचन क्रियेत तर्हि नून वस्तुस्थिति प्रकाश समायात्। 'अदोषौ' इति कथनेन मम्मटस्य कथमपि नायमभिप्राय यद् यत्र कुत्रचित् काव्ये स्वल्पोऽपि दोष स्यात् तस्य काव्यत्व नष्टप्रायमेव। मम्मटमते रसानुभूतिरेव काव्यस्य प्रमुखो धर्म । अतो ये खलु दोषास्तस्या (रसानुभूतौ) बाधका भवन्ति, तेषा परिहार्यता तु नितरामावश्यकी। ये दोषा रसस्यापकर्षका न सन्ति तेषा स्थितिस्तु न काव्यत्वविघातिका, अतस्तेषां परिहार्यता नानिवार्या। यथा दु.श्रवत्वादयो दोषा सन्तोऽपि वीरवीभत्सभयानकादिरसेषु गुणा एव भवन्ति। अत एतादृशेषु दोषेषु विद्यमानेष्वपि न कापि क्षति । एतद्विपरीत त एव (दु श्रवत्वादय) करुणशृङ्गारादिरसानुभूतौ सुतरा बाधका अतस्तेषा दोषत्व काव्यत्वविघातकत्वञ्च निर्विवादमेव। अत सङ्क्षेपतो मम्मटस्यायमेवाभिप्राय प्रतिभाति यत् रसानुभूतिबाधकप्रबलदोषरहितावेव शब्दार्थौ काव्यम्। साधारणदोषयुक्तेऽपि काव्ये चेद्रसानुभूतौ काचिद् बाधो न भवति तदा तत् (काव्यम्) कथमपि काव्यत्व न विजहाति। इत्थ काव्यलक्षणे 'अदोषौ' इति विशेषणयोजनेन काव्यस्य प्रविरलविषयता निर्विषयता वा न भवितुमर्हति। अत. ध्वनिकाव्यमूलके 'न्यक्कारो ह्ययमेव मे यदरय ' इत्युदाहरणे अविमृष्टविधेयाशदोषे सत्यपि न काव्यत्वहानि । एतादृश्यामवस्थाया मम्मटकाव्यलक्षणस्य 'अदोषौ' इति पदस्य उपयोगित्व सुतरा स्पष्टम्।

'अदोषौ' इति पदस्य विचारानन्तर 'सगुणौ' इति पदस्य विवेचनमावश्यकम्। प्रथम गुणानां स्वरूपमवधारणीयम्। गुणाना स्वरूपविषये विभिन्नानि मतानि सन्ति। केचिदाचार्या (भट्टोद्भटादय) अलङ्कारगुणयो परस्पर कथमपि भेद न मन्यन्ते। वामनादीना मते 'काव्यशोभोत्पादका धर्मा गुणा ' 'काव्यशोभावर्धकाश्च धर्मा अलङ्कारा ' इति। तेषा मते काव्ये गुणाना स्थितिरनिवार्या नत्वलङ्काराणाम्। मम्मटोऽस्मिन् विषये आनन्दवर्धनाचार्यमतावलम्बी वर्तते। तन्मते काव्यस्यात्मभूततत्त्वस्य रसस्योत्कर्षाधायका: अपरिहार्याश्च धर्मा गुणा उच्यन्ते। अत एव तेनोक्तम्—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।

(काव्यप्रकाश -अष्टमोल्लास)

ये खलु धर्मा काव्यात्मान रस काव्याङ्गभूतशब्दार्थद्वारोपकुर्वन्ति, ते (शब्दाश्रयत्वात्) शब्दालङ्कारास्तथा (अर्थाश्रयत्वात्) अर्थालङ्काराश्चोच्यन्ते । पर्यवेक्षणेन स्पष्टमिद प्रतिभाति यन्मम्मटमते काव्ये गुणाना स्थितिरपरिहार्या, यतो हि ते काव्यात्मान रस पोषयन्ति । एतदेव कारण यन्मम्मटेन लक्षणे 'सगुणौ' इति पद 'शब्दार्थौ' इत्यस्य विशेषणत्वेन निबद्धम् ।

आचार्यविश्वनाथेन 'सगुणौ' इति विशेषणस्यापि खण्डन कृतम् । तन्मतस्यायमेवाभिप्रायोऽस्ति यद् गुणा रसस्य धर्मा , न तु शब्दस्य अर्थस्य वा । अत 'शब्दार्थौ' इति पदस्य विशेषणत्वेन 'सगुणौ' इत्यस्य योजन न युक्तिसङ्गतम् । यदि सम्यग् विचार्येत तदा विश्वनाथकथनस्य तथ्यहीनत्व प्रकाशित स्यात् । मम्मटस्तु गुणाना रसधर्मत्व स्वीकरोति—इति पूर्व प्रतिपादितम् । परञ्च प्रधानतो रसाश्रितानामपि ओजोमाधुर्यप्रसादादिगुणाना शब्देषु (व्यञ्जकेषु सुकुमारादिवर्णेषु), अर्थेषु (रचनासु) च स्थितिमूलको व्यवहारस्तेनात्मधर्माणा शौर्यादिलौकिकगुणाना शरीरस्थितिमूलकव्यवहारवदुपचारेण स्वीक्रियते । 'गुणवृत्या पुनस्तेषा वृत्ति शब्दार्थयोर्मता' इत्यादिकथनेन मम्मटस्योक्त एवाभिप्राय । अस्या स्थितौ मम्मटेन 'सगुणौ' इति पद 'शब्दार्थौ' इति पदस्य विशेषणत्वेन प्रयुक्त चेत्तर्हि का क्षति ? को वाऽपराध ? आचार्यविश्वनाथद्वारा तत्पदमादाय कृतस्य खण्डनस्य याथार्थ्य सुधिय एव विचारयन्तु । यतो हि गुणा· (ओज प्रसादमाधुर्यादय) काव्यस्यात्मभूततत्त्वस्य रसस्य सुतरा सहायका अतस्तेषा काव्ये स्थितिरपि अपरिहार्या । चेल्लोके अपि 'गुणा पूजास्थानम्' इत्युच्यते तर्हि काव्ये कथ न तेषा (गुणानाम्) स्थितिरपेक्षणीया भवेत्? एव काव्यस्य निर्दोषत्व यथाऽऽवश्यक तथैव सगुणत्वमपि । अतो 'अदोषौ' इति विशेषणपदानन्तर 'सगुणौ' इति विशेषणपदप्रयोग समीचीन एव ।

अन्ते, लक्षणे निबद्धम् 'अनलङ्कृती पुन क्वापि' इति विशेषणपदं विचारणीयम् । प्रसङ्गेऽस्मिन् सङ्क्षेपतोऽलङ्कारस्य स्वरूप विवेच्यम् । काव्यप्रकाशस्याष्टमोल्लासे काव्यगुणवर्णनप्रसङ्गे गुणेभ्योऽलङ्काराणा भिन्नता प्रतिपादयता मम्मटेनालङ्कारस्य सामान्यं लक्षण कृतम् ।

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।। (का० प्र०)

अस्यार्थोऽस्ति यद् ये (धर्मा) काव्ये विद्यमानस्य (अङ्गिनः) रसस्योत्कर्षत्वं

तदङ्गद्वारा (शब्दार्थशोभावर्धनद्वारा) यदा कदा (न तु सर्वदा) कुर्वन्ति ते (शब्दाश्रिता) अनुप्रासादय (अर्थाश्रिता) उपमादयश्चालङ्कारास्तथैवोच्यन्ते यथा कण्ठाद्यङ्गानामुत्कर्षाधानद्वारा (परम्परया) शरीरिण. (आत्मन) अपि शोभा वर्धयन्तो हारादय (लोके) अलङ्कारा कथ्यन्ते। मम्मटमतेऽलङ्काराणा वैशिष्ट्यमधोरीत्या प्रतिपादयितु शक्यते—

(१) अलङ्कारा गुणा इव साक्षात् सम्बन्धेन रस नोपकुर्वन्ति, अपि तु परम्परया।

(२) सौन्दर्याभावे सति कामिनीधृताऽलङ्कारा यथा दृष्टिवैचित्र्यमात्रहेतवो भवन्ति, तथैव काव्ये रसाभावे सति प्रयुक्ता अलङ्कारा उक्तिवैचित्र्यमात्रपर्यवसायिनो भवन्ति।

(३) अलङ्कारा काव्ये विद्यमानमपि रस क्वचिन्नोपकुर्वन्ति। 'जातुचित्, इति पदस्यायमेव भाव । इत्थं च कृतेऽलङ्कारस्वरूपविवेचन उक्तविशेषणस्य ('अनलङ्कृती पुन क्वापि' इत्यस्य) विचार सुकरो भविष्यति।

'अनलङ्कृती' इति पदस्य 'अलङ्कारविहीनौ' इत्यर्थ कदापि न युज्पते। अत्र 'अलवणा यवागू' 'अनुदरा कन्या' इत्यादिवत् ईषदर्थे 'नञ्' वर्तते। ईषदर्थस्य चास्फुटत्वे विश्रान्तिरस्ति। अतो 'अनलङ्कृती' इत्यस्य 'स्फुटालङ्काररहितौ' इत्यर्थो भवति। वस्तुत इदं न लक्षणघटक किन्तु 'सालङ्कारौ' इति विशेषणं ग्राहयति। 'क्वापि' इतिपदप्रयोगमहिम्ना 'सर्वत्र सालङ्कारौ शब्दार्थौ काव्यम्' इत्यर्थ स्वभावत सिद्धो भवति। कुत्रचिच्चेद् रसादिप्रतीतौ सत्या स्फुटालङ्कारविरहता स्यात् तत्रापि न काव्यत्वहानि । मम्मट काव्ये सर्वत्रालङ्कारस्य स्फुटत्वमपेक्षते। परन्तु तन्मते यत्र रसादि स्फुटस्तत्रालङ्कारस्यास्फुटत्वेऽपि न काव्यत्वहानि । नीरसे स्फुटालङ्कारविरहिते स काव्यत्व नाङ्गीकुरुते। यत्र रसादीनामवस्थान न तत्र स्फुटालङ्कारापेक्षा परञ्चाविद्यमाने रसादौ स्फुटालङ्कारस्यापेक्षा त्वस्त्येव।

एतस्मिन् प्रसङ्गे मम्मटेन निम्नाङ्कितपद्यमुदाहृतं यस्मिन् नास्ति कश्चित् स्फुटोऽलङ्कार । परञ्च विप्रलम्भशृङ्गारस्य स्थितत्वात्तस्यैव प्राधान्याच्च काव्यत्व सिद्धमेव—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।। (का० प्र०)

अस्मिन् पद्ये 'हर वर ' इत्यादिस्थलेषु यद्यपि अनुप्रासस्य स्थितिरस्ति सर्वगोचरा, परन्तु शृङ्गाररसस्य प्रतिकूलवर्णाना संयोजनेन तस्यालङ्कारत्व नष्टमेव। अलङ्कारस्यालङ्कारत्वं तु प्रकृतरसस्य पोषकत्वे सत्येव सिद्ध्यति। चेदलङ्कारोऽलङ्कार्यस्य (रसस्य) शोभावर्धनं विहाय तस्य शोभाहननं विदधाति तदा तस्य कथमलङ्कारताऽङ्गीकर्त्तुं युज्यते?

आचार्यविश्वनाथेनोक्ते पद्ये मम्मटप्रोक्तस्यालङ्काराभावरूपस्य कथनस्य खण्डन कृतम्। तस्य मतमस्ति यदुक्तपद्ये 'चेत समुत्कण्ठते' इत्युक्तस्य उत्कण्ठाभावरूपस्य कार्यस्योत्पत्तिवर्णन वरोपकरणादीनामनुपभुक्तत्वस्य कारणस्याभावे जातमत 'विभावना तु विना हेतु कार्योत्पत्तिर्यदुच्यते' इत्येतद्विभावनालक्षणस्य घटितत्वात् तत्र विभावनानामालङ्कारो निर्विवाद एव। इत्थमेव उपभुक्तत्वरूपकारणसत्त्वेऽप्यनुत्कण्ठारूपस्य तत्कार्यस्याभावकथनात् 'सति हेतौ फलाभावे विशेषोक्ति ' इति विशेषोक्तिलक्षणस्यापि तत्र घटितत्वात् विशेषोक्तिरलङ्कार स्पष्ट एव। एव विभावनाविशेषोक्तिद्वयस्य कल्पना विधाय तेन तन्मूलकस्य सन्देहसङ्करस्यापि स्थिति स्वीकृता। परञ्च सम्यगालोचनेन वक्तु शक्यते यद् विश्वनाथेन मम्मटस्याभिप्राय एव न बुद्ध । यतो हि मम्मटमतेऽपि तत्रोक्तालङ्काराणा स्थितिरस्त्येव परञ्च तेषा स्फुटत्व नास्ति। यतस्तत्र कारणकार्यभावकथनमार्थिकमेवास्ति न तु शाब्दिकम्। तत्र यदि 'चेतोऽनुत्कण्ठित न' इति रूपेण कारणकार्याभाववाचकनञादिना कथन स्यात् तदा विशेषोक्त्यादे स्फुटत्व स्यात्। तदभावे (उक्तरूपकथनाभावे) तयो. (विभावनाविशेषोक्त्यो) अस्फुटत्व सुतरा स्पष्टम्। इत्थमुभयोरलङ्कारयो स्फुटत्वे सति तन्मूलकसन्देहसङ्करस्याप्यस्फुटत्व सिद्धमेव। एवञ्च सम्यग् विलोकयितु शक्यमिद यद् उक्तालङ्काराणा तत्र प्रतीतिरभावमुखेनैव भवति न तु भावमुखेन। अतो यथा कथञ्चित् तेषा (अलङ्काराणा) स्थितौ स्वीकृतायामपि तेषामस्फुटत्व सुव्यक्तम्। उदाहरणेऽस्मिन् रसवदलङ्कारस्यापि स्थितिरङ्गीकर्तु न युक्तिसङ्गता। यतो हि यत्र रसस्याप्राधानान्य (अन्यस्याङ्गत्व) भवति' तत्रैव रसवदलङ्कारस्य स्थितिर्भवितु शक्नोति। अत्र तु विप्रलम्भशृङ्गारस्य प्राधान्यमस्ति। अतो रसवदलङ्कारस्य स्थितेस्तु वार्तैव नास्ति। एतदभिप्राय मनसि निधायैव मम्मटेन 'अत्र स्फुटो न कश्चिदलङ्कार। रसस्य च प्राधान्यान्नालङ्कारता' इत्युक्तम्। अत कोऽपि वक्तुं शक्नुयात् यत् 'अलनङ्कृती पुन. क्वापि' इत्येतद् विशेषणस्य सार्थक्य प्रतिपादयता मम्मटेनोद्धृते 'य कौमारहर स एव हि वर ' इत्येतस्मिन् पद्ये न काचिद् विप्रतिपत्ति। उपरिर्युक्तविवेचनेन विश्वनाथकृतखण्डनस्यायाथार्थ्य स्पष्टमेव।

इत्थ मम्मटकृतकाव्यलक्षणगतप्रत्येकपदस्य सम्यग् विवेचन युक्तिसङ्गतत्वञ्च प्रदर्शितम्। प्रसङ्गत तत्काव्यलक्षणमाश्रित्य पण्डितराजजगन्नाथादिकृततत्खण्डन-स्यानौचित्यमपि प्रकाशितम्। उक्तरीत्या कोऽपि विवेकशीलस्तस्मिन् काव्यलक्षणे निहितपदाना सार्थक्य विलोकयितु शक्तः। साम्प्रतमुक्तकाव्यलक्षणस्य व्यापकत्व सर्वाङ्गीणत्वञ्च विचार्यते।

मम्मटनिरूपितं काव्यलक्षण न केवल गुणालङ्कारदृष्ट्या न चोक्तिवैचित्र्यदृष्ट्या वा काव्यस्वरूपमुपस्थापयति, अपि तु तस्मिन्नलङ्कारगुणोक्तिवैचित्र्यध्वनिरसादीना सर्वेषा समन्वय· सङ्गात। तस्मिन् (काव्यलक्षणे) काव्यस्य बाह्यमाभ्यन्तरञ्चोभयमपि रूप

व्याख्यातम्। कस्यापि उपेक्षा न जाता। यतो हि कस्यचिदप्युपेक्षया काव्यस्य वास्तविक स्वरूप कथमप्युद्घाटयितु न युक्तम्। लोके कस्यचित् प्राणिन शरीर यथाऽपेक्षित तथैवात्माऽपि। शरीर विना आत्मन स्थितिश्चेद् व्यतिक्रान्ता, आत्मानमन्तरा शरीरस्य स्थितिर्विद्यमानाऽपि व्यर्थैव। शरीरस्याङ्गप्रत्यङ्गशोभा वर्धयन्तो बाह्यधर्मभूता परम्परया आत्मानमुपकुर्वन्तश्चालङ्कारा यथापेक्ष्यन्ते तथैव आत्मन उत्कर्षाधायका आभ्यन्तरधर्म-भूता शौर्यादयोऽप्यभिलषणीया। न केवलमेतावदेव कुष्ठाददोषराहित्यमपि प्राणिनो रूपमाकर्षक विधातु सुतरामपेक्षितम्। एतादृश्येव स्थिति काव्यस्यापि भवति। काव्ये काव्यात्मभूतस्य रसादे काव्यशरीरभूतयो· शब्दार्थयोश्च यथाऽपेक्षा तथैव काव्यात्मभूतरसेन साक्षात्सम्बद्धाना माधुर्यादिगुणानामसाक्षात्सम्बद्धालङ्काराणामपेक्षणीयत्वम्। किं बहुना लोक इव च्युतसस्कारादिदोषराहित्यमपि तत्र काव्येऽत्यन्तमावश्यकम्।

सम्यग् विचारेणेद सुतरां स्पष्ट भवति यत् मम्मटेनोक्त सर्व वास्तविकत्व मनसि निधाय, स्वपूर्वाचार्याणा काव्यलक्षणानि च सुविचार्यैव साहित्यजगति काव्यस्यैतादृश लक्षणमुपस्थापितं यस्मिन् प्राय सर्वेषा पूर्ववर्तिकाव्यलक्षणानां समन्वय सञ्जातस्तथा काव्यस्य सर्वाङ्गपूर्ण सुसङ्गत स्वरूपञ्च व्याख्यातम्। तेन स्वकाव्यलक्षणे 'शब्दार्थौ' इति पदेन काव्यशरीरस्य 'सगुणौ' इत्येनन काव्यात्मभूतरसस्य आभ्यन्तरधर्माणाम्, 'अदोषौ' इति पदेन च्युतसस्कारादिकाव्यदोषराहित्यस्य, 'अनलङ्कृती पुन क्वापि' इत्यनेन च बाह्यधर्मभूतकाव्यशोभावर्धकालङ्काराणा काव्यात्मभूतस्य रसस्य चापेक्षणीयत्वं काव्येऽङ्गीकृतम्। पूर्वकालिकाचार्याणा काव्यलक्षणेषु शब्दार्थरीतिरसध्वन्यादीनां चर्चाऽभूत् परञ्च स्पष्टत गुणदोषयो चर्चा नाभूत्। मम्मटेन 'अदाषौ' 'सुगणौ' इति पदद्वययोजनेन स्वकीया व्यापकदृष्टि प्रदर्शिता। वस्तुत काव्यस्य सर्वेष्वङ्गेषु विद्यमानेष्वपि तस्य (काव्यस्य) गुणयुक्तत्वं दोषराहित्यञ्चातीवापेक्षितम्। अनलङ्कृती पुन. क्वापि इति कथनेन तस्यायमेवाभिप्रायो यत् स्फुटालङ्काररहितमपि काव्य यदि रसमय भवति तर्हि तस्याकर्षकत्व सौन्दर्यञ्चाप्रतिहतमेव। अनेन प्रकारेण काव्ये अलङ्काराणामपेक्षितत्वं स्वीकुर्वताऽपि तेन तेषाम् (अलङ्काराणाम्) गौणत्व सूचितम्।

अन्त एतदेव कथन प्रासङ्गिक यत् स्वल्पैरेव शब्दैर्मम्मटेनैकमेतादृश सर्वाङ्गीण, व्यापक, वैज्ञानिकञ्च काव्यलक्षणमुपस्थापित यस्मिन् प्राय समेषामाचार्याणा काव्यलक्षणानामाभासो दृश्यते तथा ध्वनिवादिनो मम्मटस्य स्वीयसिद्धान्तोऽपि लक्ष्यतेतराम्।

●●

शकुन्तला-चरित्र-चन्द्रिका

अभिज्ञानशाकुन्तलस्य नायिका शकुन्तला कालिदासीयरूपकाणा सर्वासु नायिकासु सर्वोच्चस्थानमधितिष्ठति। तस्या पितृनाम विश्वामित्रो मातृनाम मेनका च स्त । लोकलज्जावशात् जननकाल एव सा स्वमात्रा कण्वाश्रमसमीपस्थे मालिनीनदीतटे परित्यक्ता सती वात्सल्यस्नेहवञ्चिताऽभूत्। दयार्द्रचित्तेन महर्षिकण्वेनाश्रमे तस्या परिपालन कृतम्। मालिनीतीरे परित्यागकाले यत सा शकुन्तै (पक्षिभि) परिवारिताऽऽसीदतस्तस्या नाम शकुन्तलेति चक्रे महर्षि । सा शाकुन्तलस्य प्रथमे, तृतीये, चतुर्थे, पञ्चमे, सप्तमे चाङ्के दृष्टिगोचरता व्रजति, द्वितीये षष्ठे चाङ्के नोपतिष्ठति। परञ्चानुपस्थितिदशायामपि समग्रघटनाक्रमस्य केन्द्रबिन्दुत्वेन सैव विराजतेतराम्। सम्प्रति शकुन्तलाचरित्रविमर्शो विधीयते।

अनिन्द्यसौन्दर्यमण्डितमेनकातनूजात्वेन शकुन्तला तपोवनवनदेवीव नैसर्गिकलावण्यमधिगच्छन्ती समेषा हृदयान्यावर्जयति। निर्विकारशान्तिमय आश्रमे तस्या निर्विकारसौन्दर्यमहर्निश विकसतितराम्। राजा दुष्यन्त प्रथमदर्शन एवाव्याजमनोहरतद्रूपमाधुर्यमुग्धो भूत्वा वदति—

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।।

(शाकुन्तलम्, १-१८)

तदीयाखिलाङ्गेषु लावण्यातिशय स्फुरति। पल्लवताम्रस्तस्या अधरो, मृदुलशाखासदृशौ भुजौ, पुष्पमिव चेतोहर तारुण्यञ्च सर्वेष्वङ्गेषु परिव्याप्तानि—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।

(शाकुन्तुलम्, १-२१)

निर्दोषां शकुन्तलागतां रूपसम्पत्तिं विलोक्येत्थ प्रतीयते यद्विधाता समस्त-सौन्दर्योपकरणमागृह्यान्त करणेन तत्सृष्टि विदधावत एव साऽद्वितीयरमणीरत्नमिवाभाति—

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।

स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ।।

(शा०, २-९)

मानवीयं सौन्दर्यन्तु यस्या कस्यामपि रमण्यामधिगन्तु शक्यते पर तस्यान्त्वलौकिक सौन्दर्यमनुस्यूत यस्योपलब्धिरस्मिन् धरणीतले न भवितु शक्नुयात्। कि कान्तिभास्वर तेज कथमपि भूतलादुदेतु प्रभवेत् —

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ।। (शा०, १।२५)

शकुन्तलासौन्दर्य एतादृशी नैसर्गिकी दीप्तिर्विद्यते यथा साऽऽत्मान मण्डयितुमपराणि मण्डनोपकरणानि नापेक्षते। आभरणानपेक्षि तस्या रूपमाभूषणाना न दासोऽपि त्वाभूषणान्येव तस्य (रूपस्य) दासतामुपयान्ति। तद्रूपमनाभूषणमप्याभूषण विधातुं क्षमते। असुन्दरैरपि वल्कलाद्युपकरणैस्तदीय रूप तथैवाधिकमनोज्ञता व्रजति यथा शैवलेन कमल तथा मलिनकलङ्केन हिमाशुश्च मनोहारित्वमुपयात.—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।

(शा०, १-२०)

शकुन्तलासौभाग्यस्य महतीयं विशेषता यत्तत्प्रत्येकदशाया मनोहारित्वं न जहाति। स्वप्रियतमविश्लेषजन्यकार्श्यमुपगतायामपि तस्यां विराजमाना लावण्यमयी छाया सर्वान् विमोहयति। तथ्यमिदमाश्रित्य प्रियंवदा वदति—

"अनुदिवस खलु परिहीयसेऽङ्गै । केवलं लावण्यमयी छाया त्वां न मुञ्चति"।

शकुन्तलासौन्दर्य एकमपूर्व निष्कालुष्यमय पावनत्वं विद्यतेतराम्। अनाघ्रातपुष्पेण, नखाच्छिन्नकिसलयेन, अखण्डितमणिना, अनुपभुक्तमाधुर्यमधुना च सदृशं पावनं शकुन्तलारूप पुण्यानामखण्डं फलमिव प्रतिभाति—

शकुन्तला न केवल दैहिकरूपसम्पत्त्यैव सवलिताऽपि तु सा प्रेमलज्जासेवा-सरलताशालीनताद्यान्तरिकगुणसम्पदाऽपि विभूषिता सर्वान् प्रीणयति। 'यत्राकृतिस्तत्र गुणा वसन्ति' इमामुक्तिं सा सर्वथा चारितार्थ्यं नयति।

तपोवनजीवन यापयन्त्यास्तस्या हृदयस्य यौवनावस्थायामपि यौवनाभिन्नमित्रेण कामेन सह दुष्यन्तदर्शनात्प्राक् परिचयो नासीत् परन्तु नवागन्तुकदुष्यन्तस्य प्रथम-दर्शनेनैव तदीयो रसपेशलश्चित्तचञ्चरीकश्चञ्चलतारूपविकारदशामुपगत —

"किं नु खल्विम प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयाऽस्मि सवृत्ता" (शा० प्र० अ०)।

शकुन्तलामानसमन्दिरे प्रथमत· समुपस्थितकामदेवेन तत्प्रणयकथा प्रारभते। स्वहृदयगता प्रथमोद्भूतामप्रत्याशिता कामविकृतिमनुभूय साऽऽश्चर्यचकिता जायते, यतो हीत पूर्व तथा नानुभूतैतादृशी काप्यनुभूति ।

तदीया कामविकृति स्वसखीपरिहासेन दुष्यन्तसान्निध्येन चानुरागाकार धारयति। यद्यपि शीलसङ्कोचवशात् सा स्वीयमनोविकार गोपयितु प्रयतते परन्तु दुष्यन्त आत्मानम्प्रति तत्प्रेमासक्ति झटिति परिज्ञातु प्रभवति।

शकुन्तलाप्रेम स्वप्रियतमानुकूल्यमपेक्षते। प्रेमतिरस्कारभयात्सा प्रेमविह्वलाऽपि सती स्वीयप्रणय निवेदयितुं नाग्रे गच्छति—

"हला चिन्तयाम्यहम्। अवधीरणाभीरुकं पुनर्वेपते मे हृदयम्"।

(शा० तृ० अ०)

प्रियतमासह्यवियोगेन दिनानुदिन परिक्षीयमाणा सा (शकुन्तला) स्वसखीभि पौन पुन्येनानुरुध्यमाना सती यथा स्वमनोव्यथाकारण ज्ञापयति तेन दुष्यन्तम्प्रति तदनु-रागस्य गाम्भीर्यमविचलता चानायासेनैव परिज्ञातुं शक्येते—

"तद्यदि वामनुमत, तथा वर्तेथा यथा तस्य राजर्षेरनुकम्पनीया भवामि। अन्यथाऽवश्यं सिञ्चत मे तिलोदकम्।" (तृ० अ०-१)

शकुन्तलाप्रेम्णि तन्मयत्वातिशय पराभूमि गतो विद्यते। अखिले खलु ससारे सा स्ववल्लभं विहाय न किमपि पश्यति न वाऽन्यत्किमपि कर्तु वाञ्छति। प्रियवियोगकाले चक्रवाकीव प्रतिक्षणं स्वहृदयाराध्यदेव दुष्यन्तमेवानुस्मरन्ती कथमपि जीवति। स्वधर्मपित्राऽतिथिसत्काराय सम्यग् नियोजिताऽपि तत्कार्यभारं वोढुं न प्रभवति। फलतोऽतिथिसत्काराकरणात् 'अदूरकोपा हि मुनिजनप्रकृति'रितीमामुक्तिश्चरितार्थयत कोपावतारस्य दुर्वासस. कोपभाजनतां व्रजति—

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।। (शा० ४।१)

एतादृशो दारुण शापस्तस्या वज्रपात इव पतित , परमनन्यमानसा सा न किमपि बोद्धु समर्था । सखीद्वय तस्या अतिभूमि गतमनुरागातिशय सुष्ठु विज्ञातु क्षमम् । प्रियवदा तद्गता शोकाकुलावस्था प्रकाशयितु कथयति—

"अनसूये । पश्य तावत् । वामहस्तोपहितवदनाऽऽलिखितेव प्रियसखी । भर्तृगतया चिन्तयाऽऽत्मानमपि नैषा विभावयति कि पुनरागन्तुकम्" । (च० अ०)

परन्तु कि तेनादूरकोपो दुर्वासास्तु तन्न विजानीते?

'बहुवल्लभा राजान श्रूयन्त ' इत्युक्तेरभिप्राय सा सम्यग् जानाति । परञ्च सपत्नीविषयिणी नारीसुलभेर्ष्या तदीयचित्तेऽपि विराजते । साऽतीव चातुर्येण प्रियवदा पृच्छति—

"हला, किमन्त पुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन" । (तृ० अ०)

प्रश्नेनानेन सा प्रयोजनद्वय साधयितुं यतते । एकत सेदमवज्ञातुमिच्छति यद् राज्ञोऽन्या राज्ञ सन्ति न वा? पुनरपरत साऽन्याविभक्तस्वपतिप्रेमसम्बद्धाभिलाष सूचयति । अत्राखण्डपतिप्रेम प्रति तदभिनिवेशो विशेषतश्चिन्त्य. ।

परस्परानुरागस्य परिणतिर्यदा दाम्पत्यसम्बन्धे जाता, तदा प्रभृति सा स्वपति-चिन्तनपरैवाश्रमे वसति । चतुर्थेऽङ्के धर्मपित्राऽऽशीर्वचसा (दिष्ट्याधूमाकुलितदृष्टेरपीत्यादिरूपेण) कृतार्था सत्यनेकानेकहृद्गतकोमलभावान् स्वमानसमञ्जूषायां धारयन्ती गौतमीशार्ङ्गरवशारद्वतादिभि साक प्रतिगृहं व्रजति । तत्राप्रत्याशितरूपेण स्ववल्लभभूतेन दुष्यन्तेन प्रत्याख्याता सा पुरोहितभवने कथमपि वस्तु नेहतेऽपि तु स्वमात्रा मेनकया साक हेमकूट गत्वा तत्रैव पतिपरित्यक्ता सीतेव स्वविरहघटिकां गणयन्ती स्वदौर्भाग्यमूलकमधन्य जीवन यापयति—

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ।।(७-२१)

पतिप्रत्याख्यानेन भृशमवमानिताऽपि सा स्वधर्मपितुर्महर्षिकण्वस्य 'भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीप गम ' इति वचन (आदेशरूपम्) मनसि निधाय दुष्यन्तम्प्रति कमप्यसद् विचार मानसेऽपि न धारयति वचसः कथा तु दूर एवास्ताम् ।

शापविनिर्मुक्तो दुष्यन्तोऽपि शकुन्तलापतिप्रेम सर्वाशतोऽवबुध्यते । सप्तमेऽङ्के द्वयो (शकुन्तलादुष्यन्तयो) पुन सयोगकाले स शकुन्तलाकृताभिज्ञानेनैव सन्तुष्यति सुतरामानन्दमवाप्नोति च ।

"प्रिये । क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणाम संवृत्तम् । यदहमिदानी त्वया प्रत्यभिज्ञातमात्मानं पश्यामि' । (स० अं०)

दुष्यन्त कृतापराध इव तस्याश्चरणयो पतति तथा शकुन्तलाविषयकस्वकठोर-व्यवहारस्य कृते क्षमा याचते—

सुतनुहृदयात् प्रत्यादेशाव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत्।
प्रबलतमसामेवं प्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया।। (७।२४)

एतादृशावसरेऽपि शकुन्तला पतिपरायणा सहनशीला रमणीव दुष्यन्तम्प्रति न किमपि कटुवचनं प्रयुङ्क्ते केवल स्वदुर्भाग्यमेव दूषयन्ती ब्रवीति—

"उत्तिष्ठत्वार्यपुत्र । नून मे सुचरितप्रतिबन्धक पुराकृत तेषु दिवसेषु परिणामाभि-मुखमासीद् येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरस सवृत्त"। (स० अ०)

शकुन्तलाचरणयोर्दुष्यन्तस्य प्रणिपात शकुन्तलाया आदर्शभूतस्य प्रतिप्रेम्ण एव विजय । असह्यपतिवियोगरूपं दारुणदु ख सोढ्वाऽपि तद्द्वारा स्वपतिम्प्रति कठोरवचनाप्रयोगोऽसद्विचाराग्रहणञ्चाविचलपातिव्रत्यमेव समुद्घाटयत ।

आत्मीयतासवलिते स्नेहाश्रये कण्वाश्रमे पालिता पोषिता च सती शकुन्तला सहजत सुशीला लज्जावती चास्ति। यद्यपि तिस्र सख्य (शकुन्तला, प्रियवदा, अनसूया) प्रायेण समवयस्कास्तथा सर्वासा जीवनयापनञ्च समानपरिस्थित्यामेव भवति परन्तूक्तं गुणद्वय (सुशीलता लज्जा च) ता (शकुन्तला) पृथक्करोत्यपराभ्या सखीभ्याम्। दुष्यन्तप्रथमदर्शनेन प्रादुर्भूतमात्मकामविकारं सा लज्जावशात् स्वाभिन्नहृदय सखीद्वितयम्प्रत्यपि प्रकटयितु न क्षमते। प्रथमेऽङ्के यदा राजा तस्या दिव्य रूप प्रशंसति तदा सा लज्जयाऽधोमुखी तिष्ठति।

शकुन्तलाचेतसि दुष्यन्तविषयकानुरागातिशयो विद्यते, परन्तु सा शीलसङ्कोच-वशात्त विज्ञापयितु न प्रभवति। ईदृश शीलसङ्कोचमूलं गुण लक्ष्यीकृत्य राजा वक्ति—

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखीना
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः।। (शा० १-३०)

शाकुन्तलस्य तृतीयेऽङ्के प्रेमासक्तेस्तस्या मन स्थितिर्नितान्तमुद्विग्ना जायते, परन्तु सखीजनेन मुहुर्मुहु प्रार्थ्यमानाऽपि सा स्वाभिन्नहृदय सहचरीद्वयमपि स्वव्यथा वक्तु सङ्कुचति—

"सखि ! यत प्रभृति मम दर्शनपथमागत स तपोवनरक्षिता राजर्षि " (तृ० अ०)

अग्रे सा सखीद्वयाग्रहाधिक्येनैवैभि शब्दै स्वदशाहेतुभूतमनुरागविशेषं विज्ञापयति—

"तत आरभ्य तद् गतेनाभिलाषेणैतदवस्थाऽस्मि संवृत्ता" । (तृ० अ०)

भावमये दुष्यन्तसयोगकालेऽपि रहसि सा सहसाऽऽत्मान न समर्पयति। मर्यादामनुसरन्ती राज्ञ आतुरतामभिलक्ष्य शील रक्षितुमावेदयति—

"पौरव ! रक्ष विनयम्। मदनसन्तप्ताऽपि न खल्वात्मन प्रभवामि" । (तृ० अ०)

सप्तमेऽङ्के यदा राजा "शकुन्तले ! अवलब्यता पुत्र , त्वां पुरस्कृत्य द्रष्टुमिच्छामि" इत्यादिना सपुत्रया तया सह कश्यपसमीपगमनसम्बन्धिस्वाभिलाष प्रकटयति तदा शकुन्तला तेन सह गुरुजनसमीपगमने समुद्भूयमाना स्वलज्जामेभिः शब्दैर्विज्ञापयति—

"जिह्रेम्यार्यपुत्रेण सह गुरुसमीप गन्तुम्" । (स० अ०)

अत्रेदमवश्यमवधेय यच्छकुन्तलास्वभावे यद्यपि सहजतो विनयशीलता विराजतेतराम्, परन्तु तस्मिन् (स्वभावे) विनयेन सार्द्ध स्वाभिमानस्य मणिकाञ्चनयोगो विद्यते। तदीयस्वाभिमानस्तदा जागर्ति यदा तस्या आचरणं वशादिगरिमाण वा लक्ष्मीकृत्य कश्चित्प्रहरति। ईदृश एवावसरो नाटकस्य पञ्चमेऽङ्के सम्प्राप्तो भवति। दुष्यन्तस्य सभामण्डपे गौतम्याद्युपस्थितौ यदा राजा 'किमिदमुपन्यस्तम्" "किं चात्रभवती मया परिणीतपूर्वा?" इत्यादिवचनै शकुन्तलया समं जात स्वविवाहमङ्गीकर्त्तुं नोद्यतो भवति तदा तदीये हृदये प्रियतमवैमुख्यरूपापमानस्य प्रथमाघातो भवति। परन्तु सा राज्ञ. शार्ङ्गरवस्य च मध्ये जायमानं वाग्युद्ध तावत् तूष्णी सहमाना तिष्ठति यावद् गौतमी तदवगुण्ठनमपसार्य स्वविवाहवृत्तान्तं प्रमाणयितुं तां नादिशति। गौतम्यादेशेन आर्यपुत्रेति सम्बोध्यापि विरता भवति तथा प्रकारान्तरेणोक्तं सम्बोधन परिवर्त्य 'पौरवेति सम्बोधनेन राजान सम्बोध्य नि शङ्कं वदति—

'पौरव ! न युक्तं नाम ते तथा पुनराश्रमपदे स्वभावोत्तानहृदयमिम जनं समयपूर्व प्रतार्येदृशैरक्षरैः प्रत्याख्यातुम्' । (स० अं०)

अन्यै· प्रमाणैरपि यदा राजा विवाहवृत्तं यथार्थत्वेनोरीकर्तुं नोद्यतते तथाऽऽक्षिपन्नेवास्ते तदापि सर्वं सहते, परन्तु यदैव सः (राजा) स्त्रीणामशिक्षितपटुत्वमित्यादिवचनैः समस्तस्त्रीजातिं स्वदोषारोपस्य लक्ष्यत्वेन निर्धारयति तदा तदीयः स्वाभिमानो वाचालतां याति। सा सरोषं राजानमनार्येति सम्बोधनेन सम्बोधयन्ती वदति—

"अनार्य ! आत्मनो हृदयानुमानेन पश्यति । क इदानीमन्यो धर्मकञ्चुकप्रवेशिन-स्तृणछन्नकूपोपमस्य तवानुकृति प्रतिपत्स्यते?" (स० अं०)

वस्तुत आर्यनार्यान्यत्सर्व सोढु शक्नोति सा स्वप्रेम्णोऽपमान स्वचरित्रलाञ्छनञ्च कथमपि सोढु न प्रभवति ।

अन्ते पुरोहितस्य गृहे वस्तु प्रस्तावस्तथा शार्ङ्गरवस्य शाब्दिकी प्रताडना तदीय-मभिमान पुनराहत । परिणामत सा 'भगवति ! वसुन्धरे ! देहि मे विवरम्' इत्यादिना वसुन्धरां शरण याचते ।

कुलपते कण्वस्य धर्मपुत्रीत्वेन शकुन्तला सर्वाङ्गीणा शिक्षामधिगत्य महत्कार्य-कौशलमाधत्ते । गीतादिरचनायामपि च नैपुण्य भजते । सखीभ्यामनुरुध्यमाना सा स्वप्रणयिन कृते प्रेमपत्रानुरूप गीत रचयति—

तव न जाने हृदयं मम पुनः कामो दिवाऽपि रात्रावपि ।

निर्घृण ! तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गानि ।। (३१-१३)

तद्गृहकार्यकौशलन्तु गृहस्थानामपि क्रियानैपुण्यमध कुरुते । साऽऽश्रमस्थान् पशुपक्षिण परिपालयति, वनस्पतीन् सम्यक् सिञ्चति, अतिथीन् सत्करोतीतराणि च गृहकार्याणि सम्पादयति । तदीय कार्यदाक्ष्यवनेनैवानुमातु शक्यते यन्महर्षिकण्व आश्रमागतानामतिथीना सत्कारस्य भार वोढु तामेव नियोजयति । वैखानसो राजान विज्ञापयति—

"इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूल शमयितुं सोमतीर्थ गत." । (प्र० अं०)

धर्मपितु कण्वस्य शकुन्तलाऽतीव स्नेहभाजनम् । तृतीयेऽङ्के शकुन्तलागत-मस्वास्थ्यवृत्तं विज्ञाय शिष्यो वदति—

"सा खलु भगवत कण्वस्य कुलपतेरुच्छ्वसितम्" । (तृ० अ)

पित्रनुमतिमन्तराऽपि जायमानगान्धर्वविवाहस्य "दिष्ट्याधूमाकुलितदृष्टेरपि यज-मानस्य पावक एवाहुति पतिता" 'सुशिष्यपरिदत्ता विद्येवाशोचनीया सवृत्ते'त्यादिना तत्कृतसमर्थनं साधयति यत् स पुत्रीस्नेहेन कीदृशं कोमलत्व गतो विद्यते । धर्मपुत्री शकुन्तलैवेतादृश सामर्थ्य याति येन सर्वतो वीतरागो वनवासी सन्नपि स साधारणजन इव तनयाविश्लेषजनितदु खेनानुपमा विह्वलतां कातरताञ्चाधिगच्छति—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ।। (४-६)

कथनेऽस्मिन् धर्मपितु कण्वस्य तनूजावियोगोपजातव्यथा वाचालता गता सती समस्तजडचेतनान् व्यथयति ।

स्वधर्मपितेव शकुन्तलाऽपि नितरा भावप्रवणाऽस्ति । पतिगृहप्रस्थानकाले सा सुतरामधीरा सती विलपति—

"(पितरमाश्लिष्य) कथमिदानी तातस्याङ्कात् परिभ्रष्टा मलयतटोन्मूलिता चन्दन-लतेव देशान्तरे जीवित धारयिष्यामि" । (च० अ०)

तप कृशशरीरस्य स्वपितु स्वास्थ्यचिन्ता ता पीडयति पितर सान्त्वयन्ती सा वदति—

"तपश्चरणपीडित तातशरीरम् । तन्मातिमात्र मम कृत उत्कण्ठस्व" । (च० अं०, पृ० २१७)

आदर्शभूत सख्यभावमादधत्या तस्या तत्सम्बन्धिन सर्वे गुणा भ्राजन्ते । द्वाभ्या स्वसखीभ्यां प्रियवदाऽनसूयाभ्यां सा यादृशं सख्य निर्वाहयति तत्त्वन्यत्र नितान्त दुर्लभम् । सुखदु खसङ्गिन्यौ स्वसख्यौ प्रति स्वमनोगतभावमपि गोपयितु न समीहते । पतिगृहगमनवेलाया स्वसखीद्वितयमपि नेतु कामयते—"तात इत एव कि प्रियवदाऽनसूये सख्यौ निवर्तिष्येते" । (च० अं०)

परन्तु तातकण्वस्तयो कौमार्यावस्था मनसि निधाय तदनुनय न मनुते—

'वत्से ! इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति" । (च० अं०)

शकुन्तलाया सर्वाधिकमहत्त्वमापन्नो गुणोऽस्ति तत्प्रकृतिप्रेम । आजन्मतो विवाहं यावत् तज्जीवनं प्रकृतेः सुरम्ये क्रोडे व्यतीतमतः सा तया सहेदृश तादात्म्य गता यत् प्रकृतेः पृथक्कृत्य तच्चरित्राकलन नितरामसम्भवम् । नाटकस्य प्रथमेऽङ्के सा सर्वप्रथमं वृक्षादिसेवनतत्परैवास्माकं नयनगोचरता याति । तपोवनगतान् वनस्पतीन् प्रति तस्याः सोदरस्नेह. । तेषा सेवन सा 'आज्ञा गुरूणामविचारणीये'ति दृष्टचैव न विदधात्यपि तु तान् भातृस्नेहवशादेव सेवते । उक्ततथ्यं प्रकटयन्ती साऽनसूयां प्रति वदति—

"न केवलं ततनियोग एव । अस्ति मे सोदरस्नेहोऽप्येतेषु" । (प्र० अं०)

सा वृक्षेषु भ्रातृवत् लतासु च भगिनीवत् स्निह्यति। तारुण्योपपन्न वृक्षलतादिक दाम्पत्यसम्बन्धेन बध्नाति। चेत्काचिल्लतावधू स्वयमेव वररूप वृक्ष वृणोति तदा ता सोत्सव सत्करोति। सा वृक्षादिसेचनमन्तरा जल न पिबति। प्रियमण्डना सत्यपि वृक्षादिभ्यो नवकिसलयान् नादत्ते। तेषु सर्वप्रथमपुष्पोद्भवकाले समुत्सव विधत्ते। एतदेव कारण येन महर्षिकण्व शकुन्तलाप्रस्थानाय तपोवनतरूणामनुज्ञा याचते—

पातुं न प्रथमं व्यवस्यति जलं युस्मास्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।। (शा०,४-९)

सा सदा मृगादिसेवनपरैव जीवन यापयति। यस्य पुत्रकृतकस्य मृगस्य मुखे तयेङ्गुदीनां तैल न्यषिच्यत, अपि तु य खलु श्यामाकमुष्टिभि परिवर्धित स एव दीर्घापाङ्गनामको मृगो विरहकातर. सन् तस्या मार्गमवरुणद्धि। कण्वो वदति—

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवी मृगस्ते।। (४-१४)

मातृविहीनं तं मृगं सा कथमपि सान्त्वयित्वा तमाश्रमम्प्रति निवर्तयति—

'वत्स कि सहवासपरित्यागिनी मामनुसरसि? अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहित त्वां तातश्चिन्तयिष्यति। निवर्तस्व तावत्"। (च० अ)

उटजसमीपे सदा विचरणशीला गर्भमन्थरा मृगवधू प्रस्थानकाले तस्या विस्मृतिपथं नायाति। सुखप्रसवायास्तस्या वार्ता प्रेषयितु पितरं निवेदयति—

"तात। एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदाऽनघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितकं विसर्जयिष्यथ। (च० अं०)

वृक्षलतादिसेचनसमये केसरवृक्षस्तां पल्लवाङ्गुलिभिराह्वयति। सा स्वयमेव कथयति—

"(अग्रतोऽवलोक्य) एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षक."। (प्र०अ०)

स्वकृतनामधेयाया· सहकारवध्वा वनज्योत्स्नाया विस्मरणं साऽऽत्मविस्मरण-मिव मनुते। यदाऽनसूया ब्रवीति 'यदेना (वनज्योत्स्ना) विस्मृतासि, तदा सा (शकुन्तला) प्रतिब्रवीति—"तदात्मानमपि विस्मरिष्यामि"। (प्र० अं०)

प्रस्थानकाले 'तात ! लताभगिनी वनज्योत्स्ना तावदामन्त्रयिष्ये'—इत्युक्ते तया तातकण्वो ब्रूते—'अवैमि ते तस्या सोदर्यास्नेहम्। इय तावद् दक्षिणेन' तदनन्तर सा शाखाबाहुनिबद्धा सती ता तथैवालिङ्गति यथा नववध्व पतिगृहगमनवेलाया स्वमात्रादिक मिलन्ति—

"वनज्योत्स्ने ! चूतसङ्गताऽपि मा प्रत्यालिङ्गेतोद्गताभि शाखाबाहुभि । अद्यप्रभृति दूरवर्तिनी ते खलु भविष्यामि" । (च० अ०)

प्रकृतिसेवा शकुन्तलाया दैनन्दिनव्रतमिव जात परिलक्ष्यते। वृक्षा , लता , पशव , पक्षिण सर्वे तया सहात्यन्त तादात्म्यमवाप्याभिन्नता याता । समेऽपि ते तन्मयतादात्म्यतन्तुना निबद्धा इव प्रतिभान्ति। दशायामस्या वक्तुमिदमशक्यमेव यत् "प्रकृति शकुन्तलाया अभिन्नमङ्गमथवा शकुन्तला प्रकृते?" अत प्रकृतिपेलवा शकुन्तला चेदालोचकैर्निसर्गकन्येत्युपाधिना विभूषिता तर्हि न किमप्याश्चर्यम् । आश्रमपरिवारसदस्यता गतेषु समेषु चराचरेषु शकुन्तलाया. सौप्रस्थानिके काले चेद् वनस्पतयस्ता विभूषयितु माङ्गलिकांशुकानि, लाक्षारसान् नवकिसलयनिभान्याभरणानि च ददति तत्तु तेषा दायित्वमेव—

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्च्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि नः किसलयोद्भेदप्रतिद्वन्द्विभिः ।। (शा०,४।५)

कोऽस्त्येतादृशोऽभिभावको य. पतिगृहगमनशुभवेलाया स्वतनूजा नालङ्कर्तु वाञ्छति? चेन्मृग्यो ग्रासचर्वणव्यापारान्निवृत्ता , मयूरा नर्तनकर्मणो विरता , लता पीतपत्ररूपाश्रुप्रवाहकर्मणि व्यापृता:—

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्राणि मुञ्चन्त्यश्रूणीव लताः ।। (४-१२)

तत्तु सर्व तद्व्यथाया आख्यानम्। न सन्तीदृशा भ्रातरो भगिन्यो वा या स्व-भगिनीप्रस्थानकाले विरहव्यथया व्यथिता न भवन्ति? एतत्सर्वं निसर्गकन्याया शकुन्तलाया निसर्गम्प्रति तस्या नैसर्गिकप्रेम्ण एव महिमा।

कालिदासकाव्यकलाकलिता कण्वकन्यकेयं नूनमेव युगयुगान्तर यावत् सहृदयचित्तचञ्चरीकमामोदयन्ती स्थास्यतीत्यत्र न सन्देहलेश इति।

●●

संस्कृतकाव्यालङ्कारशास्त्रे काव्यस्वरूपविमर्शः

सस्कृतकाव्यसृष्टिपरम्परेव सस्कृतालङ्कारशास्त्रपरम्पराऽपि नितरा प्राचीना। काव्यतत्त्वानुशीलनपरैराचार्यै काव्यस्वरूप-हेतु-प्रयोजन-रस-गुणालङ्कार-दोषादिविषये महच्चिन्तन कृतम्। सस्कृतकाव्यालङ्कारशास्त्रपरम्परावैशद्यस्यानुमानमनेनैव कर्त्तु शक्यते यत्तस्मिन् काव्यात्मतत्त्वविचारप्रसङ्गे रसं ध्वनि रीति (गुण) वक्रोक्तिमलङ्कारमौचित्यञ्चाश्रित्य षट् साहित्यिकसम्प्रदाया अपि दृष्टिपथमागता —

रससम्प्रदाय ,
ध्वनिसम्प्रदाय ,
अलङ्कारसम्प्रदाय.,
रीति(गुण)सम्प्रदायः,
वक्रोक्तिसम्प्रदाय.,
औचित्यसम्प्रदायश्च ।

समेषामाचार्याणा काव्यस्वरूपादिचिन्तने तदीयकाव्यगतमान्यतादर्शनञ्जायते। काव्यस्वरूपविषये तु तेषां विश्लेषण नितान्तं भव्य गम्भीरञ्चास्ति। एतत्तथ्यं काव्यस्वरूपगतचिन्तनप्रसङ्गे समक्षमायाति समेषा यत्केषाञ्चिदाचार्याणा काव्यस्वरूपचिन्तनपरा दृष्टिर्नितरा सूक्ष्मरूपस्य ख्यापिका। एतद्विपरीत केषाञ्चिद् दृष्टिर्न तथा सूक्ष्मरूपदर्शिनी। प्रस्तुते निबन्धे 'अलङ्कारशास्त्रे काव्यस्वरूपविमर्शाभिधाने' संस्कृतालङ्कारशास्त्रस्य प्राय सर्वेषामाचार्याणां काव्यस्वरूपनिर्धारणविषयकमनुचिन्तन समक्षमानीतम्। अग्निपुराणादारभ्य पण्डितराजजगन्नाथं यावत् प्रायः सर्वेषामाचार्याणां काव्यलक्षण प्रदर्शितमस्मिन्निबन्धे तथा तद्युक्तायुक्तत्वमपि विचारितम्। अन्ते सर्वाणि काव्यलक्षणनि दृष्टिगतानि विधाय निष्कर्षरूपेणापि किञ्चिद् विमर्शितम्।

अग्निपुराणे काव्यस्वरूपं समासत इत्थं प्रतिपादितम्—

सङ्क्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली ।
काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्[१] ।।

अग्निपुराणकारमतस्यायं भाव -वर्णवृन्दैः सुबन्तं तिडन्तं पदं भवति। वाक्यं पदावलीरूपं जायते। वाक्यगता पदावली चेष्टार्थसंवलिता। ईदृक्पदावलीसंयुतं कवि-

---

१ अग्निपुराणे, १७४-६-७।

निर्मित वाक्य गुणसहित दोषविरहित सदेव काव्यमित्युच्यते। इत्थमग्निपुराणगत लक्षणमिद शब्दविशेष्यमिति वक्तु युक्तम्। तन्मतेऽभीष्टार्थयुक्ता गुणसहिता दोषरहिता पदावल्येव काव्यपदभाग् भवति।

नाट्यविषयकसर्वतत्त्वप्रतिपादके प्राचीनतमे भरतमुनिप्रणीते नाट्यशास्त्रे प्रत्यक्षत काव्यस्वरूप नोद्घाटितम्। तत्र रसगुणालङ्कारादीन। विवेचना विशदरूपेण कृता दृश्यते। 'नहि रसादृते कश्चिदर्थ प्रवर्तते' इत्यादितद्वचनै सिद्ध्यति यद् भरतमुनि काव्यमात्रे रसस्य प्राधान्यमङ्गीकुरुते। नाट्यशास्त्राचार्यस्य भरतस्याधोवचनानि दृश्यरूपस्य काव्यस्यानन्दकरार्थपरशब्दमयत्व सूचयन्ति—

शब्दानुदारमधुरान् प्रमदाभिधेयान्
नाट्याश्रयासु कृतिषु प्रयत्नेन कर्त्तुम्।
तैर्भूषिता बहु विभान्ति हि काव्यबन्धाः[१]।।

सस्कृतालङ्कारशास्त्राचार्याणा मध्ये भामह एतादृग् आचार्यो येन सर्वप्रथम स्पष्टत शब्दार्थस्वरूपं काव्यलक्षण प्रतिपादित काव्यमर्मजिज्ञासूना समक्षम्। तत्कृतमतिसङ्क्षिप्त काव्यस्वरूपमिदमस्ति—

शब्दार्थौ सहितौ काव्यम्[२]।

लक्षणस्यैतस्य विषय आपत्तय आपतन्ति—'तत्काव्यलक्षणे विशेष्यभूतस्य 'शब्दार्थौ' इति पदस्य विशेषणभूतस्य 'सहितौ' इति पदस्य व्याख्यान न जातम्। चेद् भामह शब्दार्थयो सहभावमेव काव्यत्वेन मन्यते, तर्हि समस्त खलु वाङ्मय काव्यत्वेन स्वीक्रियेत। यतो हि सर्वत्र शब्दार्थयो सहावस्थितिर्विभाति। स्पष्टमेव यद् भामहोक्ते काव्यलक्षणे काव्यव्यवच्छेदका अर्था न निर्दिष्टा.।

सन्दर्भेऽस्मिन् भामहकालिकी काव्यत्वविषयिणी परिस्थितिरवश्यमेव दृग्गता करणीया। भामहसमक्ष पूर्ववर्तिनामलङ्कारशास्त्राचार्याणा काव्यस्वरूपविषये विचारसरणिद्वयमासीत्। केषाञ्चिदाचार्याणा मतेऽर्थालङ्कारा एव काव्यसौन्दर्यमूलत्वेन राजन्ते पुनरपरेषा मते शब्दालङ्कारा एव काव्यत्वाधाररूपा। भामहेन स्वयमेव तथ्यमुक्त प्रकाशित स्वीयग्रन्थे[३]। तस्याभिमते काव्ये यथा शब्दालङ्कारोऽभीष्टस्तथैवार्थालङ्कारोऽपि—

शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः[४]।

अर्थालङ्कारवादिभि· काव्यचारुत्वजननेऽर्थालङ्काराणा तथा शब्दालङ्कारवादिभि शब्दालङ्काराणां महती भूमिकाऽङ्गीकृता। मान्यताद्वयमेतन्नूनमतिवादरञ्जितमिति मत्वा

---

१ ना० शा०। ११७-११९। २ काव्यालङ्कारे १-१६।
३ काव्यालङ्कारे १।१३-१६। ४ काव्या०,१-१६।

भामहेनोभावलङ्कारौ (शब्दालङ्कार अर्थालङ्कारश्च) वाञ्छितौ काव्यशोभावर्धनाय। यतो हि काव्ये यथा शब्दविशेषस्तथैवार्थविशेषोऽपि काङ्क्षितौ। भामहस्य काव्यस्वरूपप्रतिपादनप्रयासोऽयं काव्ये शब्दार्थयोरुभयोरपि सहभावत्वस्वीकरणेन महत्त्वमावहति।

आचार्यदण्डिना काव्यादर्शनाम्नि स्वालङ्कारशास्त्रीयग्रन्थे न प्रस्तुत विशद काव्य-लक्षण परन्तु काव्यस्वरूप बोधयितुमवश्यमेव प्रयतितमिति वक्तु शक्यते—

शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली[1]।

उक्तस्याभिप्रायो विद्यते यन्मनोहरार्थेन सयुक्ता पदावली (शब्दसमूह) काव्य-शरीरमित्यभिधीयते। यद्यपि दण्डिमहाभागेनोक्तरीत्या काव्यस्य शरीरमेव प्रकाशितमतो वक्तु पार्यते यद् दण्डिप्रतिपादितमिद काव्यलक्षण सङ्कीर्ण विद्यते, परन्तु गम्भीरविवेचनेन याति स्फुटतामिद यद् दण्डिन काव्यलक्षणे भामहकाव्यलक्षणापेक्षयाऽधिक स्पष्टता दृश्यते। भामहमते काव्ये शब्दालङ्कारार्थलङ्कारयोरुभयोरपि विद्यमानताऽपेक्ष्यते परन्तु दण्डिमतेऽर्थालङ्कारस्योपस्थितिस्तत्र वाञ्छनीया। अग्राम्यतानामकगुणालङ्कारविवेचनसन्दर्भे तेन स्वाभिमतमद प्रकाश्यते यत्काव्ये समेऽप्यलङ्कारा अर्थे रस सञ्चारयन्ति—

कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति[2]।

काव्यालङ्कारसूत्रकृता वामनेन यद्यपि काव्यस्वरूपविषये स्पष्ट न किमपि निग-दितं तथापि रीतिविवेचने तदीये तद् (काव्यस्वरूप काव्यलक्षण वा) आभासते। रीतिं काव्यस्यात्मतत्त्वेन मन्यमानस्य तस्याधस्तनोक्तिर्नून ध्येया काव्यस्वरूपविवेचनसन्दर्भे—

'काव्यं ग्राह्यमलङ्कारात्' ।।१।।

'काव्यं खलु ग्राह्यमुपादेय भवति, अलङ्कारात्। काव्यशब्दोऽयं गुणालङ्कार-सस्कृतयो शब्दार्थयोर्वर्तते। भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते'[3]।

अर्थाद् अलङ्कारकारणादेव काव्य ग्राह्यं भवति। अलङ्कारस्तु सौन्दर्यरूपमेव। काव्यगत सौन्दर्यमिदं दोषत्यागाद् गुणग्रहणाच्च जायते। वस्तुतो गुणालङ्कारविशिष्टौ शब्दार्थावेव काव्यत्वेनाभिधीयेते। शब्दार्थमात्रस्य काव्यसज्ञा तु गुणवृत्त्यैव बोध्या। प्रकारान्तरेण वामनद्वारा गुणालङ्कारविरहितयो शब्दार्थयो काव्यत्व खण्डितम्। काव्यस्वरूपविषयक (अर्थात् काव्यलक्षणं) समासत इत्थ वक्तु युज्यते—

सौन्दर्यमयौ शब्दार्थावेव काव्यपदभाजौ भवत। नि सन्दिग्ध काव्यसौन्दर्यरूपतया काव्यरहस्योपस्थापन वामनस्य महत्युपलब्धि।

१ काव्यादर्श, १-१० उ०। २ काव्यादर्श, १/६२ पू०।
३ काव्यालङ्कारसूत्राणि, १-१ वृत्ति।

विवेचनसन्दर्भेऽस्मिन् वामनस्यैकमपर वैशिष्ट्यमवश्यमेव दृक्पथ नेयम्। तदस्ति गुणालङ्कारयोर्भेदनिर्धारणम्। तदनुसार गुणा काव्यशोभाकर्त्तारो धर्मा अलङ्कारास्तु गुणजनितकाव्यशोभावर्धका धर्माश्च सन्ति —

काव्यशोभायाः कर्त्तारो धर्मा गुणाः।

तदतिशयहेतवस्त्वलङ्काराः[१] ।।

तन्मतानुसार गुणा काव्यस्यानिवार्यतत्त्वरूपेण तथाऽलङ्कारा अनित्यधर्मत्वेन मन्यन्ते। अनेनापातत सिद्ध्यति यत् काव्ये गुणानामुपस्थितिरपरिहार्या तथाऽलङ्काराणा नापरिहार्या। यद्यपि काव्यस्वरूपनिर्धारकं वामनमत न सर्वथा दोषरहित सर्वाङ्गपूर्ण वा तथापि काव्यस्वरूपचिन्तनपरम्परा तेनाग्रे कृतेत्यत्र न काचिद्विप्रतिपत्ति·।

आचार्यरुद्रटस्य काव्यलक्षणगतं मत भामहानुसारि। तेन स्वीये काव्यालङ्काराभिधाने ग्रन्थे काव्यलक्षणमेव समुपस्थापितम्—

ननु शब्दार्थौ काव्यम्[२]।

रुद्रटमते शब्दश्च अर्थश्च (उभावपि) काव्यत्वेनाभिधीयेते। तत्र द्वयोर्ग्रहणे कि कारणमिति बिन्दुं दृष्टिपथं नीत्वा नेमिसाधु स्वटीकाया स्पष्टयति—

'शब्दश्चार्थश्च तौ काव्यमुच्यते। कवे कर्माभिप्रायो वेति शब्दार्थ। कवे काव्योपयोगिनो शब्दार्थयोरन्योन्याव्यभिचारादेकतरोपादानेनैव द्वितीये लब्धे द्वितीयोपादान काव्ये द्वयस्यापि प्राधान्यख्यापनार्थम्। अन्यथा हि शब्दार्थयोरेकतरोपादानेऽन्यतरस्यालङ्कारैर्विरहितमपि दोषैश्च युक्तमपि काव्य साधु स्यात्। अद्वयोपादाने न तुल्यकक्षतया शब्दार्थौ द्वावपि काव्यत्वेनाङ्गीकृतौ भवत·। द्वयमेतत्समुदितमेव काव्य भवतीति तात्पर्यम्'[३]।

अस्यायं भाव । काव्ये शब्दार्थयोर्द्वयोरेव प्राधान्यं भवति न पुनरेकस्य। शब्दार्थौ समुदितरूपेणैव काव्यपदवी यात इति निर्गलितोऽर्थ । द्वयोः प्राधान्य मनसि निधायैव लक्षणे द्वयोर्ग्रहणं कृतम्।

काव्यलक्षणप्रतिपादनानन्तरं रुद्रटेन 'शब्दस्तावदर्थवान्' इत्युक्त्वा तस्य (शब्दस्य) पञ्चभेदानां वर्णनं विहितम्[४]।

ध्वनिकारानन्दवर्धनेन यद्यपि ध्वन्यालोकाभिधाने निजग्रन्थे काव्यस्य किञ्चिल्लक्षण स्पष्टतो न प्रकाशमानीतं परन्तु ध्वन्यालोकपर्यवेक्षणेन तस्य काव्यस्वरूपसम्बद्ध मतमवगम्यते।

---

१ काव्या०, ३/-१-२।
२ काव्यालङ्कार, २-१।
३ नेमिसाधुटीका तत्रैव।
४ काव्यालङ्कार २।१ उ०।

ध्वन्यभाववादिनां मत पूर्वपक्षतयोपस्थापयता ध्वनिकारेण काव्य शब्दार्थशरीर-मित्युक्तम्। तस्य मते शब्दगता अनुप्रासादयस्तथाऽर्थगता उपमादय क्रमश शब्दमाध्यमेनार्थ-माध्यमेन च काव्यचारुत्वहेतवो भवन्ति—

'शब्दार्थशरीरन्तावत् काव्यम्। शब्दगताश्चारुत्वहेतवोऽनुप्रासादय प्रसिद्धा एव। अर्थगताश्चोपमादय [१]।

अन्यत्र तेनोक्त यत् सहृदयहृदयाह्लादकरौ शब्दार्थौ काव्यत्वेनाभिकाङ्क्ष्येते[२]। अर्थात् सहृदयहृदयाह्लादकरत्वमेव काव्यत्वम्।

'अन्ये ब्रूयुः–सहृदयहृदयाह्लादि शब्दार्थमयत्वमेव काव्यलक्षणम्।'

यद्यपि ध्वनिकारमते ध्वनिरेव काव्यस्यात्मा भवति 'काव्यस्यात्मा ध्वनि'।

तेन सम्पूर्णे ध्वन्यालोके काव्यात्मतत्त्वभूतस्य ध्वने-र्विवेचन साङ्गोपाङ्गरूपेण कृत वर्तते। अधोलिखितानि वचनानि चोक्तमेव तथ्यं प्रकाशयन्ति—

'योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः'।

'काव्यस्यात्मा स एवार्थः'।

तथापि स काव्ये शब्दार्थयोर्महत्त्वमङ्गीकुरुत एव—

'काव्यविशेषो हि विशिष्टार्थप्रतिपत्तिहेतु शब्दसन्दर्भविशेष'। इति।

आचार्यकुन्तको ध्वनिविरोधिनामाचार्याणा शिरःस्थानीयः। वक्रोक्ति काव्यजीवितत्वेन मन्यमानेन तेन काव्यस्वरूपविषये या मीमांसा विहिता सा नितरां महनीया। वक्रोक्तिजीविताभिधाने ग्रन्थे स काव्यस्य सामान्यलक्षणमित्थ प्रस्तौति—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदामाह्लादकारिणि[३]।।

लक्षणस्यास्य सारतत्त्वमेवं वक्तु युक्तम्—सहितभावेन युक्तौ शब्दार्थविव काव्यम्। परन्तु काव्यस्य स्थिति शास्त्रादिभ्य· सर्वथा भिन्ना भवति। तत्र (शास्त्रादिषु) सामान्यत शब्दार्थयो सहावस्थितिर्जायते। एतद्विपरीत विशिष्टकविव्यापारेण शोभिते तथा काव्यतत्त्वाभिज्ञानामानन्ददायके काव्यबन्धे (मनोरमवाक्यविन्यासरूपे) विशेषरूपा सहस्थिति· शब्दार्थयोर्भवति। फलत सम्मिलितयो शब्दार्थयोरेव काव्यत्व सिध्यति। कारिकागतं

---

१ ध्वन्यालोके, प्र० उ० १-वृत्तिभागे। २ ध्वन्यालोक, प्र० उ० कारिका १ वृतिभाग।
३ वक्रोक्तिजीवितम्, १/७।

कुन्तकाभिप्रायमेभिर्वचोभिरपि निगदितु युज्यते—

सहृदयहृदयाह्लादकारिणि वक्रकविव्यापारेण (शास्त्रादिगतप्रसिद्धशब्दार्थोप-निबन्धनाद्भिन्नेन) सुशोभिते वाक्यविन्यासे साहित्ययुक्तौ शब्दार्थौ काव्याभिधान भजत इति।

उक्तकारिकागतानेनाधोलिखितवृत्तिभागेन सिद्धमेतज्जायते यत् सहृदयानन्दकर काव्यत्वं न केवलं शब्दे तिष्ठति न वाऽर्थे। वस्तुत सम्मिलितयोर्द्वयोरेव तस्य सत्ता—

'शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्'[१]।

एतेन केवल शब्देऽर्थे वा काव्यत्ववादिना मत निरस्त भवति—

तेन यत् केषाञ्चित् . निरस्त भवति[२]।

वस्तुत प्रतितिल यथा तैलस्य स्थितिस्तथैव शब्दार्थयोरपि। सरसजनचित्ता-नन्दकरत्वं न पुनरेकस्मिन् (शब्देऽर्थे वा)—

'तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्व वर्तते न पुन रेकस्मिन्'[३]।

यद्यपि लोके वाचकशब्दस्य वाच्यार्थस्य च प्रसिद्धो योगो भवति, परन्तु काव्ये तयोरपूर्वो योगो जायते—

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः[४]।।

काव्ये सरसजनचित्तावर्जकमभीष्टमर्थं बोधयितु शब्दविशेष एव सामर्थ्य याति। अत· कविनेष्टार्थकमनीयमर्थ प्रकाशयितु शब्दविशेष एव प्रयुज्यते—

शब्दो विवक्षितार्थैकोऽन्येषु सत्स्वपि।
अर्थः सहृदयहृदयाह्लादकारिस्वस्पन्दसुन्दरः[५]।।

कविकर्मभूत काव्य कुन्तकमते सालङ्काररूपमेव। अलङ्कार्यभूतस्य शब्दस्यार्थस्य वाऽलङ्कारयुक्तत्व एव काव्यता भवति। अलङ्काराणा पृथक् विवेचन तेषां सम्यग् ज्ञानाय क्रियते—

अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते[६]।

आचार्यक्षेमेन्द्रेण लोकविश्रुते 'औचित्यविचारचर्चा'नाम्नि ग्रन्थे औचित्यमेव काव्यस्य जीवित मन्यते। तेन काव्यस्य स्फुट लक्षण न कृतम्। तस्य स्पष्टं मतमिद

---

१ वक्रोक्तिजीवितम् , १/७ वृत्तिभाग।
२ तदेव, १/७ वृत्तिभाग।
३ तदेव, १/८ वृत्ति।
४ तदेव कारिका, १/८।
५ तदेव, १/९।
६ तदेव, १/६।

यदौचित्यमेव चारुचर्वणाया चमत्कृतिजनक रसजीवितभूतञ्च। स कथयति स्वीयग्रन्थे यच्चेत् काव्ये तज्जीवितभूत तत्त्वमौचित्यं नास्ति तत्र गुणानामलङ्काराणा वा निवेशो निष्फलतामेव याति। तद्विचारे काव्य औचित्याभावेऽलङ्कारा बाह्यशोभाकराणि भूषणान्येव। एवमेव गुणा अपि गुणा एव। वस्तुत शृङ्गारादिना प्रसिद्धस्य काव्यस्य जीवन (प्राणभूतं तत्त्वम्) औचित्यमेव। तद्विना गुणानामलङ्काराणाञ्च तत्र निवेशन न शोभावहम्—

काव्यस्यालङ्कारैः किं मिथ्यागणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न लक्ष्यते।।
अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।
उचितस्थानविन्यासादलङ्कृतिरलङ्कृतिः ।
औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः[1]।।

कारिकागतकाव्यस्येति विशेषणभूतस्य रससिद्धस्येति पदस्य निवेशेनापातत सिद्ध्यति यत् क्षेमेन्द्रेण काव्यस्य रससिद्धतोरीक्रियते तथा पञ्चमकारिकागते वृत्तिभागे 'परस्परोपकारकरुचिरशब्दार्थरूपस्येति कथनेन काव्य एतादृशशब्दार्थाना योगोऽङ्गीक्रियते ये (शब्दा अर्था वा) रुचिरा (मनोरमा) सन्त परस्परोपकारका भवन्ति। काव्यगता अलङ्कारा गुणाश्च तदभिमता एव[2]।

समासतो वक्तु युज्यते यत्तन्मते काव्ये शब्दार्थावुभावापि गुणालङ्काययुक्ताव-पेक्ष्येते। तत्र सहृदयमन प्रीतिकारत्वेन रसस्य तथा काव्यात्मतत्त्वभूतेनौचित्यस्य स्थितिस्तु सर्वाशतो वाञ्छनीयैव।

आचार्यभोजेन सरस्वतीकण्ठाभरणस्य प्रथमे परिच्छेदे काव्यस्य लक्षणमध स्थिताया कारिकायां प्रतिपादितम्—

निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति[3]।।

अर्थात् दोषहीन गुणसमन्वितमलङ्कारविभूषितं तथा रसपेशलं काव्यं विरचयन् कवि· कीर्तिं प्रीतिं (काव्यानन्द) प्राप्नोति।

वस्तुत कारिकायामस्यां भोजराजेन न स्पष्ट काव्यलक्षणं न वा काव्यप्रयोजनं

---

१ औचित्यविचारचर्चा, १/४-६। २ तत्रैव, १/५ वृत्ति।
३ सरस्वतीकण्ठाभरणम्, १/२।

प्रकाशितम्। अस्या पूर्ववर्तिना समकालीनानामाचार्याणा काव्यलक्षणसङ्कलनमेव। उक्ते काव्यलक्षणभूते कथने काव्यस्य कृते विशेषणचतुष्टय प्रयुक्तम् – निर्दोष, गुणवत्, अलङ्कारैरलङ्कृतम्, रसान्वितञ्च। यद्यपि तत्र दण्डिरुद्रटभामहादीना काव्यलक्षणाना प्रभावो दृश्यते, परन्तु 'रसान्वितम्' इति विशेषणेन तन्मतमेतत् प्रतीयते यत्काव्यस्य रसवत्ता तदभिप्रेता। एतत्तथ्य सरस्वतीकण्ठाभरणस्य पञ्चमे परिच्छेदे तदुक्त्याऽपि पुष्टि गच्छति[१]।

ध्वनिप्रस्थापनाचार्यमम्मटेन लोकख्याते स्वकाव्यप्रकाशनामके ग्रन्थे काव्यस्य लक्षणमित्थ प्रतिपादितम्—

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि[२]।

काव्यलक्षणस्यास्यार्थोऽस्ति—अदोषौ (दोषरहितौ), सगुणौ (गुणयुक्तौ), अनलङ्कृती (सर्वत्र सालङ्कारौ यत्र कुत्रचित् स्फुटालङ्काररहितौ) शब्दार्थौ काव्यमिति।

सम्प्रति लक्षणगतपदानां व्याख्यानमपेक्ष्यते। शब्दार्थावित्युक्त्या मम्मटेन काव्यस्य शब्दार्थमयत्वमङ्गीकृतम्। काव्यं पठितं श्रुतं गीत रचितमित्यादिव्यवहारैर्यथा काव्यस्य शब्दमयत्वं सूच्यते तथैव काव्यं बुद्धमित्यादिव्यवहारेण तस्यार्थमयत्वमप्यधिगम्यते। मम्मटद्वारा शब्दार्थयोरुभयो काव्यत्वस्वीकरण नास्ति कश्चिन्नूतन पन्था। भामहादिभिरपि काव्यस्य शब्दार्थमयत्वमङ्गीकृतम्। वस्तुतो मम्मटमतेन रसाङ्गभूतविभावादिसयोजनव्यापारस्यैव प्राधान्यं भवति काव्ये शब्दार्थयोस्तु गौणत्वमेव जायते। तेनोक्त काव्यप्रकाशे—

शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षण यत्काव्यम्[३]।

उक्तलक्षणगतस्य 'शब्दार्थौ' इति विशेष्यपदस्य पण्डितराजजगन्नाथेन रसगङ्गाधरग्रन्थे 'यत्तु प्राञ्चै —शब्दनिष्ठतैवोचिता' इत्यादिवचनै खण्डन कृतम्। तस्य खण्डनमूलकस्य मतस्याय निष्कर्षो यत् काव्यत्व शब्दार्थयोर्न सम्मिलितरूपेण न वा पृथग् रूपेण तिष्ठत्यत काव्यस्य शब्दनिष्ठतैवोचिता रमणीयार्थप्रतिपादक. शब्द काव्यमिति तदीयं काव्यलक्षण तस्योक्तमभिप्रायं प्रकाशयति। रसगङ्गाधरस्य टीकाकर्त्रा नागेशभट्टेन पण्डितराजोक्तमतं खण्डयित्वा मम्मटमतपोषणं कृतम्[४]।

काव्ये दोषे विद्यमाने गुणादीना न किमपि महत्त्वमिति दृष्टिगत विधायैव मम्मटेन काव्यलक्षणे 'अदोषौ' इति विशेषणपदस्य प्राथम्येनोक्तिर्विहिता। तत्पदनिवेशेन मम्मटस्येदमेवाभिमत यत् काव्यत्वविघातकच्युतिसंस्कारादिदोषरहितावेव शब्दार्थौ काव्यपदवीमवाप्तुं सामर्थ्यमित·। ससारे सर्वथा दोषरहितौ शब्दार्थौ दुर्लभावेवेति

---

१ स० क०, ५/४,७।
२ का० प्र०, प्र० उ०।
३ तत्रैव, काव्यलक्षणगता वृत्ति।
४ रसगङ्गाधर, प्र० आ० टीका।

कृत्वा विश्वनाथेन काव्यस्य प्रविरलविषयता निर्विषयता शङ्किता[१] तत्र युक्तम्। मम्मटाभिप्राय दृग्गतं कृत्वा विचारे सति विश्वनाथापत्तेर्निर्मूलतैव सिद्ध्यति।

आचार्यविश्वनाथेन 'सगुणौ' इति लक्षणमयविशेषणपदस्याप्यालोचना विहिता। तत्सम्मतौ रसधर्मत्वेनाङ्गीकृताना गुणाना शब्दार्थयोर्धर्मत्वेनाङ्गीकरण न युक्तम्। मम्मटेन स्वयमेव काव्यप्रकाशे गुणाना रसधर्मत्व—'ये रसस्याङ्गिनो धर्मा इति वचनै· स्वीकृत तथा गुणाना शब्दार्थनिष्ठता' गौणभावेनैव भवतीत्यपि तत्रैवोक्तम्—'गुणवृत्त्या पुनस्तेषा वृत्ति शब्दार्थयोर्मता'[२]। व्याख्यानेनानेन मम्मटमतघोषणन्तथा विश्वनाथमतनिरर्थकत्व स्वत एव जायते।

सम्प्रति लक्षणगतस्य 'अनलङ्कृती पुन क्वापि' इत्यादिपदनिबन्धनस्य विवेक सङ्गत.। मम्मटविचारे 'अनलङ्कृती'ति पदस्या'लङ्कारविहीनावि'ति नार्थ.। मम्मटमते तत्पद ईषदर्थे नञ्प्रयोगस्तथा तत्परिणतिश्चास्फुटत्वे जायते। तन्मते (तत्पदस्य) स्फुटालङ्काररहितावित्येवार्थ। वस्तुतस्तु अनलङ्कृतीति पद न लक्षणघटकमपि तु तत् 'सालङ्कारौ' इति विशेषण ग्राहयति। पुन· क्वापीति पदप्रयोगेणायमभिप्रायोऽभिमतो यत् मम्मटस्य मते सर्वत्र सालङ्कारौ शब्दार्थौ काव्यम्। कुत्रचित् रसादिप्रतीतौ स्फुटालङ्काररहित्येऽपि काव्यत्वं भवत्येव। सन्दर्भेऽस्मिन् निम्नाङ्किता वृत्तिगतोक्ति ध्येया—

'क्वापीत्यनेनैतदाह सर्वत्र सालङ्कारौ क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्व-हानि.'[३]।

अनेन सिद्धमिद भवति यन्मम्मटेन काव्येऽलङ्काराणा महत्त्व स्वीकुर्वताऽपि तत्र तद्गौणत्वमेव मन्यते।

मम्मटलक्षणमिद समाश्रित्य वक्तुमिदं सङ्गत यन्मम्मटेन स्वपूर्ववर्तिना समेषा-माचार्याणां काव्यलक्षणानि, काव्यजगतो वास्तविकं तथ्यञ्च दृग्गत विधायैव स्वध्वनि-वादिसिद्धान्तानुसार स्वकाव्यलक्षणं प्रस्तुतम्। मम्मटस्य लक्षणमिदं सर्वाङ्गपूर्णता गतं विद्यते यस्मिन् गुणालङ्कारोक्तिवैचित्र्यरसाध्वन्यादीना सङ्ग्रहण जातम्। नून तस्मिन् काव्यलक्षणे पूर्ववर्तिकाव्यलक्षणानां समन्वय।

आचार्यहेमचन्द्रेण काव्यानुशासने काव्यस्य लक्षण (स्वरूप) प्रतिपादितमधोरीत्या—

अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्[४]।

---

१ काव्यप्र०, अ० उ० वृत्ति। २ सा० द०, का० प्र०, अ० उ०।
३ का० प्र०, काव्यलक्षणम्। ४ काव्यानुशासनम्, पृष्ठ-१९ (प्र० अ०)।

मम्मटकृतकाव्यलक्षणवदस्मिन् काव्यलक्षणेऽपि विशेष्यभूतस्य शब्दार्थावितिपदस्य त्रीणि विशेषणानि निविष्टानि तत्र अदोषौ, सगुणौ, सालङ्कारौ च। द्वयोर्लक्षणयोरय भेदो यन्मम्मटकाव्यलक्षणे 'सालङ्कारौ' इति विशेषणस्थाने 'अनलङ्कृती पुन क्वापि' इति पद निवेशितम्। तत्र 'सालङ्कारौ' इति पदमध्याह्रियते। मम्मटेन विशेषपरिस्थित्यामनलङ्कृतयोरपि (स्फुटालङ्कारविरहितयोरपि) शब्दार्थयो काव्यत्वमङ्गीकृतम्। तथैव हेमचन्द्रोऽपि क्वचित् तदभावेऽपि (अलङ्काराभावेऽपि) तयो काव्यत्वमङ्गीकुरुते। तेनोक्त तत्रसङ्गे—

'चकारो निरलङ्कारयोरपि शब्दार्थयो क्वचित् काव्यत्वख्यापनार्थ [१]।

उक्त्याऽनया रत्नापणटीकाकारेणायमभिप्रायो गृह्यते यद् हेमचन्द्रमते गुणानामवस्थितिरपरिहार्या काव्ये। तथा तन्यतेऽनलङ्कृतमपि काव्य स्वदते—

'निरलङ्कारयोरपीति पदेन काव्ये गुणानामवश्यम्भावमाह—'तथा हि—अनलङ्कृतमपि काव्य स्वदते'[२]।

आचार्यवाग्भटाचार्येण वाग्भटालङ्काराभिधाने ग्रन्थे सङ्क्षेपेण काव्यस्वरूपमधोरीत्याऽभिहितम्—

'गुणालङ्काररीतिरसोपेतः साधुशब्दार्थसन्दर्भः काव्यम्'[३]।

लक्षणेऽस्मिन् काव्येति पदेन शब्दार्थयोरुभयोरपि ग्रहणमभीष्टम्। वाग्भटाचार्यमते तयो (शब्दाथयो) गुणालङ्काररीतिरसाना सयुक्तताऽभिवाञ्छित विद्यते। लक्षणगतसाधु—इति शब्देन तयो (शब्दार्थयो.) साधुत्वमपि वाञ्छितम्। रसगुणालङ्काराणाञ्चान्यकाव्यलक्षणे — षूल्लेखो जात, परन्तु रीते सर्वत्र नोल्लेख। जयदेवप्रभृतिभिस्तदुल्लेख कृत। वामनाचार्येण तु रीतिमहत्त्वमाकलय्य सा (रीति) काव्यात्मभूतत्वेनाभिमता।

पीयूषवर्षेण जयदेवेन चन्द्रालोकस्य प्रथममयूखे काव्यस्वरूपमेवं प्रतिपादितम्—

निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्[४]।।

एतस्मिन् काव्यलक्षणे 'वाक्' इति पद विशेष्यभूत तथेतरपदानि निर्दोषादीनि तद्विशेषणानि। इत्थ जयदेवाभिमते सा वाक् (शब्द) काव्यमित्याख्या भजते या निर्दोषा (दोषसामान्यरहिता), लक्षणवती (अक्षरसंहतिप्रभृतिलक्षणसहिता), सरीति (पाञ्चालीलाटीप्रभृतिरीतिसहिता), गुणभूषणा (श्लेषादिगुणभूषिता), सालङ्कारा (उप-

---

१ काव्या०, काव्यलक्षणगतो वृत्तिभाग, पृष्ठ-१९। २ तत्रैव रत्नापणा टीका।
३ तत्रैव। ४ चन्द्रलोक, १/७।

माद्यलङ्कारालङ्कृता) सरसा (शृङ्गारादिरसयुता) अनेकवृति (कैशिकीप्रभृतिभिर्वृत्तिभि-रथवाऽभिधादिवृतिभि सयुता) च भवति।

जयदेवमत उक्तधर्मविशिष्टशब्दनिष्ठमेव काव्यत्वम्। तल्लक्षणे निर्दोषेति पदबलात् सार्थकपदाध्याहारो भवति। जयदेवेन काव्यलक्षणकथनानन्तरमाचार्यमम्मटा-भिहितकाव्यलक्षणगतमनलङ्कृतीति पद दूषितम्। स खलु काव्येऽलङ्कारस्यापरिहार्या स्थितिमुरीकुरुते। तद्विचारे लोके यथाऽग्नेरनुष्णता समर्थयन् जनो परिहासितो भवति तथैवालङ्काररहितयो शब्दार्थयो काव्यत्व मन्यमाना (मम्मटप्रभृतय) हास्यास्पदता यान्ति।

मम्मटमतमनुसरता वाग्भटेन काव्यस्यादो लक्षण प्रस्तुतम्—

'शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम्'।

लक्षणेऽस्मिन् शब्दार्थयोरुभयोरपि काव्यत्वमुरीकृत न कस्यचिदेकस्य शब्दस्यार्थस्य वा। विशेष्यभूतस्य 'शब्दार्थौ' इति पदस्य विशेषणतया मम्मटलक्षणवत् त्रीणि पदानि निविष्टानि काव्यलक्षणे—निर्दोषौ, सगुणौ, सालङ्कारौ च। अत्र भेदोऽयम्। एतस्मिन् लक्षणे मम्मटकाव्यलक्षणनिविष्टस्य 'अनलङ्कृती पुन क्वापि' इति पदस्य स्थाने 'प्राय सालङ्कारौ' इति विशेषणं योजितम्। उभयोरभिप्रायस्तु समान एव।

आचार्यविद्यानाथेन प्रतापरुद्रीयेऽभिहित काव्यलक्षणमिदमस्ति—

'गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ'[१]।

लक्षणमेतन्मम्मटानुसारि स्पष्टमेवैतत्।

शब्दार्थयोरुभयोरेव काव्यत्वं स्वीकुर्वता विद्याधरेणोक्तम्—

'शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभिधायि ध्वनिः'[२]।

मतस्यास्याभिप्रायत्वेन वक्तु युज्यते समासतो यत् काव्यस्य शरीर शब्दार्थौ तथाऽऽत्मा ध्वनि।

आचार्यविश्वनाथस्य नाम सस्कृतालङ्कारशास्त्रे सादर गृह्यते। साहित्यदर्पणाभि-धानस्तदीयोऽलङ्कारशास्त्रीयो ग्रन्थो लोकविश्रुतिगतो विद्यते। साहित्यदर्पणे तेन न केवलं बहुचर्चित काव्यलक्षणं प्रतिपादितमपि तु मम्मटादीना काव्यलक्षणेषु (काव्यसिद्धान्तेषु) दोषमुद्भाव्य तत्खण्डनमपि विहितम्। साहित्यदर्पणे काव्यलक्षणप्रतिपादनात् प्राग् आचार्यविश्वनाथेनोक्तं यत् काव्यमेतादृशं साधनं येनाल्पबुद्धीनामपि मानवानां सुखेन (कष्टमन्तरा) धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयस्यावाप्तिर्जायते—

---

१ प्रतापरुद्रीयम्। २ एकावली १/१३।

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते[१] ।।

विश्वनाथसम्मतं काव्यस्वरूपमिदमस्ति—

वाक्यं रसात्मकं काव्यम्[२] ।

अर्थात् रसात्मक वाक्यं काव्यं भवति । अत्र रसात्मकेति पदस्य भाव प्रकाशयता विश्वनाथेनोक्तम्—

'रस एवात्मा साररूपतया जीवनाधायको यस्य तेन विना तस्य काव्यत्वानङ्गीकारात्'[३] ।

उक्तेरस्यायमभिप्रायो विद्यते यत् काव्यस्यात्मभूत तत्त्वं रस एव । यतो हि तद्विना (रसं विना) तस्य (काव्यस्य) यथार्थस्वरूप कल्पयितु न शक्यते । विश्वनाथसमक्ष रसं काव्यात्मतत्त्वेन मन्यमानानामाचार्याणां महती परम्पराऽऽसीत् । अग्निपुराणकारेण बहुकालपूर्वमेवोद्घोषितमासीत्—

'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' ।

आचार्यभरतस्य सम्मतौ काव्ये रसमन्तरा न कोऽप्यर्थ प्रवर्तते—

न हि रसादृते कश्चिदर्थः प्रवर्त[४] ।

अत्र नूनमवधेयं यद्विश्वनाथेन ध्वनिकारादिभिर्निर्धारिते वस्त्वलङ्काररसरूपे त्रिविधे ध्वनौ रसध्वनिमेव काव्यात्मतत्त्वेन स्वीकृत्य स्वीयकाव्यलक्षणमेतत्प्रतिपादितम् ।

एतदपि बोध्यमत्र यद् विश्वनाथेन काव्यगतरसेति पदेन केवल शृङ्गारादीनां रसानामेव न ग्रहणं क्रियतेऽपि त्वास्वादविषयभूतानां समेषां भावरसाभासभावाभासादीनामपि रसेन साक ग्रहणं विधीयते । तेनोक्त काव्यलक्षणप्रतिपादनावसरे—

'रस्यते इति रस ' इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते[५] ।

अतो रसान्वितं रसप्रधानं वा वाक्यं काव्यमिति विश्वनाथसम्मतकाव्यलक्षणस्य निष्कर्ष· ।

विश्वनाथप्रोक्तकाव्यलक्षणमिदं पण्डितराजेन खण्डितमधोवचनै —

'यत्तु रसवदेव . अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वादिति दिक्[६] ।

---

१ सा० द०, १/२ । २ तत्रैव ।
३ तत्रैव । ४ तत्रैव ।
५ तत्रैव । ६ रसगङ्गाधर , प्रथमाननम्, पृ०-४४ ।

पण्डितराजस्य विश्वनाथकृतकाव्यलक्षणखण्डनपरस्य विचारस्याय सङ्क्षेपः — विश्वनाथोक्तकाव्यलक्षण न युक्तिसङ्गतम्। तन्मतानुसारं यदि रसप्रधानरचनाया एव काव्यत्वमङ्गीक्रियेत तदा वस्त्वलङ्कारध्वनिमूलकरचनाया काव्यत्व कथङ्कार स्यात्? काव्यजगद् वस्त्वलङ्कारप्रधानरचनाभिरप्यभिव्यापृतमस्ति। विश्वनाथमत दृग्गत विधाय तासा रचनाना काव्यत्वाङ्गीकरणे कि बाधो न स्यात्? सस्कृतसाहित्ये नैकरचना जलप्रवाहवेगनिपतनोत्पतनभ्रमणमूला राजन्ते, बह्वीसु (रचनासु) कपिबालादिविलसितानि वर्णितानि शोभन्ते, यत्र रसस्य नास्ति स्थिति । कि तासामकाव्यत्व युक्त स्यात्? तत्र सर्वत्र परम्परया रसत्वस्वीकारे तु 'गौश्चलति' 'मृगो धावति' इत्यादिस्थलेष्वपि काव्यत्वापत्ति स्यात्।

वस्तुतो विश्वनाथकाव्यलक्षणमेतन्नास्ति बौद्धिकमपि तु भावपरकम्। अस्मिन् सङ्कीर्णता परिदृश्यते। लक्षणेनानेन काव्यस्य सर्वाङ्गस्वरूप न गोचरीकर्त्तु शक्यते। ध्वनिकारप्रस्थापित ध्वनित्रितयं (रसध्वनिं, वस्तुध्वनिमलङ्कारध्वनिञ्च) समर्थयताऽपि तेन कथमीदृक् काव्यलक्षण विहितमिति चिन्त्यमेव।

पण्डितराजजगन्नाथेन रसगङ्गाधरस्य प्रथमानने काव्यस्येद लक्षण विहितम्—

'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'[१]।

अर्थाद् ईदृक् शब्दो येन रमणीयार्थस्य प्रतिपादन भवति, काव्येति पदभाग् भवति।

लक्षणेऽस्मिन् कटाक्षादिवारणाय 'शब्द' इति प्रयुक्त । अनेन रमणीयार्थबोधकत्वेऽपि रमणीकटाक्षादीनां न काव्यत्वम्। व्यङ्ग्यादीना सङ्ग्रहाय वाचकेति पदस्थाने प्रतिपादकेति पदस्य प्रयोगः। वाचकेति पदप्रयोगे तु केवल वाच्यस्यैव ग्रहण स्याद्, यतु नाभीष्टम्। पदप्रतिपादनं व्याकरणादिनाऽपि भवतीत्यतस्तत्र काव्यत्ववारणाय लक्षणे (रमणीयार्थ इत्यत्र) अर्थेति पदप्रयोग । घटमानयेत्यादिवाक्याना काव्यत्व न स्यादेतदर्थ 'शब्दस्य' विशेषणीभूते 'रमणीयार्थप्रतिपादके'ति पदे रमणीयेति पदं निविष्टमर्थेति पदस्य विशेषणत्वेन।

लोके रमणीयता भिन्नरूपा समवलोक्यते। कस्यचित्कृते भोज्यपदार्थः प्रिय, कस्यचित्कृते भोग्यपदार्थ प्रिय । ब्रह्मविदा कृते ब्रह्मणो रमणीयता प्रियत्वं याति। एतत्सर्व मनसि निधाय ग्रन्थकारेण वचोभिरेभी रमणीयतेति पदस्यार्थः प्रकाशं नीतः—

'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वञ्चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेष·। कारणं च तदवच्छिन्नो भावनाविशेषः

---

१ रसगङ्गाधर, प्र० आ०, पृष्ठ-१३।

पुन. पुनरनुसन्धानात्मा। 'पुत्रस्ते जात·', 'धन ते दास्यामि' इति वाक्यार्थधीजन्यस्याह्लादस्य न लोकोत्तरत्वम्। अतस्तस्मिन् वाक्ये न काव्यत्वप्रसक्ति '[१]।

पण्डितराजेन स्वकाव्यलक्षणगतपदानामूहापोह विधायेद परिष्कृत काव्यलक्षण प्रस्तुत स्वीयग्रन्थे—

'स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारवत्त्वमेव वा काव्यत्वमिति फलितम्'[२]।

स्वकाव्यलक्षणस्य सम्यग् विचारानन्तर पण्डितराजेन शब्दार्थयुगले काव्यत्व मन्यमानानामाचार्याणां काव्यप्रकाशकारादीना काव्यलक्षणगतमतान्यपि खण्डितानि—

'शब्दार्थयुगलं न काव्यशब्दवाच्यम्, मानाभावात्।. ...चमत्कारवत्त्वमेव वा काव्यत्वमिति फलितम्'[३]।

पण्डितराजेनाचार्यविश्वनाथप्रतिपादितकाव्यलक्षणं तर्कपुरस्सरं खण्डितम्। तन्मते विश्वनाथस्य काव्यलक्षणं नितरां सङ्कीर्णम्।

अन्ते पण्डिराजेन निष्कर्षत उक्त रसगङ्गाधरे—

'तदेव शब्दविशेषस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षण वक्तु युक्तम्, न तु स्वकल्पितस्य काव्यपदार्थस्य'[४]।

उक्तसर्वेषामाचार्याणा काव्यस्वरूपनिर्धारणमतावलोकनेन तेषामेतद्विषयकमतभेदो दृष्टिगोचरतां व्रजति। शब्दार्थौ काव्यस्य शरीरत्वेन मतौ। परन्तु द्वयोर्मध्ये कस्य प्राधान्यमित्येतस्मिन् विषये परस्परमतभेदो लक्ष्यते। विषयेऽस्मिन् पक्षद्वयं (वर्गद्वयं) स्पष्टत. परिदृश्यते — शब्दार्थपक्ष·, केवलं शब्दपक्षश्च। प्रथममतपक्षधराणा मते काव्यत्वं न केवलं शब्दस्य सौष्ठवं न वाऽर्थस्य। शब्दार्थयुगलसमुच्चय एव काव्यपदभाग् भवति। अस्मिन् वर्गे समापतितानामाचार्याणां संख्या भूयसी। भामहरुद्रटवामनविद्यानाथ-मम्मटहेमचन्द्रप्रभृतीनां गणना पक्षेऽस्मिन्नेव कर्त्तुं युज्यते। द्वितीयवर्गगताचार्याणामाग्रह: केवलं शब्दोपर्येवास्ति। तन्मते काव्ये शब्दस्यैव प्राधान्यञ्चायते, अर्थस्तु शब्दानुगामितया तत्र तिष्ठति। वर्गस्यास्य प्रमुखाचार्यत्वेन अग्निपुराणकारदण्डि-विश्वनाथ-जयदेव-पण्डितराजजगन्नाथप्रभृतय: सन्ति। अत्रेदं ध्येयं यद् विश्वनाथादिकाव्यलक्षणेषु ध्वनितत्त्वस्य, विशेषतो रसध्वनितत्त्वस्य प्राधन्यं विराजते। अत एवाचार्यानन्दवर्धनेन विशेषत: समादृतम्। काव्यस्यात्मतत्त्वेनोद्घोषितम् – 'काव्यस्यात्माध्वनि:'। एतद्ध्वनितत्त्वमाश्रित्यैवैतद्वर्गीयाचार्यै:

---

१ र०ग०, पृष्ठ-१६।
२ तत्रैव, प्र० आ०, पृष्ठ-१६।
३ तत्रैव।
४. तत्रैव, पृष्ठ-४४।

स्वस्वकाव्यलक्षण विहितम्। तेषा काव्यलक्षणानुशीलनेन तद्वैशिष्टय स्वयमेव भासते। निष्कर्षतो वक्तुं शक्यते यत् सस्कृतालङ्कारशास्त्राचार्यै स्वविशिष्टदृष्ट्यैव काव्यलक्षण प्रस्तुतम्।

वस्तुत काव्यलक्षण द्विविधम् — बहिरङ्गरूपम् अन्तरङ्गरूपञ्च। बहिरङ्गलक्षणे सम्बद्धस्वरूपबोधाय बाह्यतत्त्वं तथाऽन्तरिकलक्षणेऽन्तस्तत्त्वं समाश्रीयते। सस्कृतकाव्यशास्त्रे उक्तोभयप्रकारक काव्यलक्षण प्राप्यते। प्रथमे काव्यस्य बहिरङ्गरूपस्य तदवयवस्य, तदङ्गसङ्गठनस्य च निरूपण विधीयते तथा द्वितीये तद्वैशिष्ट्यं केन्द्रीकृत वर्तते यत् केवल काव्य एवाधिगम्यते नान्यत्र।

वक्तुमिद युक्तं यत्काव्यस्य बहिरङ्गलक्षणानां सख्या भूयसी। एतद्वर्गीयाचार्याणा मध्ये मम्मटस्य काव्यलक्षणमुदाहरणत्वेनाङ्गीकर्तुं युज्यते यस्य सम्यग् विचार· पूर्वमेव कृतस्तदस्ति — 'तददोषौ शब्दार्थौ सगुणावलनङ्कृती पुनः क्वापि'।

अन्तरङ्गलक्षणमते विश्वनाथस्य 'वाक्यं रसात्मक काव्यम्' काव्यलक्षणमिद दर्शनीयम्। अत्रेदं ध्येयं यद्विश्वनाथकाव्यलक्षणमिदमाचार्यपण्डितराजजगन्नाथेन खण्डितम्। एतन्मतखण्डने तेन नैकतर्का. प्रस्तुता.। आचार्यजगन्नाथेन स्वकाव्यलक्षणमित्थ प्रदर्शितम्–

'रमणीयार्थप्रतिपादक. शब्द. काव्यम्'।

एवं वक्तुं शक्यते यत् सस्कृतालङ्कारशास्त्रे काव्यस्वरूप विशेषतो विवेचितम्।

●●

काव्यप्रकाशे गुणविमर्शः

संस्कृतालङ्कारशास्त्रपरिशीलनेन प्रकाशता याति तथ्यमिद यत्तस्मिन् काव्यगत-सर्वपक्षाणा सम्यक् चिन्तन विश्लेषणं च जाते। काव्यस्य स्वरूप, प्रयोजन, हेतु, दोष, गुण, अलङ्कार, रसश्चेत्येषा साङ्गोपाङ्ग विवेचनं जातम् तत्र काव्यस्यात्मतत्त्वमाश्रित्य षट् सम्प्रदाया जाता, येषु रीतिसम्प्रदायोऽपि (गुणसम्प्रदायोऽपि) विद्यते। आचार्यभरतादारभ्य परवर्त्तिभिर्भामहदण्डिवामनानन्दवर्धनराजशेखरकुन्तकभोजजयदेवविद्यानाथमम्मटविश्वनाथ-पण्डितराजप्रभृतिभि समैराचार्यै स्वस्वग्रन्थेषु काव्यगुणस्य सम्यग् विवेचन विहितम्। अत्र मम्मटकृतकाव्यगुणविमर्शोऽपेक्षितः। मम्मटेन स्वीयकाव्यप्रकाशनामककाव्यशास्त्रीय-ग्रन्थस्याष्टमोल्लासे काव्यगुणाना विशद विवेचनं विहितम्। मम्मटकृतकाव्यगुणविमर्श सम्यक् परिज्ञातु तत्पूर्ववर्तिकतिपयगुणसम्बद्धाऽवधारणा ज्ञेया।

मम्मटपूर्ववर्त्तिष्वाचार्येषु गुणालङ्कारविषयक मतद्वयमधिगम्यते। तयोरेकमभेदवादाश्रित पुनरपर भेदवादाश्रितम्। अभेदवादमतस्य प्रबलसमर्थको भट्टोद्भटोऽस्ति, यो गुणालङ्कारयोर्भेद। न मनुते। भेदवादमतस्य पक्षधरौ वामनानन्दवर्धनौ स्तो यौ गुणालङ्कारयोर्मध्ये भेद मन्यातम्। यद्यपि द्वयोर्गुणसम्बन्धिमतयोर्भेदोऽस्ति परन्तूभौ भेदवादिनाविति निर्विवादम्।

मम्मटेन भट्टोद्भटमतं पूर्णत खण्डित तथा वामनस्य भेदवादस्थितस्य मतस्या-धारभूमि तिरस्कृता। मम्मटेन काव्ये गुणापरिहार्यतारूप तथा अलङ्कारानपरिहार्यतारूप वामनमत ध्वनिवादिन आनन्दवर्धनस्य गुणस्य रसनिष्ठतारूपमलङ्कारस्य शब्दार्थनिष्ठतारूप च मतं मत्वा स्वगुणसम्बन्धिमत स्थापितम्। गुणसख्याविषयेऽपि मम्मट आनन्दवर्धनमतसमर्थक·। तेन आनन्दवर्धनानुसार गुणत्रय—माधुर्यम्, ओज, प्रसादश्च मत्वा तेषां लक्षणान्युदाहरणानि च प्रदर्शितानि। प्रसङ्गेऽस्मिन् तेन वामनाभिप्रेतदस-शब्दार्थगुणविषयक (गुणसंख्याविषयकम्) मतमपि स्वसिद्धान्तानुसारं खण्डितम्।

मम्मटस्य गुणपरिभाषा अधोलिखितास्ति—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।। (का० ८/६६)

अर्थात् आत्मन· शौर्यादिधर्मा इव काव्यात्मभूतरसस्यापरिहार्या उत्कर्षाधायकाश्च धर्मा सन्ति, ते गुणेत्यभिधानेन कथ्यन्ते। मम्मटस्य परिभाषानुसार त्रीणि वैशिष्ट्यानि स्पष्ट प्रतीयन्ते गुणानाम्। तानि सन्ति—

(१) गुणाः काव्यात्मभूतरसस्य धर्मा. सन्ति। अर्थात् काव्यस्यात्मा रसोऽस्ति काव्यगुणास्तदाश्रिता.।

(२) गुणा· रसस्योत्कर्षहेतवः। अर्थात् गुणद्वारा रसस्योत्कर्षो भवति।

(३) गुणानां रसेन सहापरिहार्यस्थिति । अर्थाद् गुणा सदा रसे तिष्ठन्ति।

मम्मटेनालङ्कारस्य स्वरूपं निम्नाङ्कितरूपेण प्रकाशितम्—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।। (का० ८/६७)

अर्थात् ये काव्यगतमङ्गिभूतरस शब्दार्थरूपाङ्गद्वारा न नियमतोऽपि तु यदा कदा उपकृतम् (उत्कर्षयुक्त) कुर्वन्ति ते—उपमानुप्रासप्रभृतयो लौकिकहाराद्यलङ्कारा इव (काव्यस्य) अलङ्कारा उच्यन्ते।

अलङ्कारस्यानया परिभाषया तस्य (अलङ्कारस्य) वैशिष्ट्यत्रय प्रतीयते—

(१) अलङ्कारा काव्यरसस्थित्यामेव तस्योत्कर्ष विदधति। रसस्योत्कर्षोऽपि (उपकारोऽपि) शब्दार्थरूपाङ्गद्वारैव भवति।

(२) अलङ्कारा रस नियमतो नोपकुर्वन्ति यदा कदैव तमुपकुर्वन्ति। अस्याय-मेवाभिप्रायो यदलङ्कारा विद्यमानमपि रस कदाचिन्नोपकुर्वन्ति।

(३) यत्र काव्ये रसस्य स्थितिर्न भवति तत्रालङ्कारा उक्तिवैचित्र्यरूपा एव भवन्ति।

उपर्युक्तगुणालङ्कारलक्षणानि समाश्रित्य द्वयो (गुणालङ्कारयो.) पार्थक्यमधस्तन-रूपेण कर्त्तुं युज्यते—

गुणा रसे उत्कर्षाधानं कुर्वन्ति अतस्ते रसधर्माः। रसधर्मत्वेन रसेन सह तेषा-मचलस्थिति । अर्थाद् गुणा रसेन सहापरिहार्यरूपेण तिष्ठन्ति तथा रसेऽनिवार्यरूपेणोत्कर्षाधान विदधति। एतद्विपरीतमलङ्कारा· शब्दार्थनिष्ठाः सन्ति। ते न सन्ति रसधर्मा·, विद्यमानेऽपि रसे तदुपकारमलङ्कारा· साक्षान्न सम्पादयन्ति। शब्दालङ्कारा शब्दरूपाङ्गस्य तथाऽर्थालङ्कारा अर्थरूपाङ्गस्य शोभां वर्धयन्तो रसशोभां वर्धयन्ति। अलङ्काराणां रसेन सह नाचला स्थितिः। रसेन साक तेषा स्थितिर्नापरिहार्या अस्थितेऽपि रसे काव्ये तेषां स्थिति सम्भाव्यते। अलङ्कराणा रसोपकारकत्वमपि नास्त्यनिवार्यम्। ते कुत्रचित् रसोपकार कुर्वन्ति, कुत्रचित् न रसमुपकुर्वन्ति नापकुर्वन्ति, कुत्रचित् ते रसमपकुर्वन्ति।

इत्थं गुणालङ्कारपरिभाषया द्वयोर्भेदः स्पष्टीकृतः। अनेन भट्टोद्भटस्य तस्य मतस्य खण्डन स्वत एव जायते, यत् खलु भामहकृतकाव्यालङ्कारस्य विवरणे प्रकाशितम्।

तदनुसारं गुणालङ्कारयोर्मध्ये भेदमपहाय अभेद स्वीक्रियते। भट्टोद्भटीयमुक्तमत काव्य-प्रकाशे एवमुद्धृतम्—

"समवायवृत्त्या शौर्यादय सयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणा भेद ओज प्रभृतीनामनुप्रासोपमादीना चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषा भेद"।

भट्टोद्भटमतस्यायमभिप्राय —लौकिकजगति शौर्यादिगुणा आत्मरूपगुणिना समवायसम्बन्धेन तथा हारादिरूपालङ्कारा शरीरे सयोगसम्बन्धेन तिष्ठन्ति। अत सम्बन्धभेदमाश्रित्य लौकिकगुणाना लौकिकालङ्काराणाञ्च स्याद् भेद स्वीकर्त्तु शक्येत, परन्तु काव्ये प्रसादादिगुणानामनुप्रासादिशब्दालङ्काराणा, उपमाप्रभृत्यर्थालङ्काराणा च समवायसम्बन्धेन स्थितिर्जायते। अत· उभयगतभेदसम्बन्धिनी मान्यता गड्डलिकाप्रवाहरूपा अर्थात्—अन्धपरम्परया एव विद्यते।

वामनेन यद् भेदकतत्त्वमाश्रित्य गुणालङ्कारयोर्भेदोऽङ्गीकृत· मम्मटमते तन्मत न युक्तम्। वामनेन स्वकाव्यशास्त्रीयग्रन्थकाव्यालङ्कारसूत्रस्य तृतीयाधिकरणस्य प्रथमाध्याये गुणालङ्कारयोर्भेद एभि. शब्दै. कृत·—

"काव्यशोभायाः कर्तारो धर्मा गुणाः तदतिशयहेतवस्त्वलङ्काराः"।

अर्थात् काव्यसौन्दर्योत्पादका धर्मा गुणास्तथा काव्यसौन्दर्याभिवर्धका धर्मा अलङ्कारा कथ्यन्ते। वामनस्य गुणालङ्कारभेदसम्बन्धिमतस्यास्याय भावोऽस्ति यत् काव्ये गुणा शोभा (सौन्दर्य) समुत्पादयन्ति तथा अलङ्कारा गुणजनिता शोभा वर्धयन्ति। वामनमतमिदं खण्डयितु मम्मटेन प्रश्नद्वय समुपस्थापितम्—

"किं समस्तैर्गुणैः काव्यव्यवहारः, उत्कतिपयैः"।

अर्थात् कि सकलै काव्यगुणै काचिद् रचना काव्याभिधान धत्ते अथवा कतिपयैरेव गुणै सा (रचना) काव्येति पदेनोच्यते।

प्रश्नद्वय समुत्थाप्य प्रथमप्रश्नविषये मम्मटो वदति–'यदि समस्तै, तत्कथ-मसमस्तगुणा गौडी पाञ्चाली च रीति· काव्यस्यात्मा' प्रश्नस्यास्य मम्मटस्यायमभिप्रायो यदि प्रसादादिसमस्तैर्गुणै· काचित् रचना काव्यत्वेनाभिधीयेत तर्हि समग्रगुणरहिता गौडी वा पाञ्चाली रीति काव्यस्यात्मतत्त्वरूपेण कथङ्कार मन्येत?

वामनो रीतिं काव्यात्मत्वेन मन्यते—

'रीतिरात्मा काव्यस्य' तदनुसार गुणविशिष्टपदरचना रीतिरित्यभिधीयते। रीते-र्भेदत्रय भवति—(१) वैदर्भी, (२) पाञ्चाली, (३) गौडी च।

आसा मध्ये वैदर्भीरीति समस्तगुणयुक्ता भवति—'समग्रगुणा वैदर्भी', अत प्रथमविकल्पानुसार समस्तगुणयुक्ता वैदर्भी तु काव्यस्यात्मा भवितुं शक्नोति, परन्तु गौडी तथा पाञ्चाली समस्तगुणयुक्ते न भवतोऽतस्ते (गौडी, पाञ्चाली) कथ काव्यस्यात्मा भल्तिु शक्नुयाताम्। वामनानुसार गौड्या केवल ओज कान्तिश्चेति गुणद्वयमेव तिष्ठति तथा पाञ्चाल्या माधुर्य सौकुमार्य चेति गुणद्वयस्य सत्ता भवति। स्थित्यामस्या वामनस्य काव्यस्यात्मा रीतिरिति मान्यता स्वयमेव खण्डिता भवति।

यदि केनचिदेकेन गुणेनैव कस्याश्चिदपि रचनाया काव्यत्वं स्वीक्रियते तदा अधोऽलिखिता रचनाऽपि काव्यपदभाग् भविष्यति—

''अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यल्लसत्येष धूमः''।।

अत्र ओज प्रभृतयो गुणा विद्यमाना सन्ति, परन्तु तस्या (रचनाया-) काव्य-त्वमङ्गीकर्त्तु न युक्तम्। न केवलं एतावदेव निम्नाङ्कितेषूदाहरणेषु नास्ति कश्चिद् गुण, परन्तु तत्र विशेषोक्तिव्यतिरेकालङ्कारयो स्थित्या तत्काव्यत्व मन्यते। तत्तु वामनमतानुसार न युक्तम्—

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम्।।३४८।।

इत्थमद्रावत्र . एतस्मिन् उदाहरणे विद्यमानेऽपि गुणे काव्यत्व न स्वीक्रियते तथा स्वर्गप्राप्ति.—इत्युदाहरणेषु गुणापेक्षामन्तराऽपि तत्रालङ्कारस्थित्या काव्यत्वमुरीक्रियते। अत वामनाभिमतं गुणलक्षण कथमपि युक्तत्व न भजते।

वस्तुतो मम्मटेन ध्वनिवाद्यानन्दवर्धनमतमनुसृत्य गुणलक्षणनिर्धारण तथा गुणालङ्कारयोर्भेदनिरूपण च विहितम्। तेन ध्वनिवादसम्बद्धमान्यतानुसार माधुर्यौज प्रसादेति—गुणत्रितयमेव मत्वा वामनस्य दससख्याकानां शब्दगुणानामर्थगुणानाञ्च सिद्धान्त· खण्डित —

''माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश''।।सूत्र ८९।।

मम्मटेनाष्टमोल्लासे पूर्वोक्तगुणत्रयस्य लक्षण तेषा रसविशेषे स्थितिस्तथा तेषा (गुणाना) व्यञ्जकवर्णाना, समासस्य रचनायाश्च सोदाहरण विवेचन कृतम्। उल्लासारम्भे गुणसामान्यलक्षणमुल्लिखितम्। सम्प्रति तेषा माधुर्यादिगुणविशेषाणा लक्षणादिविषये किञ्चित् कथ्यते।

मम्मटानुसार चित्तद्रुते कारणभूताह्लादो माधुर्यगुण कथ्यते। स माधुर्यगुण सम्भोगशृङ्गारे विशेषतो विद्यते। सम्भोगशृङ्गारातिरिक्त माधुर्यगुण क्रमश करुणे, विप्रलम्भशृङ्गारे तथा शान्तरसे—उत्तरोत्तरमुत्कृष्टता भजते। यतो हि करुणादिषु चित्तद्रुतिरधिका भवति—

आह्लादकत्वं माधुर्य शृङ्गारे द्रुतिकारणम् ।।सू० ९०।।

शृङ्गारे अर्थात् सम्भोगे द्रुतिर्गलितत्वमिव ।

करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।।सू० ९१।।

अत्यन्तद्रुतिहेतुत्वात् । (का० अ० उ०)

दीप्तिरूपचित्तविकारस्य हेतुरोजो गुण कथ्यते । दीप्तिश्चित्तस्य विशिष्टा स्थितिर्यस्यां चित्त प्रज्वलितमिव जायते । चित्तस्य विस्तार इव भवति । गुणस्यास्य स्थितिर्वीररसे भवति । वीभत्सरसे रौद्ररसे च क्रमश तदीयमाधिक्यं जायते । अर्थाद् वीररसाद् वीभत्सरसे वीभत्सरसाच्च रौद्ररसे ओजोगुणो वर्धमानो भवति—

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः ।। सू० ९२।।

चित्तस्य विस्तारूपदीप्तत्वजनकमोज ।

वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।। सू० ९३।।

वीराद्वीभत्से ततो रौद्रे सातिशयमोज ।

यथा शुष्केन्धने (काष्ठे) अग्निस्तथा स्वच्छवस्त्रे जल सहसा व्याप्त भवति तथैव यो गुण सहसा चित्त व्याप्नोति स प्रसादगुण उच्यते । प्रसादगुण समस्तेषु रसेषु समस्तासु रचनासु च विद्यमानो भवति—

शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ।।सू० ९४।।

व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।। सू० ९५।।

अन्यदिति व्याप्यमिह चित्तम् । सर्वत्रेति सर्वेषु रसेषु, सर्वासु रचनासु च ।

सन्दर्भेऽस्मिन् सहजत प्रश्नोऽयमुदेति, यत् मम्मटो गुण रसधर्मत्वेन मन्यते तर्हि स· स्वकीये काव्यलक्षणे—

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन· क्वापि' इत्यत्र 'सगुणौ—इति पदं शब्दार्थौ इति पदस्य विशेषणत्वेन कथ प्रयुज्यते । अर्थाद् गुणाना शब्दार्थनिष्ठता कथ स्वीक्रियते? प्रश्नमिम दृष्टिपथमानीय मम्मटो ब्रूते—

'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता' ।।७१।।

अर्थात् गुणाना शब्दार्थनिष्ठता केवलं गौणरूपेण भवति । मुख्यत ते (गुणाः) रसस्यैव धर्मा· । गुणा अपरिहार्यरूपेण रसस्था एव । परन्तु लोके यथा 'शब्दो मधुर.' 'अर्थो मधुर —इत्यादिरूपो व्यवहार प्रचलति । आत्मसम्बद्धा शौर्यादयो गुणा. गौणत शरीरसम्बद्धा मन्यन्ते तथा 'शरीरं बलवत्', 'शरीरं सुन्दर'—एवम्प्रकारको व्यवहार

क्रियते। यथा आत्मसम्बद्धा शौर्यादयो लौकिकगुणा गौणरूपेण शरीरसम्बद्धा मन्यते तथैव माधुर्यादिगुणा वस्तुतो रसधर्मा एव (रसनिष्ठा एव) तथा गुणव्यञ्जका वर्णा अर्थास्तथा रचनाश्चापि गौणतो मधुरादिरूपेणोच्यन्ते। अत शब्दार्थयो गुणस्थितिस्तु गौणैव। शब्दार्थौ गुणाना व्यञ्जकावेव।

तथ्यमिदं मनसि निधाय विचारे कृते काव्यलक्षणगत 'शब्दार्थौ'—इति पदस्य विशेषणत्वेन 'सगुणौ'—इति पदस्योपस्थापन समुचितमेव।

मम्मटेन वामनोक्तदसशब्दगुणाना दसार्थगुणानाञ्च खण्डनमपि कृतम्। तस्य मते वामनप्रतिपादिताना केषाञ्चिद् गुणाना मम्मटोक्तगुणेष्वन्तर्भावो भवति। केचिद् दोषाभावरूपा। केचिच्च दोषत्वं भजन्ते—

केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश।।

(का० अ० उ० ७२)

तेन नार्थगुणा वाच्याः प्रोक्ताः शब्दगुणाश्च ये।।

मम्मटेन गुणव्यञ्जकवर्णसमासरचनानामपि विचार कृतः — अर्थात् मम्मटेन यैर्वर्ण·, येन समासेन यया रचनया च गुणाना व्यञ्जन भवति तत्सम्बद्धविचारोऽपि विहितः। माधुर्यादिगुणानां व्यञ्जकवर्णादीना विवेचन मम्मटेन सम्यक्तया विहितम्। प्रथमं तेन माधुर्यगुणस्य व्यञ्जकवर्णसमासरचनाविषये इत्थ प्रतिपादितम्—

मूर्ध्नि वर्णान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।।

(का० प्र० अ० ७४)

'टठडढवर्जिता. कादयो मान्ता शिरसि निजवर्गान्त्ययुक्ता तथा रेफणकारौ ह्रस्वान्तरितावितिं वर्णा· समासाभावो मध्यम· समासो वेति समास· तथा माधुर्यवती पदान्तरयोगेन रचना माधुर्यस्य व्यञ्जिका'। अस्योदाहरणमस्ति—

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि।।

(का०८/३४७)

उदाहरणस्य पूर्वार्द्धे 'गकार' स्ववर्गस्यान्तिम'ड'वर्णेन, तथोत्तरार्द्ध 'तकारा 'अन्तिम'न'वर्णेन युक्तमक्तोऽस्ति, 'रङ्गे' तथा शान्तापरेति पदयो ह्रस्वस्वरेण 'अ' इत्यनेन युक्तो 'र' वर्णोऽस्ति। 'अनङ्गरङ्गप्रतिमम्' इत्यस्मिन् पदे मध्य समासस्तथाअन्तिमे

तदङ्गमित्यस्मिन् पदे माधुर्यवती रचनाऽस्ति।

ओजोगुणस्य व्यञ्जकवर्णादिविषये तेनाधोरित्या प्रतिपादितम्—

योग आद्यतृतीयाभ्यामन्त्ययोः रेण तुल्ययोः।
टादिः शषौ वृत्तिर्दैर्घ्यं गुम्फ उद्धत ओजसि।।

(का० प्र० ८/७५)

'वर्गप्रथमतृतीयाभ्यामन्त्ययो. द्वितीयचतुर्थयो रेफेण अध उपरि उभयत्र वा यस्य कस्यचित्, तुल्ययोस्तेन तस्यैव सम्बन्ध , टवर्गोऽर्थात् णकारवर्ज , शकारषकारौ, दीर्घसमास विकटा सङ्घटना ओजस'।

अस्योदाहरणत्वेन निम्नाङ्कित पद्य द्रष्टव्यम्—

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः।।

(का० प्र० सं० १५९)

पद्येऽस्मिन् – ओजोगुणानुरूपा वर्णाः, समास रचनाश्च प्रयुक्ता अत ओजोगुणस्येदमुदाहरणम्।

तेन प्रसादगुणस्य व्यञ्जकवर्ण-समास-रचनाना विषये निम्नाङ्कितरूपेणोक्तम्—

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।
साधारणः समग्राणां स प्रसादो गुणो मतः।।

(का० प्र० अ० सू० १०१)

अर्थात् ते सर्वे वर्णा स समास. ता रचनाश्च प्रसादगुणस्य व्यञ्जकत्वमावहन्ति यद्द्वारा श्रवणमात्रेणैवार्थस्य प्रतीतिर्भवति। अस्योदाहरणमस्ति—

परिम्लानं पीनस्तनजघनसङ्गादुभयतः
तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति विसिनीपत्रशयनम्।।

(तत्रैव, ३४९)

पद्येऽस्मिन् माधुर्योचिता वर्णा, मध्यम समास , सङ्घटना (रचना) चानुद्धता विद्यतेऽत प्रसादगुणस्योदाहरणमिदम् ।

मम्मटेनाष्टमोल्लासान्ते स्पष्टतयोक्त यत् काव्ये क्वचिद्-वक्तृ-वाच्य-प्रबन्धानामौचित्येन वर्णाना समासस्य रचनायाश्च अन्यथात्वमपि समुचित मन्यते— अर्थात् यस्य गुणस्य कृते व्यञ्जकत्वरूपेण ये वर्णा य समास, याश्च रचना नियतास्तत्र वक्तृवशाद्, वाच्य (वर्णनीय) वशात् , प्रबन्ध-(महाकाव्यादि) वशात् – नियमव्यतिक्रमोऽपि भवति—

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ।। (का० प्र० सू० १०२)

क्वचिद्वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादय । एतदर्थमधस्तन – मुदाहरण द्रष्टव्यम् —

'मन्थायस्तार्णवाम्भ... दुन्दुभिस्ताडितोऽसौ' ।

अस्योदाहरणस्य विषये मम्मटेनोच्यते—"अत्र हि न वाच्यं क्रोधादिव्यञ्जकम् । अभिनेयार्थ च काव्यमिति तत्प्रतिकूला उद्धता रचनादय । वक्ता चात्र भीमसेन ।" अर्थात् वक्तृभीमसेनवशादत्र नियमव्यतिक्रम ।

क्वचिद् वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयो भवन्ति । उदाहरण यथा—

प्रौढच्छेदानुरूपोच्छलन... कुम्भकर्णोत्तमाङ्गम् ।।३५३।।

अत्र वक्ता वैतालिकोऽस्ति तथा नाटकरूपं काव्यमस्ति परन्तु कुम्भकर्णमस्तकपतनरूपवाच्यानुसारं दीर्घसमासमयी – उद्धता च रचना जाता ।

क्वचिद्वक्तृवाच्यादिकमुपेक्ष्य प्रबन्धके औचित्यानुसारं रचना भवति । मम्मट कथयति —

क्वचिद्वक्तृवाच्यानपेक्षा. प्रबन्धोचिता एव ते । तथा हि आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादय·, कथायां रौद्रेऽपि नात्यन्तमुद्धता., नाटकादौ रौद्रेऽपि न दीर्घसमासादयः ।

एवमन्यदप्यौचित्यमनुसर्तव्यम् ।

इत्थ मम्मटेन स्वीयकाव्यप्रकाशे काव्यगुणानां सम्यग् विचार. कृतः । नूनमयं काव्यगुणविमर्शो मम्मटकृतश्चिरकालं महत्त्वमावहन् स्थास्यतीति द्रढीयान् विश्वास ।

●●

काव्यप्रकाशे वृत्तिविचारः

सस्कृतवाङ्मयानुशीलनेन यातीदन्तथ्य प्रकाशता यत्तस्मिन् काव्यसृष्टिपरम्परा यथा प्राचीनत्व भजते तथैव काव्यशास्त्रपरम्पराऽपि चिरन्तनत्व याति। अपारकाव्यजगतोऽप्रतिमो रचयिता कवि स्वप्रतिभादिबलेन स्वीयालौकिककाव्यमयी सृष्टि विधत्ते। परन्तु तत्सृष्टिविवेकस्तु काव्यतत्त्वमीमासकै क्रियते। आदिकालादेव सस्कृतसाहित्यमलङ्कुर्वाणैर्भरतभामहदण्डिप्रभृतिभिराचार्यै काव्यचिन्तनप्रसङ्गे काव्यस्वरूपहेतुप्रयोजनभेदादिविषये महनीयो विचारो विहित । तत्प्रसङ्ग एव वृत्तिविचारोऽपि तेषा विवेच्यविषयता यात । एतत्तु ध्येयमेवात्र यत्काव्यतत्त्वविचारप्रसङ्ग आचार्याणा मौलिकत्वं चिन्तनस्वातन्त्र्यञ्च पदे पदे प्राकाश्य व्रजति। संस्कृतालङ्कारशास्त्राचार्याणा विचारस्वातन्त्र्यस्यानुमानमनेनैव कर्त्तु पार्यते यत् सस्कृतसाहित्यशास्त्रे काव्यमुख्यतत्त्व-माश्रित्याधोलिखिता षड्साहित्यसम्प्रदाया अपि जाता.—

१. ध्वनिसम्प्रदाय
२ रससम्प्रदाय.
३. अलङ्कारसम्प्रदाय
४ गुणसम्प्रदाय
५. वक्रोक्तिसम्प्रदाय
६ औचित्यसम्प्रदाय ।

अलङ्कारशास्त्राचार्यपरम्परायामाचार्यमम्मटो महनीयस्थान भजते। स काव्य-शास्त्राचार्यजगति ध्वनिप्रस्थापनाचार्यरूपेण सादर परिगण्यते। तत्कृत काव्यप्रकाशश्च काव्यशास्त्रीयग्रन्थेषु मुख्यतया मान्यते साहित्यमनीषिभि । काव्यप्रकाशगतमाहात्म्यमनेनैवानुमातु शक्यते यत्तमाश्रित्य नैकै कोविदैस्तट्टीका विहिताः। तट्टीकाना भूयस्त्वं नितान्तमाश्चर्यकरम्। काव्यप्रकाशस्य टीकाविषये तथा तद्गतविषयगाम्भीर्यविषयेऽधस्तनोक्तिर्नून विचार्या—

काव्यप्रकाशस्य कृता गृहे गृहे,
टीकास्तथाप्येष तथैव दुर्गमः।

एतादृशमाहात्म्यमण्डिते काव्यप्रकाशे दशोल्लासा विलसन्तितरा, येषु काव्यस्य स्वरूपप्रयोजनहेतुभेदै. सह शब्दार्थविवेचनपूर्वकमभिधालक्षणाव्यञ्जनावृत्तीना, रस-गुणदोषालङ्काराणाञ्च विशद महनीयं विवेकमयञ्च विवेचन जातम्।

अत्रैतदपि स्मरणीयं यत्काव्यप्रकाशात्पूर्वमपि शब्दार्थयोर्वृत्तित्रयाणाञ्च सम्यग् विवेचना· संस्कृतालङ्कारशास्त्रीयग्रन्थेषु दृष्टिगोचरतां याति। मानवलोकस्याखिलो व्यवहार शब्देनैव प्रचलति। अत्र वाक्यपदीयकारभर्तृहरिकथनमेतन्नून ध्येयं यत् ससारेऽखिल ज्ञान शब्दानुविद्धमेव भासते—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।

(वाक्यप० १/१२३)

'एक शब्द सम्यग् ज्ञात· सुष्ठु प्रयुक्त स्वर्गे लोके च कामधुग् भवती'ति कथनं तन्महत्त्व नूनं प्रख्यापयति । शब्दार्थयोर्मध्ये शब्दस्य पूर्वोक्तिरपि तन्महनीयतामेव प्रकटयति । 'आचार्यदण्डिनोऽधस्तन कथन नितान्त याथार्थ्यमावहति यच्छब्दरूपप्रकाशमन्तरा तु लोकोऽय ज्ञानान्धकाराच्छन्न एव भवेत्—

इदमन्धन्तमं कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।

(काव्या०, १/४)

शब्दार्थयोर्मध्येऽविछिन्नसम्बन्धोपस्थितेरयमेवाभिप्रायो यच्छब्द कश्चिदर्थ बोधयितुमेव प्रयुज्यते । शब्द कथमर्थ प्रतिपादयति? इति विचारप्रसङ्गे विद्वद्भि शब्दवृत्तयो विचारणीयविषयत्वेन परिगृहीता । वेदान्तव्याकरणमीमासान्यायवैशेषिकग्रन्थेषु तु शब्दवृत्तिर्यथेष्टं विवेचिता । वृत्तिविषयकविचारे त्वाचार्याणां मतभेद. स्पष्टतो दृष्टिगोचरतां याति । अभिधा सर्वैरेव स्वीकृता । कैश्चिदभिधालक्षणेऽङ्गीकृते । कैश्चिदभिधालक्षणाव्यञ्जनेति वृत्तित्रय सम्यग् विचारितम् । मीमासकैस्तात्पर्यवृत्तिर्विवेचिता । कतिपयवैयाकरणैर्व्यञ्जनावृत्तिरपि निरूपिता । साहित्यक्षेत्र उद्भट-रुद्रट-वामन-राजशेखरप्रभृतिभि मम्मटात्पूर्वमेव शब्दवृत्ति· स्वविचारपथ नीता । परन्तु तै· प्रायेण अभिधालक्षणेति शब्दवृत्तिद्वयमेव मीमांसितम् । पश्चात् साहित्यक्षेत्रे ध्वनिप्रादुर्भावेण सह व्यञ्जनावृत्तिविवेचनाऽपि प्रचलिता । आनन्दवर्धनाभिनवगुप्ताभ्या व्यञ्जनावृत्तिर्विशदं विचारिता । पूर्वाचार्याणा विचारानन्तरं मम्मटेन स्वकाव्यप्रकाशेऽभिधालक्षणा-व्यञ्जनाख्यास्तिस्र शब्दवृत्तय. सम्यक्तया स्ववर्ण्यविषयतां नीता । सहैव मीमांसाभिमता तात्पर्याख्यवृत्तिरपि तेन व्याख्याता ।

अत्रैतदपि दृष्टिगतं कर्त्तव्यं यन्मम्मटेन स्वीयग्रन्थे वृत्तिस्थाने व्यापारेति शब्द प्रयुक्त· । एतत्तथ्यं 'मुख्यो व्यापारोऽस्याभिधोच्यते'—(सूत्र० ११), 'तत्र व्यापारो व्यञ्जनात्मकः' (सूत्र० २२), 'न चात्र व्यञ्जनादृतेऽन्यो व्यापारः' (सू० २३ वृत्ति) 'स आरोपित· शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा' (सू० ११ वृत्ति.) चेत्यादिभिस्तदीयकथन प्रमाण्यते । परवर्तिसाहित्यदर्पणकारेण व्यापारत्रयस्य (वृत्तित्रयस्य) कृते 'शक्ती'ति पद प्रयुक्तम्—'तिस्रः शब्दस्य शक्तयः' (सा०द०) ।

आचार्यमम्मटेन काव्यप्रकाशस्य शब्दार्थस्वरूपनिर्णयाभिधाने द्वितीयोल्लासे शब्दार्थयोस्तद्वृत्तीनामभिधालक्षणाव्यञ्जनानाञ्च गहनचिन्तनपरो विवेको वर्ण्यविषयतां नीतः ।

तत्रैव व्यञ्जनाभेदरूपाया शाब्दीव्यञ्जनाया भेदद्वयस्य लक्षणामूलाया अभिधामूलायाश्च विवेचन कृतम्। अर्थव्यञ्जकतानिर्णयाभिधाने तृतीयोल्लासे तेनार्थीव्यञ्जनाया मीमासा विहिता।

मम्मटेन काव्यप्रकाशस्य प्रथमोल्लासे काव्यस्वरूपमेव विहितम्—

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'।

पुनस्तेन लक्षणगतशब्दार्थावाश्रित्य द्वितीयोल्लासे द्वयो (शब्दार्थयो) स्वरूपादिविचारो विहित। मम्मटेन सर्वप्रथम शब्दस्य भेदत्रितयमेव प्रस्तुतम्—

'स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा'

अर्थात् काव्ये शब्दस्त्रिप्रकारको भवति—वाचक· लाक्षणिक व्यञ्जकश्च। एतेषा त्रयाणा क्रमशस्त्रयोऽर्था भवन्ति—वाच्य, लक्ष्यः, व्यङ्ग्यश्च।

'वाच्यादयस्तदर्थाः स्युः'। (का०प्र०, द्वि०उ०)

मम्मटानुसार वाचकशब्दस्यार्थो वाच्यो, लाक्षणिकशब्दस्यार्थो लक्ष्यस्तथा व्यञ्जकशब्दस्यार्थो व्यङ्ग्य इति कथ्यते। अत्र तथ्यद्वितयमवश्यमेव ज्ञेय यन्मम्मटेन सामान्यशब्दस्वरूपं न प्रदर्शितन्तथा तेनोपाधीनामेव त्रित्व कथित न तूपाधेयानाम्। सन्दर्भेऽस्मिन् सारबोधिनीकारस्याधस्तनं वचन साभिप्रायमेव—

'अत्रोपाधीनामेव त्रित्व न तूपाधेयानाम्। न हि कश्चिद्वाचक एव, कश्चिल्लाक्षणिक एव, कश्चिद् व्यञ्जक एवेत्यस्ति नियम।' अत एव 'गङ्गाया घोष' इत्यादावेकस्यापि गङ्गादिशब्दस्य वाचकत्व लाक्षणिकत्वं व्यञ्जकत्वञ्चोपपद्यते। (वामनी टीका)

एतदपि स्मर्यमत्र यदेषा शब्दानामुक्त. क्रमो नास्ति निरभिप्रायः। लाक्षणिक-व्यञ्जकयो. शब्दयोरुपजीव्यत्वेन वाचकशब्द प्रथममुक्त·। एवमेव व्यञ्जकस्योपजीव्यत्वेन वाचकलाक्षणिकयोस्तत्पूर्वाभिधानम्।

सन्दर्भेऽस्मिन् नूनमिद ज्ञेयं यन्मम्मटेन काव्यप्रकाशे वाच्यलक्ष्यव्यङ्ग्यार्थव्यतिरिक्तस्तात्पर्यार्थनामकश्चतुर्थोऽर्थोऽपि विवेचितस्तथाऽभिधालक्षणाव्यञ्जनातिरिक्ता तात्पर्याख्यवृत्तिरपि चर्चिता। काव्यप्रकाशगतद्वितीयोल्लासारम्भ एव तेनाभिहितान्वयवादिना कुमारिलभट्टानुयायिना मीमांसकानां मतं समासत एवम्प्रतिपादितम्—

'तात्पर्याऽर्थोऽपि केषुचित्'।

'आकाङ्क्षा-योग्यता-सन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थ· समुल्लसतीत्यभिहितान्वयवादिना मतम्'।

अभिहितान्वयवादिमतस्यायम्भावो बोधव्य । सार्थकपदसमूहरूपवाक्यस्यार्थबोधो नाभिधया, न वा लक्षणया व्यञ्जनया वा भवति। आकाङ्क्षायोग्यतासन्निधिवशात् पदार्थानामन्वये तात्पर्याख्यवृत्तिप्रतिपाद्य प्रत्येकपदवृत्त्यविषय पदसमूहगम्यो वाक्यार्थो जायते। स वाक्यार्थस्तात्पर्यवृत्त्या जायतेऽतस्तात्पर्यार्थ इति कथ्यते। तत्र वृत्तिस्तु तात्पर्याख्यैव। अभिहिता स्वस्ववृत्त्या पदैरुपस्थितानामर्थानामन्वय एवाभिहितान्वय कथ्यते।

एतेन तात्पर्याख्या वृत्तिरेषाऽभिधा-लक्षणा-व्यञ्जनातिरिक्तत्वेन जायते। यद्यपि मतमिदं कुमारिलभट्टादीना मीमासकाना मतानुसारमेव प्रदर्शितम्, परन्तु मम्मटेनानिराकृतत्वादायाति यन्मम्मटस्यास्ति सहमतिस्ता तात्पर्याख्यवृत्तिम्प्रति 'विशेषा स्युस्तु लक्षिते' इति सूत्रवृत्तौ तेनोक्तम्—'तटादौ ये विशेषा पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापान्तरेण गम्या'।

सर्वप्रथम वाचकशब्दस्य तदर्थस्य तद्वृत्तेश्च स्वरूपादिविषये विस्तरशो विवेक प्रासङ्गिक । मम्मटो वाचकशब्दस्वरूप बोधयितुमेवमुक्तम्—

'साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः'।।

अर्थाद् य शब्द साक्षात्सङ्केतितमर्थादव्यधानेन गृहीतसङ्केतमर्थ जात्यादिरूप-मभिधत्ते स वाचक इत्युच्यते।

लक्षणगतमभिप्राय बोधयितु मम्मटेनाभिहित वृत्तौ—

'इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचक'।

मम्मटस्यास्य कथनस्याम्भावो ग्रहीतु युज्यते यत्सङ्केतग्रहमन्तरा शब्दोऽर्थविशेषं प्रतिपादयितुमसमर्थ । यस्य शब्दस्य यस्मिन्नर्थेऽव्यवधानेन सङ्केतग्रहो भवति स शब्दस्तस्य (अर्थस्य) वाचकः कथ्यते। अत्रैतन्नूनमवधेयं यद् वाचकशब्दोऽभिधेयमर्थमव्यवधानेन प्रतिपादयति न तु लाक्षणिकशब्द इव व्यवधानेन। शब्देनार्थबोधे सङ्केतग्रहस्य (शक्तिग्रहस्य) मुख्य साहाय्यं यतो हि सङ्केतग्रहणमन्तरा न कोऽपि शब्दोऽर्थप्रतिपादने समर्थ इति सर्वमान्य· सिद्धान्त । सङ्केतोऽयं शक्तिग्राहकसमयेति शब्देन चाप्युच्यते बहुत्र। न्यायवार्तिके 'कः पुनरय समय·'? इति प्रश्नपूर्वक समाधिरय प्रस्तुतो यत् सङ्केतः शक्तिग्राहकसमयरूपो वाच्यवाचकभावस्य नियामकमान्यताऽस्ति—'अभिधानाभिधेयनियमनियोग' (न्या० वा०)।

प्राचीनन्याये तु सङ्केत ईश्वरेच्छारूपेण मन्यते। तस्य स्वरूपं वामनीटीकायामेव स्पष्टीकृतम्—अस्मादयमर्थो बोधव्य (अस्माच्छब्दादयमर्थो बोधव्य)। अस्याय वाच्योऽस्यायं वाचकोऽयमयमित्यादिशब्दप्रयोगरूपः'' (वा० टी०)।

यद्यपि लोकव्यवहार. सङ्केतग्रहस्य प्रधानसाधनत्वेन स्वीक्रियते, परन्तु तेन सह व्याकरणादीनामपि सङ्केतग्रहसाधनत्वं नूनं युक्तम्। एतद्विषये दर्शनीयेय कारिका—

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' ।।

सङ्केतितरूपार्थस्य चत्वारो भेदा भवन्ति—(१) जातिरूप (२) गुणरूप (३) क्रियारूपः (४) सञ्ज्ञारूपश्च । अत्र वैयाकरणपतञ्जलेरिदं कथनमेव प्रमाणम्—

''गौः शुक्लश्चलो डित्थः' इत्यादौ 'चतुष्टयी शब्दानां प्रवृत्तिः'' ।

मीमासकमते तु केवलमेका जातिरेव सङ्केतितोऽर्थ —

'सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा' । (का० प्र०, सू०-१०)

एतादृश. सङ्केतितोऽर्थो मुख्यार्थरूपेण मन्यते यथा तस्य मुख्यो व्यापारोऽभिधेत्यभिधानेनोच्यते—

'स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते' ।। (काव्यप्रकाशे)

अत्रार्थस्य मुख्यताविषयेऽधस्तनी वामनकृता बालबोधिनी टीका नून समवलोकनीया—

'शब्दव्यापारात् योऽर्थोऽव्यवधानेन गम्यते सोऽर्थो मुख्य स हि यथा सर्वेभ्यो हस्तादिभ्योऽवयवेभ्य पूर्व मुखमवलोक्यते तथा सर्वेभ्य प्रतीयमानेभ्योऽर्थेभ्य पूर्वमवगम्यते तस्मात् मुखमिव मुख्यः इति 'शाखादिभ्यो य ' इति पाणिनिसूत्रेण यप्रत्यय ' ।

अभिधारूपो शब्दव्यापारो शब्दव्यापाराणा मध्ये तथैव प्रधानत्वं धरते यथा शरीराङ्गाना मध्ये मुखम् । शरीरदर्शनकालेऽन्याङ्गापेक्षया मुख सर्वप्रथमं दृश्यतां याति तथैवाभिधाप्रतिपाद्योऽर्थ सर्वप्रथमं विचारपथमायाति । अत एव स मुख्यार्थ इति । कथ्यते तथा तत्प्रतिपादकः शब्दव्यापारोऽभिधाख्यो मुख्यत्व याति ।

समासतो वक्तुं शक्यते यदभिधाप्रतिपाद्योऽर्थो वाच्यार्थो, मुख्यार्थोऽभिधेयार्थो वा कथ्यते । एवमेवाभिधाख्यो व्यापारोऽपि मुख्यो व्यापारो मुख्या वृत्तिर्वाऽभिधीयते । साहित्यदर्पणेऽभिधाया कृते 'शक्ति'शब्दस्यापि प्रयोगो जात —'सङ्केतितग्राह्यं शक्त्याख्यपदान्तरमभिधा' (सा० द०) ।

वाचकस्य मुख्यार्थस्य अभिधाख्यशब्दव्यापारस्य च विवेचनानन्तरं मम्मटेन लक्षणाव्यापारो विवेचनापथमानीत । यद्यपि उद्देशक्रमानुरोधाद्वाचकशब्दनिरूपणानन्तर लाक्षणिकशब्दो निरूपणीयः । परन्तु तन्निरूपणं लक्षणानिरूपणाधीनमिति प्रथमं लक्षणामीमासा विहिता मम्मटेन । तेनाधोरीत्या लक्षणालक्षणं प्रतिपादितम्—

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ।। (का० प्र०, सू० १२)

अर्थात् मुख्यार्थस्य बाधे (अननुपत्तिरूपे बाधे सति), मुख्यार्थस्य साक्षात्-सम्बन्धे, प्रसिद्धे (प्रयोगप्रवाहात्), शैत्यपावनत्वादिप्रतीतिरूपफलात् शब्देन यया वृत्त्या मुख्यार्थभिन्नोऽर्थ (तटादिरूप) प्रतिपाद्यते सा वृत्तिर्लक्षणेत्युच्यते ।

अत्रेद ध्येयमिति यद् 'आरोपिता', 'क्रिया'—चेति पदद्वयं न लक्षणघटक, प्रत्युत लक्षणास्वरूपकथनपरमस्ति । पदद्वयस्यायम्भावो भासते यल्लक्षणा साक्षात्सम्बन्धेन मुख्यार्थनिष्ठा परम्परासम्बन्धेन तु शब्दनिष्ठाऽस्ति ।

लक्षणाविषयकेऽस्मिन् लक्षणे लक्षणाया हेतुत्रय प्रतिपादितम्—मुख्यार्थबाध , मुख्यार्थयोग , रूढिप्रयोजनान्यतरच्च । लक्षणा कुत्र स्यात् ? एतदर्थ हेतुत्रयस्योपस्थितिरनिवार्या । हेतुत्रय समवेतरूपेणैव हेतुत्व भजते । इत्थ हेतुत्रयाभावे लक्षणा न स्यात् । 'हेत्वभावान्न लक्षणेति मम्मटकथनममुमेवार्थ द्योतयति ।


लक्षणस्यास्य याथार्थ्यमवगन्तुमुक्तकारिकागताऽधस्तना वृत्तिरवश्यमेव विचारणीया—

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगाद्, 'गङ्गायां घोष ' इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात्, मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढित· प्रसिद्धे , तथा गङ्गातटे घोष इत्यादे प्रयोगाद् येषा न तथा प्रतिपत्ति तेषां पावनत्वादीना धर्माणां तथा प्रतिपादनात्मन प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत् स आरोपित शब्दव्यापार सान्तरार्थनिष्ठो लक्षणा' ।


अत्र 'कर्मणि कुशलः' इत्युदाहरण रूढिगतलक्षणायास्तथा 'गङ्गाया घोष ' इत्युदाहरणं प्रयोजनवत्याख्यलक्षणायाश्चास्ति । 'कर्मणि कुशल '—इत्यत्र 'कुशान् दर्भान् लाति'—आदत्ते इति व्युत्पत्त्या कुशलपद कुशग्राहिणि शक्तम्' । दक्षरूपेऽर्थे (चतुररूपार्थे) रूढ्या लाक्षणिकम् । दर्भग्राहकत्वादिरूपस्य मुख्यार्थस्य बाध , सतो ग्रहणमसतो परित्यागरूपं विवेचकत्वं कुशग्राहिरूपे मुख्यार्थे दक्षरूपे लक्ष्यार्थे च वर्तते तथाऽस्मिन् प्रयोगे रूढिः प्रयोगप्रवाहो विद्यते । अत. 'कर्मणि कुशल·' इत्यत्र लक्षणाहेतुत्रयं पूर्णतो घटते ।

'गङ्गायां घोष ' इद प्रयोजनलक्षणाया उदाहरणम् । अत्र गङ्गाया मुख्यार्थः गङ्गाप्रवाहो विद्यते, तत्र घोषाधारत्वासम्भवान् मुख्यार्थबाध , तत्र प्रवाहरूपमुख्यार्थस्य तटरूपलक्ष्यार्थस्य मध्ये सामीप्यसम्बन्धः, शीतत्वपावनत्वरूप प्रयोजनञ्च विद्यतेऽतो लक्षणालक्षणं सर्वाशतो घटते तत्र ।

मम्मटेन वृत्तित्रयाणां मध्ये लक्षणाया स्वरूपभेदादिविषये विचारो विशदरूपेण विहित । तदनुसार लक्षणाया षड् भेदा भवन्ति 'लक्षणा तेन षड्विधा'। तेषा सोदाहरणं मीमांसा तेन कृता । तदनुसार षड्भेदा सोदाहरणा इमे सन्ति—



मम्मटोक्तलक्षणाभेदविषये मतभेदा सन्ति। प्रदीपटीकाकारादिमते ते भेदा न वैज्ञानिकाः। तदनुसारं लक्षणाभेदा सोदाहरणा एते भवन्ति—



आचार्यविश्वनाथेन लक्षणाया अशीतिभेदा कृता। पण्डितराजजगन्नाथेन मम्मटाभिमतभेदा एवाङ्गीकृता ।

आचार्यमम्मटेन व्यङ्ग्यदृष्ट्या लक्षणाया भेदत्रितयमपि विवेचितम्। 'तदेषा कथिता त्रिधा' इति तदीयवचनेन लक्षणायास्त्रिस्रो भेदा भवन्ति—'तदेषा कथिता त्रिधा' (सू०-२०)।

त्रयो भेदा इमे सन्ति—

अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्या च ।

रूढिगता लक्षणा अव्यङ्ग्या (व्यङ्ग्यरहिता) भवति। प्रयोजनवत्या लक्षणाया भेदद्वयम्—गूढव्यङ्ग्या, अगूढव्यङ्ग्या च। मम्मटेनोक्तम्—

'व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने' ।

मम्मटकृतलक्षणाविवेचनस्येद वैशिष्ट्य खलु विचारणीय यत्तेन लक्षणाविवे-

चनप्रसङ्गे मीमासकादीना तद्विषयकाणि विभिन्नमतान्यपि खण्डितानि। तेन लक्षणाहेतुत्रय स्वीकृत्य तदनुसारमेव लक्षणाविषयिणी निजमान्यता स्थापिता तथा तद्विरुद्धमान्यता खण्डिता। तेन मण्डनमिश्रानुसारेणोपादानलक्षणाया उदाहरणभूत 'गौरनुबन्ध्य' इति विषयकमत निराकृतम्—यतो हि तत्र न प्रयोजनमस्ति न वा रूढि —

'गौरनुबन्ध्य·' इत्यादौ श्रुतिचोदितमनुबन्धनं कथ मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायात्। इत्युपादानलक्षणा तु नोदाहर्तव्या। न ह्यत्र प्रयोजनमस्ति न वा रूढिरियम्'।

एवमेव तेन 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र लक्षणायोजनाऽपि तिरस्कृता। यतो हि तन्मते लक्ष्यमाणं रात्रिभोजन न लक्षणाया विषयोऽपि तु तत्सिद्धि श्रुतार्थापत्त्या-अर्थापत्त्या वा कर्त्तु शक्यते—

'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेरर्था-पत्तेर्वा तस्य विषयत्वात्'' (द्वि० उ०)।

मम्मटेन 'गौर्वाहीक' इत्यादौ लक्षणागतं मतवैभिन्यमपि स्वविचारविषयीकृतम्, तथा तादर्थ्यमाश्रिता लक्षणा अपि प्रदर्शिताः। (द्र० द्वि० उ०) 'अत्र हि . . परार्थ एव लक्ष्यते' 'क्वचित्तादर्थ्यादुपचार . यथा अतक्षा तक्षा'।

एव मम्मटेन साङ्गोपाङ्गरूपेण लक्षणाया विचारो विहित स्वीयकाव्यप्रकाशे।

व्यञ्जनाविश्लेषणात्प्राक् नूनमदो ध्येय यद् व्यञ्जना द्विधा भवति—शाब्दी, आर्थी च शाब्दीव्यञ्जनाया अपि भेदद्वय भवति—अभिधामूला, लक्षणामूला च। अभिधा मुख्या वृत्तिरस्ति। लक्षणाया अपि साऽऽश्रयभूता वर्तते। अत· प्रथमतोऽभिधामूललक्षणाया एव विचार प्रासङ्गिकस्तथापि मम्मटेन यत्प्रथमं लक्षणामूलव्यञ्जना विवेचिता तत्र कारणत्रितय विद्यते—

१ लक्षणामूलव्यञ्जना नितरा प्रसिद्धा, २ अत्र लाक्षणाविचारप्रसङ्गः प्रस्तुत ३ सव्यङ्ग्यलक्षणाया (प्रयोजनवतीलक्षणाया) विचारस्तावत्पूर्णतां न याति यावत्प्रयोजनप्रतीतिविधानं न ज्ञायेत।

सम्प्रति व्यञ्जनागतविश्लेषणमपेक्ष्यते। मम्मटप्रतिपादितरूढिगतलक्षणायां नास्त्यवसरो व्यञ्जनायाः। यतो हि 'कर्मणि कुशल' इत्यत्र लक्षणा रूढित एव भवति। अर्थात् निष्प्रयोजनवती भवति। तत्रार्थसिद्धिस्तु लक्षणैव कर्त्तु शक्या। प्रयोजनाभावान्न तत्र व्यञ्जनावसरः।

अत्र व्यञ्जनागतविवेचनात्प्राग् एतन्नून विचार्य यल्लक्षणाया व्यञ्जनाकृते कथमवसर.?

'गङ्गाया घोष' इत्यत्राभिधया वृत्त्या गङ्गाशब्देन गङ्गाप्रवाहरूपोऽर्थ उपतिष्ठति। तत्र प्रवाहे घोषाधारत्वाभावात् (आधाराधेयभावाभावात्) मुख्यार्थबाधो जायते। मुख्यार्थबाध निराकर्तुं लक्षणया गङ्गाशब्देन तटरूपोऽर्थो लक्ष्यते। प्रयोजनवत्या लक्षणाया कि प्रयोजनम् ? इति जिज्ञासाया शीतत्वपावनत्वरूपोऽर्थोऽपेक्ष्यते। प्रसङ्गेऽस्मिन् समुदेत्यय प्रश्नो यत् प्रयोजनरूपोऽर्थ केन व्यापारेणाधिगन्तु शक्यते। मम्मटमते प्रयोजनरूपोऽर्थ व्यञ्जनाख्यव्यापारेणैव लब्धु शक्यते। तेनोक्तम्—

'तत्र व्यापारो व्यञ्जनात्मकः' (सू० २२)।

चेत् कश्चित् पृच्छेद् यत् शैत्यपावनत्वादिविषये व्यञ्जनैव कथमाश्रीयत इति प्रश्नमाश्रित्य मम्मटेनोक्त काव्यप्रकाशे—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।

(का० प्र०, सू०-२३)

अर्थात् यस्य शैत्यपावनत्वादिरूपप्रयोजनस्य प्रतीति समुत्पादयितु लाक्षणिकशब्द समाश्रीयते, तस्या फलप्रतीतौ (प्रयोजनप्रतीतौ) लाक्षणिकशब्द एव कारणत्वेन जायते। तेन लाक्षणिकशब्देन व्यञ्जनाख्यव्यापारमात्रेणैव प्रयोजनरूपार्थोऽवाप्तु शक्यते। अस्या कारिकाया अभिप्रायोऽधस्तनाया वृत्तावेवं प्रकाशित —

'प्रयोजनप्रतिपिपादयिषया यत्र लक्षणाया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीति, अपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापार'।

अर्थाद् 'गङ्गायां घोष' इत्यादौ शैत्यपावनत्वरूप्रयोजनगता प्रतीति जनयितु गङ्गेति लाक्षणिक शब्दः प्रयुक्तस्तत्रानुमानाद्यन्यप्रमाणेन तस्य (प्रयोजनस्य) प्रतीतिर्न जायते, प्रत्युत तेनैव (लाक्षणिकशब्देनैव) सा जायते। अवस्थायामस्या व्यञ्जनाया व्यापारादृते नास्ति कोऽप्यन्यो व्यापारो येन तत्प्रतीतिर्जनयितु शक्यते। प्रयोजनलक्षणाया प्रयोजनस्य प्रतीति केवल व्यञ्जनाव्यापारेणैव कर्तुं पार्यते।

प्रयोजनप्रतीत्यर्थमभिधा लक्षणा वा कथ नाश्रीयते? इति जिज्ञासाया मम्मटो कथयति—

'नाभिधा समयाभावात्' (सू-२४)

अर्थाद् 'गङ्गाया घोष' इत्यादिस्थले गङ्गादिपदस्य शैत्यपावनत्वादौ सङ्केताभावादभिधाया. कृते नावसर। अत्र सूत्रगताऽधस्तना वृत्तिरपि दर्शनीया—

'गङ्गाया घोष' इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः सङ्केतिता'।

साराशरूपेण वक्तु शक्यते यत् पावनत्वादिकं प्रयोजनं न गङ्गापदाभिधाप्रतिपाद्यं गङ्गापदनिष्ठसङ्केताविषयत्वात्। अभिधाव्यापारेण वाचकशब्द सङ्केतितमेवार्थमभिधत्ते—इति प्रागेव प्रतिपादितम्।

एवमेव हेत्वभावात्तत्र लक्षणाऽपि न युक्ता। लक्षणाकृते हेतुत्रयं—मुख्यार्थबाध, मुख्यार्थयोग, रूढिप्रयोजनान्यतरच्चैकमितित्रय हेतुत्वेनाऽपेक्ष्यते। अत एव मम्मटेनोक्त 'हेत्त्वभावान्न लक्षणा'।

प्रयोजनभूतशैत्यपावनत्वादिगतमर्थ प्रतिपादयितु गङ्गाशब्द कथं न समर्थ ?—इति विषये मम्मटेनाधोलिखितरूपेण प्रश्नसमाधिर्विहित.—

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः।।(सूत्र-१६)

उक्तकारिकागताभिप्रायस्तेनाऽधोलिखितकारिकायामित्थ स्पष्टीकृत —

"यथा गङ्गाशब्द स्रोतसि सबाध सति तट लक्षयति तद्वद् यदि तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत्। न च तट मुख्योऽर्थ। नाप्यत्र बाध। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयै सम्बन्ध। नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थ."।

मम्मटाभिप्राय एवं प्रकाशयितुं युज्यते। गङ्गाशब्द प्रवाहरूपार्थे बाधित सन् लक्षणया तटरूपमर्थ बोधयति परन्तु तटरूपार्थबोधने स नास्ति सबाध। अत. स (गङ्गाशब्द) लक्षणया शैत्यादिप्रयोजने बोधयितुमसमर्थ। अत्र कारणानि सन्ति—

(१) अत्र तटं न मुख्यार्थो नाऽपि तटरूपार्थबोधने कश्चित् बाध.।

(२) गङ्गाशब्दलक्ष्यार्थरूपतटस्य (लक्ष्यमाणस्य) पावनत्वादिना सह न कश्चित् सम्बन्ध।

(३) लक्ष्यत्वेन स्वीक्रियमाणस्य प्रयोजनस्य (शीतत्वपावनत्वादिरूपस्य) नास्त्यन्यत् किमपि प्रयोजनम्।

(४) गङ्गाशब्दो यथा मुख्यार्थबाधं विना लक्ष्यभूततटार्थप्रतिपादने असमर्थस्तथैव प्रयोजन प्रतिपादयितुं नासमर्थः।

मम्मटमते 'गङ्गायां घोष' इत्यादिस्थल आग्रहपूर्वक लक्ष्यत्वेन स्वीकृते प्रयोजनेऽनवस्थादोषस्य सम्भवः स्यात्। अत एवोक्त तेन—

'एवमप्यनवस्था स्याद् या मूलक्षयकारिणी'। (सूत्र-२७)

मम्मटेनैतस्मिन् प्रसङ्गे प्रयोजनेन सहित लक्षणीयत्वमपि निराकृतम्, निराकरणे तेनोक्तम्—

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्' ।

एव तेन प्रयोजनसहितलक्षणीयत्वस्य निराकरणपूर्वकोपसहार इत्थ विहित —

'विशिष्टे लक्षणा नैवम्' ।

मम्मटमते गङ्गाया घोष इत्यादिस्थलेषु लक्षिततटादौ शीतत्वपावनत्वादिरूपा ये विशेषार्था· प्रतीयन्ते, तान् प्रतिपादयितु न अभिधावृत्ति समर्था, न वा मीमासकाभिमततात्पर्यवृत्ति क्षमा, न च लक्षणावृत्ति. शक्ता । तान् विशेषार्थान् बोधयितु केवल व्यञ्जनावृत्तिरेव सामर्थ्यमेति । शीतत्वपावनत्वादिरूपार्थस्य प्रतीतिस्तु यथार्थैव अतस्तां जनयितु कश्चिच्छब्दव्यापारोऽपेक्ष्यत एव । स व्यापार तन्मते व्यञ्जनैव । स व्यञ्जनाव्यापारो द्योतन-ध्वनन-प्रत्यायन-सूचनादिशब्दैरप्युच्यते । मम्मटेनास्मिन् सन्दर्भे एवमुक्तम्—

'विशेषाः स्युस्तु लक्षिते' ।। (सू-३१)

'तटादौ ये विशेषा पावनत्वादयस्ते चाभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्या । तच्च व्यञ्जन-ध्वनन-द्योतनादिशब्दवाच्यमवश्यमेषितव्यम्' ।

प्रागेवोक्तं यत् व्यञ्जना द्विविधा भवति लक्षणामूला अभिधामूला च । मम्मटेन अत्र यावत् लक्षणामूलव्यञ्जना विशेषतो व्याख्याता, तदनन्तर तेनाभिधामूलाया व्यञ्जनाया स्वरूपं सोदाहरण प्रदर्शितम् । अभिधामूला व्यञ्जनाऽपि द्विविधा भवति—शाब्दी आर्थी च । प्रथमं मम्मटेन अभिधामूलव्यञ्जनाया स्वरूपमेवम्प्रदर्शित काव्यप्रकाशे—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ।। (सू० ३२)

अर्थात् यत्र काव्येषु अनेकार्थवाचकशब्दानां सयोगविप्रयोगादिद्वारा वाच्यार्थ-(सङ्केतितार्थ) प्रतिपादने वाचकत्वमेकस्मिन्नर्थे नियन्त्रित भवति तत्रान्यार्थप्रतीत्यर्थ व्यञ्जनाव्यापार समाश्रीयते ।

अस्यायम्भावोऽस्ति यत्र कुत्रचित् पदानाम् (शब्दानाम्) अनेकार्थेषु शक्तिर्भवति अर्थात् प्रवृत्तिनिमित्तभेदेन पदाना नैकार्था: प्रतीयन्ते । तत्र प्रकरणादिद्वारा यस्मिन्नर्थे तात्पर्यग्रहण भवति, स एवार्थो अभिधयोपस्थितो भवति (बोधविषयतां याति) नान्यार्थ· । परञ्च यदा कदोक्तरीत्या वाचकशब्देनैवान्यार्थाभिव्यक्तिरपि जायते एतादृशस्यार्थस्य बोधोऽभिधया न कर्तु शक्यते, यतो हि सा तत्र प्रथमार्थप्रतिपादन एव नियन्त्रिता भवति ।

मुख्यार्थबाधाद्यभावाल्लक्षणापि तत्रासमर्था तादृशेष्ववसरेष्वन्यार्थप्रतीतिर्व्यञ्जनयैव जायते ।

सन्दर्भेऽस्मित् मम्मटकथनमधस्तन नून विचारविषयता नेतव्यम्—

'सयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादन तत्र नाभिधा नियमनात्तस्या । न च लक्षणा मुख्यार्थबाधाद्यभावात् । अपि त्वञ्जन व्यञ्जनमेव व्यापार' ।

मम्मटेन काव्यप्रकाशे सयोगविप्रयोगादीना समल्लेखोऽपि कृतस्तथा तत्समुदाहरणान्यपि प्रदर्शितानि । द्र० ३२ सूत्रानन्तरस्थो भाग ।

मम्मटेनाभिधामूला शाब्दी व्यञ्जना स्पष्टयितु भद्रात्मनोदुरधिरोहतनो — (१२) इति काव्यगतमुदाहरणमपि प्रदर्शितम् । अत्रानेकार्थकाना 'भद्रात्मन' इत्यादिशब्दाना प्रयोगेण राजा वाच्यार्थत्वेन तथा हस्ती व्यङ्ग्यार्थत्वेन बोधपथमवतरति । अत्र वाच्यार्थभूतराजरूपस्यार्थस्प प्रतिपादनमभिधया तथा हस्तिरूपव्यङ्ग्यार्थस्य प्रतिपादन व्यञ्जनया भवति ।

अत्र अभिधामूला शाब्दी व्यञ्जना राजते । यतो हि श्लोकगत'परवारणा'दि वाचकशब्दप्रयोगेणैव व्यङ्ग्यार्थप्रतीतिर्जायते । मुख्यार्थबाधाद्यभावात्, न लक्षणाऽवसर· ।

मम्मटेन काव्यप्रकाशस्य द्वितीयोल्लासे व्यञ्जना निरूप्य समासत उक्त यत् व्यञ्जनयुक्त. शब्द व्यञ्जकेत्यभिधीयते—

'तद्युक्तो व्यञ्जकः शब्दः' । (सू-३३)

तेन (मम्मटेन) काव्यप्रकाशगतद्वितीयोल्लासारम्भे वाचक-लाक्षणिक-व्यञ्जकेति त्रिसंख्याकशब्दाना तथा क्रमशो तद् वाच्य-लक्ष्य-व्यङ्ग्यार्थाश्चेति त्रयाणामर्थानामुल्लेख कृत । एतेषा शब्दानामर्थानाञ्च व्याख्यानेन सह तेनाभिधालक्षणाव्यञ्जनाशब्दत्रयस्य स्वरूपमुपदर्शितम् । तत्रैव तेनोक्तं यद् वाच्य-लक्ष्य-व्यङ्ग्यरूपा अर्था अपि प्रायेण व्यञ्जकत्वं धारयन्ति? अर्थात् वाच्य-लक्ष्य-व्यङ्ग्यार्था यत्र कुत्रचित् व्यञ्जका अपि भवन्ति । तेन तत्र क्रमशो वाच्य-लक्ष्य-व्यङ्ग्यरूपार्थस्योदाहरणत्वेन क्रमश 'मातर्गृहोपकरणम्' । 'साधयन्ती ', 'पश्य निश्चलनिष्पन्दा . ' इति पद्यान्यप्युदाहृतानि । एतत् सर्व स्मृतिपथं निधाय तृतीयोल्लासारम्भे तेनाभिधामूलार्थीव्यञ्जनाया स्वरूपोदाहरणादिक प्रदर्शितम् । अभिधामूला शाब्दी व्यञ्जना तु द्वितीयोल्लास एव सोहाहरण सम्यग् दर्शिता । मम्मटीयाधस्तनवचनानि ध्येयानि—

'अर्थाः प्रोक्ताः पुरा तेषाम् ।' (सूत्र-३५)

अर्था वाच्य-लक्ष्य-व्यङ्ग्याः । तेषा वाचक-लाक्षणिक-व्यञ्जकानाम् ।

'अर्थव्यञ्जकतोच्यते ।'' (सूत्र-३६)

वस्तुतो आर्थीव्यञ्जनाप्रतिपादनादेव तृतीयोल्लासस्य—'अर्थव्यञ्जकतानिर्णयेति नाम सार्थक्य याति ।

तृतीयोल्लासस्यारम्भे तेन (मम्मटेन) अर्थव्यञ्जकता (वाच्य-लक्ष्य-व्यङ्ग्यार्थ-व्यञ्जकता तत्स्वरूपकथनपूर्वक सोदाहरण दृष्टिपथ नीता । तेनोक्त यत् काव्ये क्वचिद् वक्तृसम्बन्धवशात् बोधव्यसम्बन्धवशात् (बोधनीयपुरुषसम्बन्धवशात्) काकुसम्बन्धवशात् वाक्यसम्बन्धवशात्, (पदसमूहरूपवाक्यसम्बन्धवशात्), वाच्यसम्बन्धवशात्, (शाक्यार्थसम्बन्धवशात्), अन्यसन्निधिसम्बन्धवशात्, वक्तृबोधव्यभिन्नसामीप्यसम्बन्धवशात्, प्रस्तावसम्बन्धवशात् (प्रकरणसम्बन्धवशात्), विजनादिदेशसम्बन्धवशात् वसन्तादिकालसम्बन्धवशाच्च सहृदयाना यद् वाच्यलक्ष्यातिरिक्तव्यङ्ग्यार्थस्य प्रतीतिर्भवति तत्र व्यञ्जनाव्यापारस्यैव कारणत्वम् अर्थात्, तत्र वाच्यलक्ष्यव्यङ्ग्यार्थेन तदतिरिक्तव्यङ्ग्यार्थप्रतीतिर्व्यञ्जनयैव जायते—

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।।
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेंतुर्व्यापारो व्यक्तिरेव सा ।। (सूत्र-३७)

मम्मटेन तृतीयोल्लासे वक्त्रादिवैशिष्ट्यात् वाच्यस्य व्यञ्जकत्वगतान्युदाहरणानि प्रदर्शितानि । लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वोदाहरणानि न दर्शितानि ।

अत्रैतदवश्यमेव बोधव्य यदार्थीव्यञ्जनायामर्थव्यञ्जकत्वस्य नायमभिप्रायो यत् तत्र शब्दस्य न सहकारित्वम् । वस्तुत शब्दार्थयुगलत्वमेव काव्यत्वेन कथ्यते । तत्र शब्दरूपप्रमाणेन प्रतिपादितोऽर्थो वाच्यलक्ष्यव्यङ्ग्यरूपोऽर्थान्तर (व्यङ्ग्यरूपम्) प्रकाशयति तत्रार्थस्य प्राधान्येन व्यञ्जकत्वेऽपि (अर्थशक्तिमूलध्वनौ) शब्दस्य सहकारिता भवत्येव । अत एव मम्मटेनाधोऽङ्कितरूपेणार्थव्यञ्जकताया शब्दस्य सहकारित्वमङ्गीकृतम्—

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यार्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तत् शब्दस्य सहकारिता ।। (सूत्र-३८ तृ० उ०)

एवमेव मम्मटेन शाब्दीव्यञ्जनायामप्यर्थस्य सहकारित्व स्वीकृतम् । तदीयमधस्तन कथनममुमेवार्थ बोधयति—

.....यत्सोऽर्थान्तरयुक्यथा ।
अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ।।(सूत्र० ३४ द्वि० उ०)

समासतो वक्तु शक्यते यच्छाब्दीव्यञ्जनायामर्थस्य तथार्थीव्यञ्जनायां शब्दस्य सहकारित्व निर्विवादम् । शाब्दीव्यञ्जनाया शब्दपरिवृत्त्यसहत्वात् शब्दमूलकत्वेन व्यवहार ।

एवमाचार्यमम्मटेन शब्दार्थस्वरूपनिर्णयाभिधाने द्वितीयोल्लासे वाचक-लाक्षणिक-व्यञ्जकरूपशब्दाना, वाच्य-लक्ष्य-व्यङ्ग्यरूपार्थानामभिधा-लक्षणा-व्यञ्जना-रूपशब्दवृत्तीनान्तथाऽर्थव्यञ्जकतानिर्णयाभिधाने तृतीयोल्लासे आर्थीव्यञ्जनाया सम्यग् विवेचन कृतम्। तत्कृतविवेचन नून सर्वातिशायीति दिक्।

●●

महाभाष्ये शब्दानुशासनप्रयोजनविमर्शः

सस्कृतवाङ्मये व्याकरणस्य नितरां महत्त्वमङ्गीक्रियते । षट्सङ्ख्याकेषु वेदाङ्गेषु तस्य प्राधान्य समै स्वीक्रियते । अत एव तस्य मुखत्वेन प्रतिपादन जातम्—'मुख व्याकरणं स्मृतम्' । व्याकरणशास्त्रीयवाङ्मयानुशीलनेन सम्यक्तया विज्ञातुमिद शक्यते यद् व्याकरणशास्त्रपरम्पराऽतीव प्राचीना । महर्षिणा शाकटायनेन ऋक्तन्त्रेऽस्मिन् विषय इत्थ प्रतिपादितम्—

"व्याकरणज्ञान ब्रह्मणा बृहस्पतये, बृहस्पतिना इन्द्राय, इन्द्रेण भारद्वाजाय, भारद्वाजेन ऋषिभ्य., ऋषिभिश्च ब्राह्मणेभ्य. प्रदत्तम्" ।

अनेन व्याकरणाध्ययनस्य सुव्यवस्थितपरम्पराया दर्शनञ्जायते । वोपदेवमहाभागेनाष्टानां वैयाकरणानां परिगणनमेव कृतम्—

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टावादिशाब्दिकाः ।।

पाणिनीयव्याकरणाध्ययनेन सिध्यतीद यत् पाणिने पूर्वमपि नैका वैयाकरणा आसन् । परन्त्वेतन्निर्विवाद यत् समेषु वैयाकरणेषु पाणिनिर्नितान्त महनीयत्वमावहति । पाणिनिकृतायामष्टाध्याय्यामष्टाध्याया , प्रत्येकाध्याये चत्वार. पादास्तथा प्रत्येकस्मिन् पादे नैकानि सूत्राणि सन्ति समाविष्टानि । सूत्राणा सङ्ख्या चतु सहस्रात्मिका विद्यते ।

एभि सूत्रै पाणिनिना व्याकरणस्य यादृश वैज्ञानिक स्वरूप प्रस्तुत, तादृश विश्वस्य समस्ते व्याकरणवाङ्मये सुदुर्लभमेव । वस्तुतो 'व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्'—इति व्याकरणस्य परिभाषा तेन नितान्तं सार्थक्य यातम् । पाणिनेरनन्तर कात्यायनेन पाणिनीयसूत्राणा वृत्तिर्विहिता । तत्पश्चात् महाभाष्यकारेण पतञ्जलिना पाणिनीयसूत्राणि, कात्यायनवार्तिकानि चाश्रित्य स्वीय भाष्य प्रस्तुतम् । इत्थ मुनित्रयसहयोगेन सस्कृतव्याकरणं स्वभव्यरूपेणास्माक समक्षमायातम् । 'त्रिमुनिव्याकरणम्' 'मुनित्रयं नमस्कृत्य' इत्यादिस्थलेषु मुनित्रयस्य पाणिने , कात्यायनस्य, पतञ्जलेश्च ससम्मान गणना कृता राजते । एषु त्रिषु पाणिनि· सूत्रकाररूपेण, कात्यायनो वार्तिककाररूपेण पतञ्जलिश्च भाष्यकाररूपेण मान्यमाना सन्ति व्याकरणक्षेत्रे ।

अत्र भाष्यकारपतञ्जलिकृत महाभाष्यमाश्रित्य शब्दानुशासनप्रयोजनविमर्शोऽपेक्षित· । तद्विमर्शात् प्राक् नूनमिद ज्ञेय यत् किं नाम भाष्यम् ?

भाष्यलक्षणमधस्तने पद्ये प्रतिपादितम्—

सूत्रार्थो वर्ण्यते यत्र वर्णैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।

एतदत्र ध्येय यद् भाष्यलक्षणमिद न सर्वाशतो घटते पातञ्जलमहाभाष्यविषये । यतो हि तत्र न केवल सूत्राणां भाष्यगतपदानामेव विवेचनम्प्रत्युत कात्यायनकृतवार्तिकानामपि सुष्ठु व्याख्यान जातम् । पदमञ्जरीकारहरदत्तकृतं भाष्यलक्षणमिद—'आक्षेपसमाधानपरो ग्रन्थो भाष्यम्' पातञ्जलमहाभाष्यमपि व्याप्नोति । तत्राक्षेपसमाधानपरिस्थित्या तल्लक्षणमिद घटते ।

पातञ्जलमहाभाष्यात्पूर्वमपि नैकभाष्यपरा ग्रन्था परिदृश्यन्ते सस्कृतवाङ्मये । तेन भाष्यपरम्पराया प्राचीनत्व द्योत्यते । न्यायसूत्रगत वात्स्यायनभाष्य, मीमासासूत्रपर शबरस्वामिभाष्य, ब्रह्मसूत्रमाश्रित्य कृत शङ्कराचार्यभाष्य, वैशेषिकसूत्राणि समाश्रित्य प्रशस्तपादीयम्भाष्यञ्च भाष्यपरम्पराया वैशद्यं विशालत्वम्प्राचीनत्वञ्च ज्ञापयन्ति । भाष्य-परम्पराया पतञ्जलिप्रणीतमहाभाष्यस्य नितान्त महनीय स्थानम् । महभाष्येति नाम्नैव तन्महिमाऽवगन्तुं शक्यते ।

महाभाष्यगतवैशिष्ट्यमेक नूनमत्र विचारपथ नेतुमर्हति । महाभाष्यकारेण पतञ्जलिना नितरां गभीरमपि व्याकरणविषयमवबोधयितु सरला प्रसादमयी भाषा भव्योदात्ता शैली चाश्रिता । भाषाप्रवाहस्तु सर्वत्र परिलक्ष्यते । अखिलमहाभाष्ये प्रौढा सवादसरणि· समाश्रिता । महाभाष्यकारस्य विषयनिरूपणशैल्यां नितान्तं मौलिकता तार्किकता च राजते । सरलया सहजया च भाषया संवादपरोदात्तशैल्या च व्याकरणगतगूढातिगूढविषयोऽपि सम्यक्तया व्याख्यानं यात । व्याकरणगूढविषयप्रतिपादनाय पतञ्जलिनाऽङ्गीकृताया: शैल्या वाक्यपदीयकारकृता प्रशस्तिरेषा नि:सशयं युक्तत्वं यातीत्यत्र न मनागपि सन्देहलेश:—

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।।

अलब्धगाधै गाम्भीर्याद् उत्तान इव सौष्ठवात् ।।

(वाक्यपदीयम्, २/४७७-७८)

पतञ्जलिकृतमहाभाष्यमिद पाणिनिकृताष्टाध्यायीवाष्टाध्यायेषु विभक्तमस्ति । अध्याया पादेषु विभक्ता विद्यन्ते । पाणिनीयाष्टाध्याय्यां पादेषु सूत्राणि समाविष्टानि, परन्तु महाभाष्ये पादा आह्निकेषु विभक्ता वर्तन्ते । समस्ते महाभाष्ये पञ्चाशीतिसंख्याकान्याह्निकानि सन्ति । महाभाष्यगताऽऽह्निकाना मध्ये पस्पशाह्निकाभिधानमाह्निकं नितरां महत्त्वमावहति । यतो हि तस्मिन् शब्दस्वरूपं तन्नित्यानित्यत्व, पदार्थ , शब्दार्थसम्बन्ध , शब्दगतज्ञानप्रयोगधर्मत्वं,

व्याकरणपदार्थ , शब्दानुशासनप्रयोजनञ्चेत्यादिविविधविषया मुख्यतो विवेचिता सन्ति । वस्तुत आह्निकमिद महाभाष्यभूमिका निर्वाहयति । व्याकरणजगति पस्पशाह्निकस्य निरतिशय महत्त्व विद्यते ।

पस्पशाह्निकस्य महिमानं मनसि निधाय महाकविमाघस्य वचनमिद नितरा याथार्थ्यमावहति यद् यथा चार (दूत) विना राजनीतिर्न भाति तथैव पस्पशाह्निकमन्तरा शब्दविद्या (व्याकरणविद्या) न शोभते—

''शब्दविद्येव नो भाति राजनीतिरपस्पशा'' ।।

(शिशुपालवध, १/१२)

ससारे प्रायेण दृष्टिपथ यातीदं तथ्यं यत् ससारे मन्दोऽपि निष्प्रयोजनतया न किमपि कर्म कर्त्तु प्रवर्तते—

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' ।

सन्दर्भेऽस्मिन् निम्नाङ्कितोक्तिगतो भावोऽपि ध्येयो यद् यावत्कस्यचिदपि शास्त्रस्य कर्मणो वा प्रयोजनं प्रतिपादितं न भवति तावत्तद् ग्राह्यत्व न याति—

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत् केन गृह्यते ।।

एतत्सर्व मनसि निधाय महाभाष्यकारेण महाभाष्यगते पस्पशाह्निके शब्द-स्वरूपविमर्शानन्तर शब्दानुशासनविमर्शस्तदनन्तरं शब्दानुशासनप्रयोजनविवेचन विहितम् । सम्प्रति महाभाष्यगतशब्दानुशासनप्रयोजनविमर्शोऽपेक्ष्यते ।

शब्दानुशासनप्रयोजन विज्ञापयितुं महाभाष्यकार एवं पृच्छति (आक्षिपति)—

'कानि पुनः शब्दानुशासनस्य प्रयोजनानि' ।

अर्थात् शब्दानुशासनस्य कानि कानि प्रयोजनानि सन्ति? एतदत्र नून ज्ञेयमस्मिन् सन्दर्भे यद् कैय्यटानुसार व्याकरणस्य साक्षात् प्रयोजन शब्दानुशासनमस्ति तथा शब्दानुशासनस्य प्रयोजनानि रक्षोहादीनि विद्यन्ते—

'भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात् प्रयोजनमाह—अथ शब्दा-नुशासनमिति । प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद् वक्ष्यति' एतेन स्पष्ट यत् शब्दानुशसनस्यापि प्रयोजनाभिधानं साक्षात् प्रयोजनायापेक्ष्यते । यतो हि शब्दानुशासन-प्रयोजनानभिधाने तस्मिन् (शब्दानुशासने)—अप्रवृत्ति. स्यात् । अत एव दीपिकायां महावैयाकरणभर्तृहरेरधस्तन कथनं सङ्गतिं याति—

''न चेदं नित्यकर्मावश्यं कर्त्तव्य, नित्ये कर्मण्यप्रवृत्तावधर्म·, अनित्ये तु कामचार· ।

यदि च प्रयोजनान्यस्य न भविष्यन्ति तत. न प्रवर्तयिष्यत इति पृच्छति'' । (दीपिका पृष्ठ-५) ।

सन्दर्भेऽस्मिन् ज्ञेयमेतदपि यन्महाभाष्यकारेणानेकत्र—अध्येय व्याकरणम्, तस्मादध्येयं व्याकरणम्' 'इमानि प्रयोजनान्यध्येय व्याकरणमिति'—स्थलेषु शब्दानुशानेति पदमनुक्त्वा व्याकरणेति पदमेवोक्त तर्ह्यत्र प्रश्नरूपे (आक्षेपरूपे) 'कानि पुनः शब्दानुशासनस्य प्रयोजनानीति वाक्ये शब्दानुशासनेति पदस्थाने व्याकरणेति पद कथ न प्रयुक्तम् ? अर्थात् कानि पुन· शब्दानुशासनस्य प्रयोजनानि' इत्यस्य स्थाने 'कानि पुनर्व्याकरणस्य प्रयोजनानि' कथं नोक्तम्, प्रश्नस्यास्य समाधानरूपेण वक्तुमिद युक्त यद् वैदिकशब्दार्थबोधकत्वेन व्याकरणस्य वेदाङ्गत्वं स्वीक्रियते तथा व्याकरणशास्त्रशब्दार्थबोधकरूपधर्म शब्दानुशासनविमर्शेनैवावाप्तुं शक्यते न तु व्याकरणेतिशब्दमात्रेण । अत एवाक्षेपमूले वाक्ये शब्दानुशासनपदप्रयोगो जात ।

उक्तरीत्याऽऽक्षिप्य (पृष्ट्वा) महाभाष्यकार एव समाधत्ते—

''रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'' ।

अर्थात् रक्षा, ऊह , आगम , लघु तथा असन्देह —इति पञ्च शब्दानुशासनस्य प्रयोजनानि भवन्ति। अत्र प्रयोजनेति शब्दस्यार्थद्वय विद्यते—फलम् (उद्देश्यम्) प्रयोजकहेतुत्वञ्च । प्रयोजनशब्दस्य—'प्रयुज्यते व्यवसाय्यतेऽनेनेति प्रयोजनम्' इति—व्याख्यानेनार्थद्वयावाप्तिर्जायते । अत्र—'आगम ' प्रयोजकहेतुत्वेन तथा रक्षादय उद्देश्यत्वेन परिगण्यन्ते ।

सम्प्रति रक्षोहादिपञ्चप्रयोजनाना विमर्शोऽपेक्ष्यते । सर्वप्रथम रक्षारूपप्रयोजनस्य विवेचन विधीयते ।

रक्षा—भाष्यकारेणोक्तम्—

''रक्षार्थ वेदानामध्येयं व्याकरणम् । 'लोपागमवर्णविकारज्ञो हि सम्यग्' वेदान् परिपालयिष्यति' ।

कथनस्यास्य महाभाष्यकारस्यायम्भाव —वेदाना रक्षार्थं व्याकरणाध्यनमावश्यकम् । यतो हि य· खलु व्याकरणशास्त्रगत लोपम्, आगम वर्णविकारञ्च सम्यग् जानीते स एव वेदानां रक्षायै क्षमतामेति ।

'रक्षेति पदेनात्र यथार्थबोधेऽपायपरिहारोऽपेक्ष्यते । दीपिकायामुक्तमपि—'सतोऽर्थस्यापायपरिहारो रक्षा नाम' ।

लोपः—लोपागमेत्यत्र लोपेति शब्देन पारिभाषिको लोपशब्दो गृह्यते 'अदर्शन लोप ' इति सूत्रेण लोपसंज्ञा विधीयते ।

सूत्रे—अदर्शनेति पदेन चक्षुर्मात्रेण कृतं दर्शनं नापेक्ष्यते । 'दृश्'

धातुर्ज्ञानार्थकोऽस्ति। ज्ञानमन्यैरपि ज्ञानेन्द्रियैर्जायते। परन्त्वत्र शब्दानुशासनविषयत्वात् शब्दविषयक श्रवणमेवात्राभिप्रेत भवति। सूत्रगततत्त्वबोधिन्यामुक्तमपि—

'अत्र दृशिर्ज्ञानसामान्यवचन दर्शन ज्ञानम्, तदिह शब्दानुशासनप्रस्तावाच्छन्द-विषयक सत् श्रवण सम्पद्यते'।

अतोऽदर्शनपदस्य शब्दस्य (वर्णस्य) अश्रवणम्, अनुच्चारणम्, अनुपलब्धि, अभावश्चेत्यादयो नैकार्था भवन्ति। वेदेऽनेकत्र शब्दवर्णादिलोपो व्याकरणनियमेन कृतो दृश्यते। अतो यः खल्ववैयाकरणो व्याकरणगतलोपविषयक ज्ञान न धारयते स वेदार्थ बोद्धु न प्रभवति। उदाहरणेनैकेनैतद्विषयक ज्ञानमवाप्तु शक्यते।

ऋग्वेदे 'पीयोपवसनशब्दो दृष्टिगोचरोऽस्ति। तत्र सकारान्त'पीवस्'शब्दगत'स'शब्दस्य 'पीयोपवसनादीना छन्दसि लोपः' इति वार्तिकेन लोपो गुणश्च भूत्वा पीवोपवसनेति शब्दो निष्पद्यते। अलोपज्ञो जनो लोपज्ञानाभावे तस्य पदस्य स्वरूपज्ञानाभावात्तदर्थ ज्ञातुमसमर्थो जायते।

आगमः—उपदेशे प्रत्ययादिभि सहागमस्यापि परिगणन भवति—

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः।।

तैत्तिरीयप्रातिशाख्ये आगम एव परिभाषित —

अन्यत्र विद्यमानस्तु यो वर्णः श्रूयतेऽधिकः।
आगम्यमानतुल्यत्वात्स आगम इति स्मृतः।।

अयमागम प्रत्ययादेशाभिन्नस्तथा प्रकृतिप्रत्ययानुपघातको भवति। 'अट्', 'इट्', 'सुट्' आदय आगमशब्देन गृह्यन्ते। न्यायकोशे चागमस्वरूपमेव व्याख्यातम्—

'प्रत्ययादेशभिन्नत्वे सति साक्षाल्लक्ष्यसस्कारतया शास्त्रविहितप्रकृतिप्रत्ययानुप-घातको य अट्, इट्, इत्यादि स आगम इति शाब्दिका वदन्ति'।

अयमागम आदेशवन्न भवति। आदेशस्तु कस्यचित् स्थानिन स्थाने जायते, एतद्विपरीतमागमो न कस्यचित्पदस्य (वर्णस्य वा) स्थाने भवति। आदेश शत्रुवद् भवति तथाऽऽगमो मित्रवद् भवति। आदेशस्योदाहरणम् 'इको यणचि' सूत्रविहित 'सुध्युपास्य' इत्यत्र इक. स्थाने यण् रूपं कार्यन्तथाऽऽगमस्योदाहरण 'आमि सर्वनाम्न· सुट्' इति सूत्रविहित. सर्वेषामित्यत्र सुडागमोऽस्ति। एवमेवान्यत्रापि—इडाद्यागमा जायन्ते।

ऋग्वेदे 'दिवं सुपर्णो गत्वाय' इति मन्त्रभागे गत्वा इति पदानन्तर 'क्त्वोयक्' इति सूत्रेण यगामगो भूत्वा गत्वायेति पद निष्पद्यते।

अत्रेद बोध्य यत्कैय्यटेन लोपागमयोरुमयोरप्युदाहरत्वेन 'अदुह्रे'त्युदाहृतम्। अत्र 'दुह्' धात्तो. लड्लकारे प्रथमपुरुषबहुबचने 'झ' स्थानेऽतादेशे सति 'लोपस्त आत्मने पदे' इति सूत्रेण तलोपे जाते तथा बाहुलं छनसि' – इति सूत्रेण रुडागमे सति अदुह्रेति प्रयोगो निष्पद्यते।

वर्णविकारः—लोपो न वर्णविकाररूपो लोपस्यादर्शनस्वरूपत्वात्। अत एव वर्णविकारस्य लोपात्पृथग् विचार कृतोऽत्र। अत उद्योतकारस्य कथनमिदं युक्तत्व याति—

लोपस्तु न विकार इति पृथग् भणित । भावरूप एव चादेशोऽत्र विकार·।

वस्तुत प्रकृतेरवस्थान्तरमेव विकारेति पदेनोच्यते। अत्र वर्णविकारस्योदाहरणत्वेन—ऋग्वेदस्थ जभार, गृभ्णाति, उद्ग्राभम्–इति पदत्रितयं परिग्रहीतुं शक्यते। वेदे जहारेति पदस्थाने जभारेति पदस्य प्रयोगो जायते। एवमेव गृह्णाति—इति पदस्थाने गृभ्णाति-इति पदस्य तथा'उद्ग्राहेति पदस्य स्थाने उद्ग्राभेति पदस्य प्रयोगो दृश्यते। य खल्ववैयाकरणो वर्णविकारानभिज्ञोऽस्ति स नूनमेवैतेषा प्रयोगाणामशुद्धत्वं स्वीकरिष्यति तथा वेदार्थज्ञानाद् वञ्चितो भविष्यति। एतद्विपरीत यो हि वर्णविकारज्ञो वैयाकरण स तु नि संशयमेव 'हृग्रहोर्भश्छन्दसि' इति सूत्रेण त्रिषु प्रयोगेषु हकारस्थाने भकाररूपवर्णविकारगतविधानस्य ज्ञानतया काञ्चिदपि भ्रान्तिं न यास्यति। स वेदस्थ जभारोद्ग्रामगृभ्णातीति पदत्रय शुद्धत्वेनैव मस्यते तथा शब्दज्ञानपूर्वक वास्तविक वेदार्थ ज्ञास्यति। इत्थ लोपागमवर्णविकारज्ञो वैयाकरणो नून वेदरक्षा विधातुं सामर्थ्य यास्यति। यतो हि वेदार्थज्ञानमेव वेदरक्षणमिति। वेदार्थज्ञानमपि लोपागमवर्णविकारज्ञानपूर्वकशब्दज्ञानेन कर्तु शक्यते।

अवश्यमेव विचारपथ नेयमिति तथ्य यत् सम्यग् वेदार्थज्ञानेन स्वर्गसुखस्य चरमपुरुषार्थभूतमोक्षस्य च प्राप्तिर्भविष्यति। कथनस्यास्य विस्तृतोऽभिप्राय उद्योतकारस्याधस्तनकथनेनाधिगन्तुं शक्यते—

'एवं च वेदार्थज्ञानपूर्वकं शुद्धतत्तन्मन्त्रैस्तद्विहितकर्मानुष्ठानेन स्वर्गसुखम्, उपनिषदर्थज्ञानेन वक्ष्यमाणरीत्या वा मोक्षश्च पुरुषार्थो व्याकरणाध्ययनस्य फलमिति भावः। (ठद्योते)'।

ऊहः खल्वपि—ऊहस्य शब्दानुशासनस्य प्रयोजनत्वविषये महाभाष्यकारेणेत्थमुक्तम्—

''ऊहः खल्वपि न च सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिता ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्या । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्''।

अस्यायमर्थः—ऊहोऽपि व्याकरणाध्ययनस्य प्रयोजनमस्ति वेदे सर्वैलिङ्गैः

सर्वाभिर्विभक्तिभिश्च मन्त्रा नोक्ता । यज्ञस्थपुरुषेण ते मन्त्रा निश्चितरूपेण यथोचित रूपान्तरयुक्ता: करणीया भवन्ति । य खल्ववैयाकरण स न यथोचित रूपान्तररूप-कर्म कर्त्तु क्षमते । मन्त्राणां यथोचित विपरिणमनाभावे यज्ञस्य पूर्णता न जायते । इति हेतो व्याकरणस्याध्ययनमवश्य करणीयमिति ।

महाभाष्यकारस्योक्तवचन सम्यक्तया बोद्धु तद् विमर्शोऽपेक्ष्यते । यागस्य भेदद्वय भवति—प्रकृतियागो विकृतियागश्च । प्रकृतियागेऽखिलानि विधानान्युक्तानि जायन्ते । विकृतियागे केवल परिवर्तनीया अशा एव समुल्लिखिता भवन्ति, शेषा. प्रकृतियागवत् करणीया भवन्ति । अत एव विकृतियागे प्रकृतियागस्य प्रकृतिलिङ्गविभक्तीनामपेक्षानुसार विपरिणमन (परिवर्तनं) कर्त्तव्यतयाऽऽपतति । अत एव मीमासागते शाबरभाष्य उक्तम्—'यत्प्रकृतौ कर्त्तव्यं तद् विकृताविति' (९/३/१) ।

अत्रेदमपि ध्येयं यत् प्रकृतियागे समग्राङ्गोपदेशो भवति । अत एव दर्शपूर्णमासादि-याग: प्रकृतियागरूपेण परिगण्यते, यतो हि तस्मिन् समस्ताङ्गोपदेशो जायते । यत्र (यागे) सर्वाङ्गोपदेशो न भवति, स विकृतियागत्वेन कथ्यते । सौर्यादीनां ग्रहण विकृतियागे क्रियते । बोद्धव्यमत्र यद् इष्टियागाना प्रकृतिर्दर्शपूर्णमासस्तथा सोमयागाना प्रकृतित्वेनाग्निष्टोमो गृह्यते ।

नूनमत्र बोध्यमेतद् यद् विपरिणमन त्रिधा दृश्यते — प्रकृतिगत लिङ्गगत विभक्ति-गतञ्च । क्रमशस्तेषामुदाहरणानि प्रस्तूयन्ते ।

'अग्नये त्वां जुष्टं वपामि'—इति प्रकृतियागगते मन्त्रेऽस्मिन्—अग्न्युद्देश्यक-चरोर्निवापस्य (दानस्य) विधानमस्ति । परन्तु तत्रैव यज्ञकाण्डे "सौर्य चरुं निर्वपेद् ब्रह्मवर्चस्कामः' इतिरूपेण विकृतिरूपसौर्ययागस्य विधानं वर्तते । तत्राग्न्युद्देश्यकचरु-निर्वापविधानगतमन्त्रवत् (अग्नये त्वा—इतिवत्) सूर्योद्देश्यकचरुनिर्वापगतो नास्ति कश्चिन्मन्त्र. । अतोऽग्नय—इत्यस्य स्थाने सूर्यायेति पदस्य विपरिणमनेन 'सूर्याय त्वा जुष्टं निर्वपामि' इति मन्त्रो जायते येन सौर्ययागस्य विधान पूर्णतां याति ।

एवमेवान्यस्थलेषु लिङ्गगतो विभक्तिगतश्चोह· (क्रमश. 'धरसि भूता मनसा' मन्त्रे—आशामाना मेघपतिभ्यो मेघम्) इत्यादिमन्त्रेषु क्रियते । ईदृशान्यपेक्षितानि विपरिणमनानि चोहानभिज्ञोऽवैयाकरणो न कर्त्तु प्रभवति । अत ऊहार्थं व्याकरणाध्ययनमावश्यकम् ।

आगमः—आगममाश्रित्य महाभाष्यकारेणोक्तं महाभाष्ये—

'आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्म· षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति । प्रधान च षडङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति" । (महा० पस्प०)

अर्थात् ब्राह्मणेन कारणम् (फलम्) अनपेक्ष्यैव धर्मस्य षडङ्गयुक्तवेदस्य चाध्ययनं कर्त्तव्यमिति श्रुत्याऽपेक्ष्यते । षडङ्गेषु व्याकरणं प्रधानमङ्गम् । मुख्यविषये कृतो यत्नः,

फलवान् भवति। व्याकरणज्ञानमन्तराऽन्येन केनचिदुपायेन लघुना सुगमतया शब्दज्ञान कर्त्तुं न शक्यते केनचित्।

वेदस्याधोलिखितानि षडङ्गानि भवन्ति—छन्द , कल्प , ज्योतिष , निरुक्तम्, शिक्षा, व्याकरणम्। पाणिनीयशिक्षायामीदृगूरूपेण षडङ्गाना गणना तद्वैशिष्ट्यप्रतिपादनपूर्वक कृता—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।

(पा० शि० ४१-४२)

एषु व्याकरणस्य मुख्यतेति 'मुख व्याकरण स्मृतमि'त्युक्त्वा प्रतीयते।

अत्रेद वक्तुं युज्यते—प्रयोजनाना मध्ये—आगम प्रयोजकहेतुत्वेन परिगणितो न तु प्रयोजनरूपेण। ब्राह्मणाना कृते वेद एव परमनि श्रेयस्करोऽस्ति। याज्ञवल्क्य-स्मृतावित्थमुक्तम्—

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्।
वेद एव द्विजातीनां निःश्रेयस्करः परः।।

(या० स्मृ०)

अतो वेदवाक्यमिदं 'ब्राह्मणेन निष्कारणो . ज्ञेयश्चेति' मत्वा ब्राह्मणेन निष्काम-भावेन षडङ्गो वेदो ज्ञेय । यतो हि वेदस्य षडङ्गेषु व्याकरणस्य प्राधान्य 'मुख व्याकरण स्मृतमि'त्यादिवचनै· सिद्धमतो वेदज्ञानाय व्याकरणमवश्यमेवाध्येतव्यम्। व्याकरण-ज्ञानमन्तराऽन्येन केनचिदपि सुगमेनोपायेन वेदगतशब्दानां परिज्ञानमवाप्तुं न शक्यते। दीपिकाटीकाकारेण त्वत्र व्याकरणाध्ययन नित्यकर्मतया ब्राह्मणेन कर्त्तव्यमित्यभिप्रायो व्यक्त —

'इदं तु व्याकरणाध्ययन नित्य कर्मावश्य कर्त्तव्यमुपनयनादिवद् इत्येतत्प्रद-र्श्यते'—दीपिका।

लघ्वर्थम्—लघुरूपप्रयोगजनं वक्तु भाष्यकारेणेत्थमुक्तम्—लघ्वर्थ चाध्येयं व्याकरणम्। 'ब्राह्मणेनावश्य शब्दा ज्ञेयाः' इति। न चान्तरेण व्याकरण लघुनोपायेन शब्दा· शक्या ज्ञातुम्''।

अर्थात् लघ्वर्थ (लाघवाय—सङ्क्षेपाय वा) व्याकरणमध्यतेव्यम्। शब्दज्ञान ब्राह्मणस्य कृतेऽवश्यकर्त्तव्यतयाऽऽपतति। व्याकरणादृते नास्ति कश्चिदन्य सुगमोपायो येन शब्दज्ञानं विधातुं पार्यते।

अयम्भाव: । अध्यापन ब्राह्मणस्य मुख्यवृत्तित्वेन तिष्ठति । शब्दज्ञान विना ब्राह्मणो न शक्नोति स्वशिष्यान् सम्यगध्यापयितुम् । शब्दज्ञानन्तस्य कृतेऽनिवार्यम् । शब्दज्ञानायान्य कश्चिदुपाय सुगमो न विद्यते । शब्दज्ञानाय प्रतिपदपाठस्तु न सुगमोपाय । भाष्यकारमते तु प्रतिपदपाठोऽनभ्युपाय एव । अधस्तन तदीय कथन स्मृतिपथमवश्यमेव नेयम् —

'अथैतस्मिञ्छब्दोपदेशे सति किं शब्दाना प्रतिपत्तौ प्रतिपदपाठ कर्त्तव्य । गौरश्व पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादय: शब्दा पठितव्या ? नेत्याह । अनभ्युपाय एष शब्दाना प्रतिपत्तौ प्रतिपदपाठ.'' । (महा० पस्पशा०)

अनन्तर महाभाष्यकारेण ''किन्नर्हीमे शब्दा· प्रतिपत्तव्या:—एवमाक्षिप्य तत्समाधितयोक्तम्—''किञ्चित्सामान्यविशेषवल्लक्षण प्रवर्त्यम् । येनाल्पेनायासेन महतो बहव: शब्दा. प्रतिपद्येरन् । किं पुनस्तत् ? उत्सर्गापवादौ । कश्चिदुपसर्ग. कर्त्तव्य , कश्चिदपवाद: । कथञ्जातीयक. पुनरुत्सर्ग: कर्त्तव्य., कथञ्जातीयकोऽपवाद ? सामान्येनोत्सर्ग कर्त्तव्य: । तद्यथा 'कर्मण्यण्' । तस्य विशेषेणापवाद: । तद्यथा—आतोऽनुपसर्गे क '' ।

महाभाष्यकारकथनस्य समासतोऽयमभिप्राय: — साधुशब्दाना परिज्ञानाय 'कर्मण्यणादिसामान्यसूत्राणा तथा—'आतोऽनुपसर्गे क ' इत्यादिविशेषसूत्राणा प्रवर्तनेन महतो महत शब्दसमूहान् सुगमतया विज्ञातुं शक्नुयात् कश्चित् । अत शब्दज्ञानाय लघूपायभूत व्याकरणमवश्यमेवाध्येतव्यम् ।

असन्देहार्थम्—सन्देहरूपप्रयोजनमाश्रित्य महाभाष्यकारेणैवमुक्तम्—''असन्देहार्थ चाध्येय व्याकरणम् । याज्ञिका· पठन्ति—स्थूलपृषतीमग्निवारुणीमनड्वाहीमालभेत' इति । तस्यां सन्देह स्थूला चासौ पृषती स्थूलपृषती, स्थूलानि पृषन्ति यस्या: सा स्थूलपृषतीति । ता नावैयाकरण स्वरतोऽध्यवस्यति—यदि पूर्वपदप्रकृतिस्वरत्व ततो बहुव्रीहि , अथ समासोदात्तत्वं ततस्तत्पुरुष इति'' ।

अयम्भाव· । यज्ञकर्मणि 'स्थूलपृषतीमग्निवारुणीमनड्वाहीमालभेत' इति विधानमस्ति । अस्मिन् अग्निवरुणदेवतानिमित्तकमालम्भन विधीयमानमस्ति । 'अनड्वाहीमिति पदस्य विशेषणत्वेन स्थूलपृषतीमिति पद प्रयुक्त वर्तते । स्थूलपृषतीति पदस्य 'स्थूला चासौ पृषतीति' विग्रहेण कर्मधारयसमासस्य (तत्पुरुषस्य) तथा स्थूलानि पृषन्ति यस्या? इति विग्रहेण बहुव्रीहिसमासस्य च स्थितिर्जायते । कर्मधारयसमासे (तत्पुरुषसमासे) 'स्थूलपृषतीमनड्वाहीम्' इति पदस्य स्थूला पृषतीञ्चानड्वाहीमित्यर्थो भवति । फलत आलम्भनकृते—ईदृशी—अनड्वाही अपेक्ष्यते या स्थूला सती पृषती (अर्थात् बिन्दुमती) वर्तते । एतद्विपरीतं बहुव्रीहिसमासे—ईदृशी अनड्वाही अपेक्षिता भवति या स्थूलबिन्दुयुक्ता विद्यते । उभयो· समासयो: कस्य ग्रहणं स्यादित्यत्र स्वरज्ञानमपेक्ष्यते । यतो हि स्वरज्ञाने

नैव समासनिर्धारणं जायते। निर्धारिते च समासेऽपेक्षितार्थनिर्धारणं भवति। स्थूलपृथतीति समस्तपदे यदि पूर्वपदस्य (स्थूलेत्यस्य) प्रकृतिस्वरत्वन्तदा बहुव्रीहिसमास —एव यदि समासान्तोदात्तमस्ति तर्हि तत्पुरुषसमास·—इति निर्धारण जायते। य खल्ववैयाकरणः स स्वरज्ञानाभावात् समासनिर्धारणरूपा सन्देहनिवृत्ति विधातु न प्रभवति। अतः सन्देहनिवृत्त्यर्थ व्यारणमध्येतव्यमिति।

इत्थं महाभाष्ये शब्दानुशासनस्य (अन्ततो व्याकरणस्य) मुख्यानि प्रयोजनानि विचारविषयता नीतानि। एतदत्रावधेय यत् पञ्चाना मध्ये—आगमस्य (वेदस्य) प्रयोजकहेतुत्वेन परिग्रहणन्तथाऽन्येषा प्रयोजनत्वेन ग्रहणमिति।

व्याकरणस्य (शब्दानुशासनस्य) मुख्यप्रयोजनप्रतिपादनानन्तरं महाभाष्यकारेण महाभाष्ये आनुषङ्गिकाणामपि प्रयोजनानां विचारो विहित । तेषा सङ्क्षेपेणोल्लेखस्तेनाधोलिखितरूपेण कृतम्—

'इमानि च भूय शब्दानुशासनस्य प्रयोजनानि—(१) तेऽसुरा, (२) दुष्ट· शब्द, (३) यदधीतम्, (४) यस्तु प्रयुङ्क्ते, (५) अविद्वास, (६) विभक्ति कुर्वन्ति, (७) यो वा इमाम्, (८) चत्वारि, (९) उतत्व, (१०) सक्तुमिव, (११) सारस्वतीम् (१२) दशभ्यां पुत्रस्य, (१३) सुदेवो असि वरुण इति।

एतेषा त्रयोदशानुषङ्गिकप्रयोजनाना सोदाहरणं व्याख्यान विहित महाभाष्यकारेण। एतेषामतिसमासतो व्याख्यान क्रियते।

(१) तेऽसुराः—अत्रापशब्दो म्लेच्छत्वेवाभिहितः। व्याकरणज्ञानाभावेऽसुरै —'हे अरयः' इत्यस्य स्थाने 'हेलयो हेलयो—इतिब्रूवाणा. परास्ता अभूवन्'। हेलयो हेलयो—इत्यत्र तैस्त्रुटित्रय कृतम्। 'हैहैप्रयोगे हैहयोः' इति सूत्रेण प्लुतत्वात्प्रकृतिभावेन भाव्यम्, परन्त्वसुरै पूर्वसन्धिर्विहित। २-तैर्वाक्यद्विरुक्तिः कृता, ३-'रस्थाने लस्य प्रयोगो विहितोऽतस्ते पराजिताः। अतो म्लेच्छत्वापहाराय व्याकरणमध्येयम्। महाभाष्यकारो वदति—म्लेच्छा मा भूमेत्यध्येय व्याकरणम्।

(२) दुष्टः शब्दः—महाभाष्यकारानुसारं दोषग्रस्तशब्दप्रयोगादनर्थो भवति। यथा मिथ्याप्रयुक्त 'इन्द्रशत्रुशब्देन प्रयोक्तृणां महती हानिर्जाता। अतः दुष्टशब्दप्रयोगनिवृत्यर्थ भाष्यकारो वदति—'दुष्टाञ्छब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्'।

(३) यदधीतम्—अविज्ञात. कण्ठमात्रेणोच्चारितः शब्दो व्यर्थ एव भवति। अतो व्याकरणमध्येयम्—'तस्मादनर्थं माधिगीष्महीत्यध्येय व्याकरणम्'।

(४) यस्तु प्रयुङ्क्ते—व्याकरणज्ञानादेव वाग्योगविदनन्तं जयं प्राप्नोतीत्यध्येयं व्याकरणम्।

(५) अविद्वासः—योऽवैयाकरणोऽभिवादनविधि न जानीते तेन सह स्त्रीवद् व्यवहारो भवति। वैयाकरणायेदृशो व्यवहारो न भवति। भाष्यकारो वदति—स्थीवन्मा भूमेत्यध्येय व्याकरणम्।

(६) विभक्तिं कुर्वन्ति—'प्रयाजा. सविक्तिका कार्य्या' इत्यादेशानुरूप प्रयाजे सविभक्तिकप्रयोगाय वैयाकरण एव प्रभवति। अतो व्याकरणमध्येयम्।

(७) यो वा इमाम्—कुशल आर्त्विजीन वैयाकरण एव भवितु शक्नोति अतो व्याकरणगध्येयम्।

(८) चत्वारि—महता शब्दरूपदेवेन साम्याय व्याकरणमध्येतव्य भाष्यकारो वदति 'महता देवेन न साम स्यादित्यध्येय व्याकरणम्।

(९) उतत्वः—य वागविद् (वैयाकरण) भवति त वाक् स्वयमेव विवृणुते। व्याकरणमध्येतु भाष्यकारो वदति—वाग्नो विवृणुयादात्मानमित्यध्येय व्याकरणम्।

(१०) सक्तुमिव—ये खलु व्याकरणवेत्तारो भवन्ति ते बुद्ध्या वाणी परिष्कृत्य तां प्रयुञ्जते। तेऽन्ततः सायुज्यमुक्ति लभन्ते। अतो व्याकरणमध्येयम्।

(११) सारस्वतीम्—याज्ञिका. पठन्ति—'आहिताग्निरपशब्द प्रयुज्य प्रायश्चित्तीया सारस्वतीमिष्टि निर्वपेद् इति। य खल्ववैयाकरणो याज्ञिकोऽपशब्दप्रयोक्ता भवति स खलु प्रायश्चित्तरूपेण सारस्वतीमिष्टि निर्वपेदिति विधानमस्ति। अतो भाष्यकारो वदति—प्रायश्चित्तीया मा भूमेत्यध्येय व्याकरणम्।

(१२) दशम्यां पुत्रस्य—धर्मशास्त्रानुसार दशमदिवसोत्तरकाले जातस्य पुत्रस्य नाम कुर्यात्। नाम खलु द्व्यक्षर चतुरक्षर वा कृत तद्धित भवेदिति विधानम्। कृत-स्तद्धितस्य वा ज्ञान व्याकरणेनैव भवितु शक्येत। महाभाष्यकारो वक्ति—'न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्'। अतो व्याकरणमध्येयम्।

(१३) सुदेवोऽसि—सुदेवो असि वरुण—इति मन्त्रेण मन्त्रगतं भाव व्याख्याय महाभाष्यकारो वदति यत् सत्यदेवा स्यामेत्यध्येय व्याकरणमिति।

इत्थं महाभाष्यकारेण महाभाष्यस्य पस्पशाह्निके शब्दानुशासनस्यमुख्यान्यानु-साङ्गिकाणि च प्रयोजनानि सम्यग् व्याख्यातानि।

●●

उपमा कालिदासस्य

उपमेतिवृत्तमतिप्राचीनं विद्यते । ऋग्वेदकालादेव सा काव्यमन्दिरे परमपूजनीया देवीव सुप्रतिष्ठिता (सती) सहृदयहृदयाह्लाद कुर्वाणा राजतेतराम्। "मृगो न भीम कुचरो गिरिष्ठा" इत्यादि वैदिकोदाहरणान्यस्या प्राक्तनप्रयोगजात सूचयन्ति । तत्क्षेत्रस्य विशालत्व व्यापकत्वज्ञानेनैवानुमातु शक्यते यत्सा सादृश्यमूलकरूपकोत्प्रेक्षातिशयोक्ति-सन्देहोपमेयोपमापह्नुतिदीपकनिदर्शनाप्रभृतिभिरलङ्कारैस्तन्मूलरूपतया सम्बद्धा। अत एवाप्पयदीक्षितेन स्वीयचित्रमीमासाभिधाने काव्यशास्त्रीयग्रन्थ उपमेदृशी नटीव घोषिता या काव्यरूपरङ्गमञ्चे नैकरूपाणि समाश्रित्य निजनृत्य दर्शयन्ती काव्यरसिकचेतांसि हठाद् रससिक्तानि विधत्ते—

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान् ।
रञ्जयन्ती काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ।।

अप्पयदीक्षितेनोपमाया विविधरूपधारणविषये मुखचन्द्रयोर्दृष्टान्तेन स्वकथ्यमेव विमृष्टम्—

चन्द्र इव मुखमिति सादृश्यवर्णनं तावदुपमा । सैवोक्तिभेदेनानेकालङ्कारभावं भजते । तथा हि चन्द्र इव मुखं मुखमिव चन्द्र इत्युपमेयोपमा । मुखं मुखमिवेत्यनन्वयः । मुखमिव चन्द्र इति प्रतीपम्। चन्द्र दृष्ट्वा मुखं स्मरामीति स्मरणम्। मुखमेव चन्द्र इति रूपकम्। मुखचन्द्रेण ताप शाम्यतीति परिणाम· । किमिदं मुखमुताहो चन्द्र इति सन्देहः । चन्द्र इति चकोरास्त्वन्मुखमनुधावन्तीति भ्रान्तिमान्। चन्द्र इति चकोरा· कमलमिति चञ्चरीकास्त्वन्मुखे रज्यन्तीत्युल्लेख । चन्द्रोऽप्ययं न मुखमित्यपह्नुति । नूनं चन्द्र इत्युत्प्रेक्षा । चन्द्रोऽयमित्यतिशयोक्तिः । मुखेन चन्द्रकमले निर्जिते इति तुल्ययोगिता । निशि चन्द्रस्त्वन्मुखं । च दृश्यतीति दीपकम्। त्वन्मुखमेवाहं रज्यामि चन्द्र एव चकोरो रज्यति इति प्रतिवस्तूपमा । दिवि चन्द्रो भुवि त्वन्मुखमिति दृष्टान्तः । मुखं चन्द्रश्रियं विभर्तीति निदर्शना । निष्कलङ्कं मुख चन्द्रादतिरिच्यते इति व्यतिरेक. । त्वन्मुखेन समं चन्द्रो निशासु हृष्यतीति सहोक्तिः । मुखं नेत्राङ्करुचिरं स्मितज्योत्स्नोपशोभितमिति समासोक्ति । अब्जेन सदृशं वक्त्रं हरिणाहितशक्तिना इति श्लेष.। मुखस्य पुरतश्चन्द्रो निष्प्रभ इत्यप्रस्तुतप्रशसा। एवमुक्तानेकालङ्कारविवर्त्तवतीयमुपमा।

वस्तुत उपमेतरालङ्कारेषु मूलतयोपमागतं सादृश्यमेव तिष्ठति । साधर्म्यमाश्रितस्य (सादृश्यमाश्रितस्य)-अलङ्कारस्यास्यानेके भेदा भवन्तीति काव्यप्रकाशादिकाव्य-

शास्त्रीयग्रन्थपरिशीलनेन परिज्ञायते। काव्यप्रकाशेऽस्या· पञ्चविंशतिभेदा कृता यैरस्या विततरूपस्य दर्शनं विधीयते।

प्राक्तनसस्कृतसाहित्यपरिशीलनादेतदपि तथ्यं याति दृष्टिविषयता यत्तत्रा-लौकिकसृष्टिभूतकाव्यसृष्टिविधानसक्ताना कवीना विषये विविधवैशिष्ट्यप्रख्यापिका नैकोक्तय श्रवणगोचरतां व्रजन्ति याभिस्तत्तत्कविकाव्यगतवैशिष्ट्यानि प्रकाशता यान्ति। कालिदासविषयेऽपीदृशीना सूक्तीना भूयस्त्व विभाति —

१. उपमा कालिदासस्य भारवेरर्थगौवरम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।। (कस्यापि)

२. उपमा कालिदासस्य नोत्कृष्टेति मतं मम।
अर्थान्तरस्य विन्यासे कालिदासो विशिष्यते।। (कस्यापि)

३. कालिदासगिरां सारं कालिदासः सरस्वती।
चतुर्मुखोऽथवा साक्षाद् विदुर्नान्ये तु मादृशः।। (मल्लिनाथ)

४. कालिदासकविता नवं वयः माहिषं दधि सशर्करं पयः।
शारदेन्दुकला च कोमला स्वर्गसौख्यमुपभुञ्जते नराः।। (उद्भट)

५. निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते।। (बाण हर्षचरिते)

६. पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।। (कस्यापि)

७. पुष्पेषु चम्पा नगरीषु काञ्ची नदीषु गङ्गा नृवरेषु रामः।
नारीषु रम्भा पुरुषेषु विष्णुः काव्येषु माघः कविकालिदासः।।

कालिदासप्रणीततत्काव्यमहाकाव्यरूपकाणा विश्लेषणेन विज्ञायत इद यत्तत्काव्येषु यमकानुप्रासप्रभृतीनां शब्दालङ्काराणामुपमोत्प्रेक्षार्थान्तरन्यासरूपकादीनामर्थालङ्काराणाञ्च समुद्भासित सौन्दर्य भासतेतराम्। परन्तूपमालङ्कारयोजने तदीया काव्यकला याति परमां भूमिम्। यद्यपि महाकविकालिदासीया कीर्तिर्विशेषतस्तद् रसभावचित्रणचारुत्वमूलैव। यतो हि स रससिद्ध कवि। चराचरजगतः सूक्ष्मातिसूक्ष्मस्वरूपावलोकने तदीयं प्रातिभचक्षुर्निंतरां शक्तम्। न केवलमेतावदेव स प्रतिभाजातस्य स्वदर्शनस्य (स्वानुभूते) वर्णनेऽपि नितरा क्षमतां भजते। अनुभूतविषयपरं तदीयं लोकोत्तरवर्णनानैपुण्य नूनमेव सर्वातिशायि।

रसमावादिचित्रणे यद्यपि स (कालिदास) विविधालङ्काराणा साहाय्य गृह्णीते परन्तूपमासाहाय्येन स वर्ण्यविषयाणामेकमप्रतिम रूपमुद्घाटयति तेन काव्यरसपानसक्तानां सहृदयानां चेतासि काव्यरसाम्बुधिनिमज्जितानि जायन्ते। उपमाप्रयोगेण वर्ण्यविषयस्य बाह्याभ्यन्तरगतमुभयमपि रूप बिम्बत्व धरते। इतरैरपि रससिद्धैरलङ्कारवादिभिश्च कविभि स्वस्वकाव्येषूपमायोजनानि विहितानि, परन्तु नावाप्यते तदीयकाव्येषु तादृश सौन्दर्य, रूपवैशद्य, गाम्भीर्य, प्रभावोत्पादकत्वमौचित्य व्यापकत्व मनोविज्ञानपरत्व, सूक्ष्मातिसूक्ष्मभावाभिव्यञ्जनं बिम्बग्राहित्वञ्च यादृश कालिदासीयकाव्येषु। नैकानि सन्ति कारणानि कालिदासीयोपमाप्रयोगनैपुण्यस्य। एतत्तु बोधव्यमेव यदलङ्कारपथपथिकानां माघभारविश्रीहर्षप्रभृतीनां कवीनामिव नास्ति तदीया काव्यदृष्टिरलङ्कारपरा। अलङ्कारप्रयोगनैपुण्य प्रकाशयितुन्तैर्विशेषतोऽलङ्काराश्रयणं कृतम्। कालिदासीयकाव्येषु च सर्वत्र रसभावभरिता तदीया काव्यदृष्टिरेव याति समक्ष समेषाम्।

अत्र 'उपमा कालिदासस्य'ति श्लोके उपमाप्रयोगकृते कालिदासस्य, अर्थगौरव-रूपगुणाय भारवे., पदलालित्याय दण्डिन , गुणत्रयस्य (उपमार्थगौरवपदलालित्यस्य) कृते माघस्य प्रशस्ति कृता राजते। अत्रोक्तिगतस्य 'उपमा कालिदासस्य' इत्यशस्य विमर्शोऽपेक्ष्यते।

लोकविश्रुतमहाकाव्यस्य रघुवशस्य प्रथमसर्ग एव कालिदासस्योपमाप्रयोगानुरागो व्यज्यते। स पार्वतीपरमेश्वरावेवं वन्दते—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। (रघु० १/१)

श्लोकेऽस्मिन् भवानी (पार्वती) उपमेयत्वेन तथा वाक् (वाणी) तदुपमानत्वेन एव शङ्कर उपमेयतयाऽर्थश्चोपमानतया तस्याङ्कित । अनेनौपम्यविधानेनापाततोऽर्थोऽयं विलसति चित्तेषु यद् यथा शब्दार्थयोर्मध्ये नित्यसम्बन्धो भवति तथैव पार्वतीपरमेश्वरयोर्मध्येऽपि नित्यसम्बद्ध । औपम्यविधानमिदं याथार्थ्यमनुकूलत्वञ्च दधदपूर्वा पृष्ठभूमिं रचयति कालिदासौपम्यकौशलस्य।

कालिदासौपम्यविधानस्य विशेषतेयं प्रशस्या यत्तत्प्रसङ्गानुकूलतां याथार्थ्यञ्च श्रयते। उपमाप्रयोगेण स (कालिदास·) भावव्यञ्जनया वस्तुनो यथार्थ बिम्बं बिम्बयति। रघुवशगत इन्दुमतीस्वयंवरे सा (इन्दुमती) जयमाला गृहीत्वा व्रजन्ती तत्रस्थ यं यं राजान विहायाग्रे याति, तस्य तस्य राज्ञो मुखे नैराश्यकालिमा तथैव दृश्यतेतरां यथा राजमार्गस्थितानि भवनानि प्रचलन्त्या दीपशिखाया परित्यक्तानि तिमिराच्छन्नानि जायन्ते।

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।। (रघु० ६/६७)

अत्रेन्दुमत्या उपमा दीपशिखया, तत्रस्थाना भूपालानामुपमा राजपथस्थभवनै कृता वर्तते, तया तत्रत्याना भूपालाना हृदयस्थनैराश्यभावस्यातिचारुतया व्यञ्जन जातम्। अनेनैवौपम्यविधानेन कालिदासो 'दीपशिखाकालिदास इत्यभिधानेन गीयते लोके'।

कालिदासस्यौपम्यविधानस्येयमपि विशेषता यत्तस्यौपम्यविधाने तदीयमनोवैज्ञानिकी मनीषा समक्षं प्रकाश्यते। कुमारसम्भवस्य प्रथमे सर्गे यदा ब्रह्मचारिव्यवहारेण कुपिता पार्वत्यन्यत्र गन्तुमुद्यता जायते तदा प्रकटीभूतय शिवस्ता रुणद्धि। तदा तदीया दशा मार्गस्य पर्वतखण्डेनावरुद्धा नदीव जायते या नाग्रे गन्तुं शक्ता न वा तत्र स्थातु शक्ता—

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्धृहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ।।

(कुमार० ५/८५)

अत्रैकमपर चित्रं सन्दर्भेऽस्मिन् नूनं दृष्टिगतं करणीयम् —

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन्।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ।।

(शाकु० ५/१९)

शाकुन्तलस्य पञ्चमे अङ्के स्वराजभवने दुष्यन्तोक्तश्लोकस्याय भाव·—

शकुन्तलां विलोक्य हृदये कथयतश्चिन्तयतो राज्ञो दुष्यन्तस्याय भाव "शीतकाले प्रात. समये विकसित तुषारव्याप्त कुन्दपुष्प भ्रमरो यथा शीताधिक्यान्न तदाघ्रातु शक्नोति न वा तत्सौरभाकृष्ट सन् हातु शक्नोति तथैव दुष्यन्तोऽपि परमलावण्यमयी शकुन्तलामवलोक्य धर्मभयेन न तामङ्गीकर्तुं प्रभवति न च तत्सौन्दर्याकृष्टः सन् अस्वीकर्तुमेव पारयति"।

अत्र शकुन्तलायाः साम्य तुषारयुक्तेन कुन्दपुष्पेण कृत वर्तते। दुष्यन्तस्य च साम्यं भ्रमरेण विहितम्। अत्रत्यमौपम्यविधान निश्चितरूपेण हृद्यं यथार्थञ्चास्ति। 'भ्रमर इव' इति स्थलगतौम्यविधाने मनोवैज्ञानिकं तत्त्वमपि परिलक्ष्यतेतराम्।

कालिदासेन स्वकाव्य औपम्यविधाने तदगतोपमानाना चयन व्यापकक्षेत्रेभ्यो विहित येन तदुपमाक्षेत्र विशालता व्यापकताञ्च यात विद्यते। चरभूतमानवदेवता-पशुपक्ष्याद्यचरभूतवनोपवनसागरपर्वतपृथिव्याकाशपातालललोकशास्त्रप्रभृतय सर्वेऽपि तदीयोपमानस्य केन्द्रभूतत्वेन राजन्ते। तेनोक्तसर्वक्षेत्रेभ्य आवश्यकतानुसारमुपमानग्रहणद्वारा स्वौपम्य सर्वव्यापकत्व नीतम्। कतिपयोदाहरणान्यत्र प्रसङ्गोपेतानि।

रघुवशस्य द्वितीयसर्गे गोसेवाकस्य राज्ञो दिलीपस्य सुदक्षिणायाश्च मध्ये विराजमाना लोहितवर्णा नन्दिनी (गौ) तथैव शोभां धरते यथा रात्रिदिनयोर्मध्ये सन्ध्या सुशोभिता जायते—

'तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या'।।

(रघु० २/२०)

तस्मिन्नेव सर्गे यदा नन्दिनी गृहम्प्रति समागच्छति तदा तदीयच्छटा सूर्यस्य निवर्तमाना प्रभेव भवति—

''प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः''।

(रघु० २/१५)

अत्र नन्दिन्या सूर्यप्रभया कृतमौपम्य नितान्त राजते। शास्त्रीयोपमानमाध्यमेनापि वस्तुसौन्दर्यवर्णने कालिदासो नितरा कौशलमधिगच्छति—

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।

(रघु० २/२)

अत्र नन्दिनीमार्ग सुदक्षिणा तथैवानुगच्छति यथा स्मृति श्रुतेरर्थमनुव्रजति। अस्मिन् श्लोके नन्दिनीमार्गस्य साम्य श्रुतिपथेन (वेदार्थेन) तथा सुदक्षिणायास्तुलना स्मृत्या जाता शास्त्रीयोपमा नून चमत्करोति सर्वान्।

एकमन्यदपि शास्त्रीयौपम्यगत बिम्ब दृश्यम्। रघुवंशे रघुनन्दनो रामो बालिन हत्वा तत्स्थाने राजसिहासने सुग्रीव प्रतिष्ठापयति। औपम्यविधानदक्षिण कालिदासो वदति यद् रामेण सुग्रीवस्तथैव राजसिहासने स्थापितो जायते यथा धातो. स्थाने आदेश स्थाप्यते—

स हत्वा बालिनं वीरस्तत्पदे चिरकाङ्क्षिते।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत्।।

(रघु० १२/५८)

व्याकरणशास्त्रे 'अस्' इति धातो स्थाने 'भू' तथा 'पा' इति धातुस्थाने 'पिब'

इत्यादेशो भवति।

एवमेवान्यान्यपि व्याकरणशास्त्रीयमौप्यम्यानि विहितानि। दृश्यानि कानिचित्—

रघुवशस्य पञ्चदशे सर्गे लवणासुरवधाय प्रस्थित शत्रुघ्नमनुगता रामचन्द्रादिष्टा सेना तथैव व्यर्थता गता यथा 'इङ्' धातो पूर्वमधि' इत्युपसर्गो वैयर्थ्य भजते—

रामादेशादनुगता सेना तस्यार्थसिद्धये।
पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्।। (रघु० १५/९)

व्याकरणशास्त्रमिव दार्शनिकसिद्धान्तोऽपि समलङ्कृत औपम्यविधानेन। अधस्तने श्लोके 'कारणगुणा कार्यगुणानारभन्ते' इति दार्शनिकसिद्धान्त औपम्यविधानगत शोभते—

''न कारणात् स्वात् बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्''।
(रघु० ५/३७)

'अजस्तथैव स्वकारणभूतस्य पितुरनुरूप एवासीत्। न तस्माद्भिन्न स्वल्पमपि यथा खल्वेकस्मात् दीपादन्यो दीप प्रवर्तितो जायते। दार्शनिकसिद्धान्तेनानेनात्रत्यमौपम्य नितान्त सारगर्भित यतो हि तेन रघुवशीयनरेशानुरूपमेवाजस्याचरण प्रकाश्यतां याति।

प्राकृतिकोपादानं गृहीत्वा कालिदासेन सौन्दर्यस्य मूर्तिमदाकर्षकस्वरूप समुद्घाटयितुमपि साफल्यमेति। कतिचिदुदाहरणैरस्य कथनस्य प्रामाण्यं साधयितु युक्तम्—

अभिज्ञानशाकुन्तलस्य पञ्चमेऽङ्के दुष्यन्तराजभवने तपोधनाना मध्ये विद्यमाना शकुन्तला तथैव भ्राजते यथा शुष्कपत्राणा मध्ये किसलय (विराजते)—

कास्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्।।
(शाकु० ५/१३)

सन्दर्भेऽस्मिन् कुमारसम्भवे तपस्यारतस्य महादेवस्य चित्रं दृष्टिविषयता नेतव्यम्। शरीरस्थचरणशीलानां वायूना निरोधेन निश्चलो महादेवस्तथैव शोभते यथा वृष्टिविहीनो मेघः तरङ्गहीनो जलाशय, वायुरहितस्थानस्थापितदीपश्च स्वस्वस्वरूप धरते। एकत्रैवोपमेयभूतस्य शिवस्योपमानत्रयेण (मेघेन, जलाशयेन, दीपेन च) सह साम्य निश्चयमेव चमत्कारि। अत्र मालालङ्कारस्य प्रभा नितरां भासतेतराम्—

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्।।
(कु० सं० ३/४८)

एकमपर चित्रमौपम्यमण्डितमवलोकनीयमत्र। कुमारसम्भवे कामवियोगविधुरा दु खदुर्बला कामपत्नी रतिस्तत्सयोगाशया तथैव त (कामदेव) प्रतीक्षमाणा काल यापयति यथा दिवसे किरणनाशमलिना चन्द्ररेखा रात्रिं प्रतीक्षमाणा जायते। अत्र मलिनचन्द्ररेखया विरहदु खकातराया रते साम्य नितान्तं हृद्यम्—

अथ मदनवधूरूपप्लवान्तं व्यसनकृशा परिपालयांबभूव।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम्।।

(कु० स० ३/४६)

प्रसङ्गेऽस्मिन् महनीयमेक वैशिष्ट्य नून चिन्तनीय यत् कालिदासो न सर्वत्र मानवस्यैव प्रकृतिगतोपमानसाहाय्येन चित्र चित्रयितु यतते, प्रत्युत स अनकेत्र प्रकृतिगत बिम्ब बिम्बयितु मानवानामप्युपमानत्वं समाश्रित्य स्ववर्णनकला कृतार्थयति। दर्शनीयमेक बिम्ब कथ्यानुरूपम्—

आदीप्तवह्निसदृशैर्मरुताऽवधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः।
सद्यो वसन्तसमयेन समाचितेयं
रक्तांशुका नववधूरिव भाति भूमिः।।

(ऋतु स० ७/२१)

वसन्तचित्रमिद नूनं हृद्यम्। पलाशवृक्षशाखा विकसितरक्तपुष्पभरिताः, पवन-विकम्पिता सत्य आदीप्तवह्निरिव जायन्ते, ताभिः समाच्छादिता वनभूमिर्वसन्तसमये रक्तांशुकधारिणी वधूरिव भाति।

अत्र वसन्तभूमेर्नववध्वा सह कृत साम्यमतिचारुत्वमयम्।

एकत्रैव नैकोपमासङ्गमस्य कलकमनीयचित्र समवलोकयितु रघुवंशत्रयोदशसर्गस्थ गङ्गायमुनयो. सङ्गमगतं वर्णनमधोऽवश्यमेव समवलोकनीयम्—

क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव।।

(रघु० १३/५४)

क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः प्रदेशा।।

(रघु० १३/५६)

अत्र यमुनाया नीलजलतरङ्गानां गङ्गायाश्च श्वेतजलधारामेलनेन जातं कमनीय

रूप विलोक्य महाकविकालिदासो नैकोपमाभिस्तद्गत बिम्ब बिम्बितमिव कृत समसमक्षम्।

एवमेव प्रकृतिगतचित्रद्वयमपि दृष्टिगत कर्त्तव्य यतो हि तत्रासङ्गिकत्व नासमीचीनम्—

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानी
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि।।

(मेघदूते, पूर्वमेघे/२६)

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।।

(मे० दू०, पूर्वमेघे/३३)

प्रथमोदाहरणे वर्ण्यताङ्गताया वेत्रवत्या जलस्य भ्रूभङ्गमुखेन सदौपम्यविधान तथा द्वितीय उदाहरणे शिप्रावातस्य प्रार्थनाचाटुकारप्रियतमेन विहित साम्यं महच्चारुत्व धत्ते तथा सहृदयचित्तेषु-एकमपूर्व रमयणीयञ्चित्र प्रकृतिगत बिम्बयति।

कालिदासस्य महदिद काव्यकौशल यत् स मानवचित्तस्य सूक्ष्मातिसूक्ष्म भाव स्वप्रातिभचक्षुषा विज्ञातुं तथा निजौपम्यविधानद्वारा तत्प्रकाशनमपि चारुतया विधातु क्षमतामेति। कतिपयोदाहरणानि दृष्टिविषयता नेतु युक्तानि।

शाकुन्तलस्य प्रथमेऽङ्के स्वप्रियभाजनभूता शकुन्तलामपहाय स्वनगरम्प्रति प्रस्थितस्य दुष्यन्तस्य दशा प्रतिवातं नीयमानस्य तद्ध्वजस्येव जायते यद्दण्डन्त्वग्रे गच्छति परन्तु ध्वजवस्त्राणि पृष्ठभाग उड्डीयन्ते—

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य।।

(शाकु० १/३३)

सामाजिकौपचारिकबाधेन यद्यपि स्वप्रिया शकुन्तलां तत्र वने त्यक्त्वा दुष्यन्त· शरीरेणाग्रे व्रजति परन्तु तदीय शरीरस्थं मनः शकुन्तलागतमेव विद्यते। अत्र दुष्यन्तमनस औपम्यं ध्वजवस्त्रेण तथा शरीरस्यौपम्य ध्वजदण्डेन विहित जायते। औपम्यविधानेनानेन दुष्यन्तहृदयगतः सूक्ष्मभावो प्रेमविषयक सुष्ठु व्यज्यते।

कालिदासोपमाप्रयोग औचित्यनिर्वाहोऽपि परिदृश्यते। स देशकालपात्रावस्थानुरूप

शब्दार्थयोजने सर्वातिशायी विद्यते। शाकुन्तलस्य चतुर्थेऽङ्के शकुन्तलागन्धर्वविवाहवृत्तज्ञानानन्तरं शकुन्तलाम्प्रति कण्वस्य गम्भीरमधस्तनकथनं प्रमाणयति तथ्यमद —

'दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुति पतिता। वत्से, सुशिष्यपरिदत्ता विद्येवाशोचनीयासि सवृत्ता'। (शा० ४ अङ्के)

अत्राश्रमपालितशकुन्तलाया औपम्य यज्ञाहुत्या तथा दुष्यन्तस्यौपम्य यज्ञाग्निना विहितम्। तदैव तस्या (शकुन्तलाया) औपम्य विद्यया तथा दुष्यन्तस्य सुशिष्येण कृता नितान्तमौचित्य भजते। तपोवनसदृशे पावनस्थाने महर्षिकण्वसमक्षदृष्टौ शकुन्तलाया दुष्यन्तस्य च क्रमशो यज्ञीयाग्निना सुशिष्येण च, हविषा (आहुत्या) तथा विद्यया सह कृतमौपम्यमन्तरा किमन्यदौपम्य भवेत्।

एवमेव कामप्रियसौन्दर्यलोभिदुष्यन्तदृष्ट्या या शकुन्तलाऽनाघ्रातपुष्पेण, नखाग्रालूनकिसलयेन, अखण्डितरत्नेन, अनास्वादितरसमधुना, पुण्याखण्डफलेन च सन्निभं सौन्दर्य धत्ते—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।। (शा० २/१०)

सैव दुष्यन्तराजभवने तपोवनतपस्विशार्ङ्गरवदृष्ट्या मूर्तिमयी सत्क्रिया जायते—

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया। (अभि० ५/१५)

अत्रोभयस्थलयोर्दुष्यन्तशार्ङ्गरवाभ्यां कृतं विभिन्नमौपम्य सर्वाशत औचित्य याति। दुष्यन्तदृष्ट्या यदि शकुन्तलाऽनुपमसौन्दर्यनिधिरस्ति। तर्हि शार्ङ्गरवदृष्ट्या सा मूर्तिधारिणी तपस्या भवति। दृष्टिभेदेन शकुन्तलाया रूपद्वयमिति ध्येयमत्र।

कालिदासोऽस्ति भारतीयो महाकविस्तस्य काव्येषु सर्वत्र भारतीया भावना भवेद्वा सांस्कृतिकी, सामाजिकी धार्मिकी वा—चित्रिता विलसति। भारतीयभावनाया परमोदात्तमुच्चञ्च रूपं बिम्बितं जायते तदौम्यविधानेषु। एतत्सम्बद्धचित्रद्वितय दर्शनीयम्। शाकुन्तलस्य चतुर्थेऽङ्के पतिगृहप्रस्थानकाले विरहदुःखकातरां शकुन्तलां कण्वो वदति—

तनयमचिरात् प्राचीवार्कं प्रसूय च पावनम्।
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि।।
(शाकु० ४/१९ उ०)

अत्र शकुन्तलाया साम्य प्राचीदिशा तथा भावितनयस्य (भरतस्य) उपमाऽर्केण (सूर्येण) कृता वर्तते। औपम्यविधानेऽस्मिन्नतिविशाल भारतीयतत्त्व निहित याति, यतो हि शकुन्तलाया भावी तनयो भरतो भविष्यति यन्नामाधारतयैवाय देशो 'भारते'त्यभिधानेन लोकख्याति यास्यति।

इत्थमेवाभिज्ञानशाकुन्तलस्य चतुर्थाङ्कगतमधस्तनमुदाहरणम्प्येतत्तत्त्वदर्शनाय दृष्टिगतं करणीयम्—

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।। (४/४)

अत्रापन्नसत्त्वाया शकुन्तलाया अग्निगर्भया शमीलतया सह विहितोपमा नितरा प्रभावातिशयमुच्चतत्त्वञ्च प्रकाशयति। शमीलता यथा तेजस्विन'मग्नि' धारयति तथैवेय कण्वदुहिता (शकुन्तलाऽपि) स्वगर्भेऽग्निसम तेजस्विनं पुत्रं भरतेतिनामक धत्ते इत्यर्थो व्यञ्जितो भवति।

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के पतिगृहप्रस्थानकाले प्रणमन्ती शकुन्तला कण्वोऽधोलिरिवताशीर्वादमूलकवचनै कृतार्थयति—

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि।। (४/७)

कण्वाशीर्वचनस्यायमभिप्राय· यथा शर्मिष्ठा स्वपत्युर्ययातेरतिप्रियाऽऽसीत्, तथैव त्व स्वभर्तुर्दुष्यन्तस्य प्रियतमा भव। यथा च सा (शर्मिष्ठा) सम्राज पुत्र पूरु जनयामास, तथैव त्वमपि (शकुन्तलाऽपि) चक्रवर्तिन तनयमाप्नुहि। अत्र शकुन्तलाया शर्मिष्ठया, दुष्यन्तस्य ययातिना, शकुन्तलापुत्रस्य शर्मिष्ठापुत्रेण पूरुनामकेन सह कृतोपमा नूनमौचित्य भजते। अनेनौपम्यविधानेन महर्षिकण्वस्य आशीर्वादो नितान्तं सार्थक्यं याति।

अत्र समासतो वक्तुमिद युक्तं यत्कालिदासेन स्वकाव्येषु यथौपम्यविधान विहितन्तच्चान्यत्र सुदुर्लभमेव। प्राक्तनेषु काव्येषूपमायोजनानि जातानि साम्प्रतमपि जायन्तेग्रेऽपि भविष्यन्ति। परम्मेतत्तथ्यन्तु स्वीकर्तव्यमेव सर्वै. काव्यरसास्वादपरैर्भावकै: सहृदयपाठकैश्च यत्कालिदासविहितमौपम्यविधानं सर्वातिशायित्वेन युगयुगान्त तत्कीर्ति विस्तारयिष्यति समस्तकाव्यलोके। तदौपम्यविधानस्यौचित्य, यथार्थता, भावाभिज्ञकता, मनोवैज्ञानिकतोपमानग्रहणव्यापाकता, प्राकृतिकोपमानसाहाय्यं, सूक्ष्मातिसूक्ष्मभावव्यञ्जना, विशालोदात्तस्वरूपञ्च न केनापि स्वदृष्टिपथादपसारयितुं पार्यते। औचम्पविधानगतास्ते गुणा अधस्तनाया उक्तेर्याथार्थ्यं घोषयन्त एव स्थास्यन्ति सहजत.।

'उपमा कालिदासस्य'

●●

अहिंसयैव विश्वशान्तिः

अस्माक समक्ष विश्वशान्ते समस्या समुपस्थिता। अतोऽत्र विचारणीय यत् केय नाम विश्वशान्तिरपि च कथमस्ति तदपेक्षेदानीम्। अद्यतन ससार चरमोन्नति गते वैज्ञानिके युगे स्वकीय नानासुखसौविध्यमूल भौतिक लक्ष्यमधिगन्तु धावतितराम्। नानाविधैर्वैज्ञानिकैराविष्कारैर्वयं स्वीय जीवन सर्वतोभावेन शुभेनाशुभेन वोपायेन सफलीकर्तु प्रयतामहे। विज्ञानरूप एतादृशो निधिरधिगतोऽस्माभिर्येनानेकान् प्रकृतिगतान् नियमान् अपि पराजयितु शक्ता वयम्। कि बहुना मृत्युलोकगतमाशातीत साफल्य विधायाधुना वय चन्द्रलोकादिकमपि विजित्य तत्र यथाभिलषित कर्मकर्त्तु मुद्यता । आशासे यन्नास्ति स समयो दूर यदा वय चन्द्रलोकादिवासिनोऽपि भविष्याम । विज्ञानेनास्माकं कृते बहूनि साधनानि प्रदत्तानि। स्वल्पेनैव कालेन वय वायुयानादिभिर्दूरादपि दूर प्रदेश भ्रमितु समर्था । अखिलपृथिवीभ्रमणन्तु सञ्जातमेव सुकरम्। आकाशस्थितविविधग्रहयात्राऽपि सुगमा जाता। स्वगृहस्थिता सन्त एव वय न केवल स्वदेशस्य विभिन्नभागेषु घटितानां वृत्तान्ताना घटनाना वाऽवगति कुर्मोऽपि तु दूरस्थदेशानामपि वार्ता झटिति ज्ञातु शक्नुम । सम्प्रति स्वल्पेन समयेनाल्पेन च प्रयासेन वैज्ञानिकयन्त्रद्वाराऽत्यधिकमात्राया नानाविध मानवीयजीवनोपयोगि वस्तुजातमुत्पादयितु शक्यते। एकाक्यपि मानवस्तावन्मात्र वस्तूत्पादयितु प्रभुर्यत् शतसख्यका अपि जनास्तथा कर्तुमक्षमा । कथनस्याभिप्रायो यत् स्वकीयसुखसौविध्याय वय बहूनि सरलानि साधनान्यधिगतवन्त.।

परञ्च दु खस्य विषयो यद् विज्ञानेन प्रदत्तेषु विविधसाधनेषु मानवैरधिगतेष्वपि नास्त्यद्यतनो मानव शान्त । "अशान्तस्य कुत सुखम्" अर्थात् यो हि खल्वशान्त स कथ सुखं गन्तु प्रभवेत् ? येन विज्ञानेन मानवाना सुखशान्त्यादिकमपेक्षित तेनैव तेषा विनाशकालोऽप्यधुनोपस्थित । कि कारण येनाशान्ता वय यत्र तत्र शान्तिस्थापनार्थमाक्रोश कुर्म· ? को वा हेतुरत्र येन सर्वत्र विश्वशान्तिसमस्या सर्वाधिकमहत्त्वमाहवति ? प्रसङ्गेऽस्मिन् वक्तुमीहेऽधोरीत्या।

वैज्ञानिकसाधनेन दूरस्था अपि देशा समीपस्था इव सञ्जाता । चेद् विश्वे कुत्रचिदपि स्थलेऽशान्ति स्यात्तर्हि सर्वत्रैवाशान्ति भवितु शक्नुयात्। यदि क्वचिदपि युद्ध प्रारभेत तदा तस्माद्युद्धान्न केवलं तत्सम्बद्धा एव देशा अपि तु तटस्था अपि देशा आत्मनस्त्रातुमसमर्था । किं बहुनाऽस्मिन् युगे निर्मितान्येतादृशानि विध्वसकास्त्राणि यैरखिलोऽय ससार क्षणेनैव विनाशयितु शक्यते। सत्यमेवेद कथन यदधुना विश्वयुद्धस्यार्थोऽस्ति

विश्वविनाश । अय खलु सर्वाधिकमहत्त्वपूर्णो हेतुर्येन विश्वशान्तिसमस्या महत्त्व गता । राष्ट्रसङ्घस्य स्थापनाया इदमेव बीजमासीत् । युद्धभीतास्तज्जन्याशान्तित्रस्ता देशा एव तत्सस्थापनाया प्रयतवन्त । विश्वजनीनाया अशान्ते कि बीजम् ? अय प्रश्नो यदैव समायाति समक्षमस्माकं तदैव वय गम्भीरतया विचारयितुमुद्यता भवाम । कृते च विचारे जनाना राष्ट्राणा पारस्परिकभीतिरेवाशान्तिहेतुत्वेन प्राप्यते । यथैको जनोऽपरस्माद् बिभेति तथैवेको देशोऽन्यदेशात् । इत्थञ्च वक्तु शक्यते यदुद्भूयमाना पारस्परिकभीतिरेव कारणमशान्ते· । अस्माकं पारस्परिकभीतेश्च जनाना पाशविकी हिसावृत्तिरेव कारणम् ।

विश्वस्योन्नति गतेषु महद्देशेषु (अमेरिकारूसादिदेशेषु) नाना-प्रकाराण्यणु-बमोद्जनबमादिविध्वसकास्त्राणि निर्मितानि निर्मीयन्ते च । तत्र भीतिरेव हेतु । इमामेव भीतिमाश्रित्य सर्वतोभावेन सम्पन्नास्ते देशा भयङ्करास्त्राणा परीक्षणार्थ यदा कदा सलग्ना दृश्यन्ते । सैन्यबलोपरि महद्धनव्यय ते कुर्वन्ति । नास्ति काप्यतिशयोक्तिरस्मिन् कथने यत् सैन्योपरि क्रियमाणेन धनव्ययेन ते देशा ससारस्य बुभुक्षया प्रताड्यमानान् कोटिशो जनान् सुखिन सम्पादयितु शक्ता· स्यु । परञ्च ते न खलु समुद्यता दयार्द्रचित्ताश्चिन्ताशीला वा भवितुमसहायानामुपरि । ते तु सदा भीतिमेव चिन्तयन्ति तथा तामेव दूरीकर्तु विध्वसकास्त्राणा निर्मितौ प्रतियोगितायामवतरन्ति । पारस्परिकभीतिरेवेय यया सेन्टोनाटोप्रभृतीनि सैन्यसङ्घटनानि सञ्जातानि । भयभीता देशा तेषु सङ्घटनेषु सम्मिल्य निर्भया भवितुमभिवाञ्छन्ति परञ्च सफला न भवन्ति । अद्यापि तेन विचारयन्ति यद् यावत्कालपर्यन्त सर्वेषा हृदयेभ्योऽपरान् प्रति जायमाना हिसावृत्तिर्दूरी न भविष्यति तावत्कालपर्यन्त वास्तविकी शान्तिरेव न भविष्यति ।

विचारयतु कोऽपि विवेकशीलोऽद्यतनस्य विश्वस्य स्थिति तदनन्तर स एव ज्ञास्यति यद् विश्वशान्तिमार्गे को विघ्न ? कश्चावरोधक ? जानन्त्येव जना यद् विश्व-शान्तिस्थापनार्थ स्थापितो राष्ट्रसङ्घ. कथ सफलता नाधिगच्छति । साम्प्रतिकेऽखिले खलु संसारे भयवृत्तिमाश्रित्याधिकाशराष्ट्राणा मध्ये दलद्वय जातम् । एकस्मिन् खलु दले साम्यवादिरूसचीनादिदेशानामपरञ्चामेरिकाब्रिटेनादीना वर्तते । एतयोर्दलयोस्ताण्डवनृत्य यदा कदाऽऽयोजिते राष्ट्रसङ्घस्याधिवेशने दरीदृश्यते । श्रीलङ्काफगानिस्तानादिदेशेषु हिसाया भयावह ताण्डवनृत्य जायते येन प्रतिदिनमसख्याका जना कालकवलिता भवन्ति । समस्ते लोके नास्तीदृशो देशो येन हिंसाया दुष्परिणामो नाधिगत । स्वाधीनतावाप्तिकालेऽस्माक देशे हिंसावृत्त्या यादृशो रक्तप्रवाहो जातो निरपराधजनाना स तु स्मरणमात्रेण हृदय भृश पीडयति । चीनभारतयुद्धे भारतपाकिस्तानयुद्धे च जायमाना हिसा केन न ज्ञायते? अधुना स्वदेशस्य पंजाबराज्ये कश्मीरराज्ये पूर्वोत्तरराज्येषु च हिसाकर्मव्यापृता क्रूरा जना प्रतिदिनं निरीहान् जनान् घ्नन्ति । निर्दोषान् पीडयन्ति, बहून् प्रियभूतान्यपि

स्वगृहाणि परित्यक्तु च विवशान् विदधति। लोकतन्त्रात्मकेऽपि स्वदेशे बहवो जना गृहविहीना शरणार्थिन सन्त क्लेशेन जीवन यापयन्ति। दशाया ईदृश्या हिसैव कारणत्वेन विराजते। चेद्वयं विद्मो हिसा सकलानर्थमूल तर्हि समापतति कर्त्तव्यमस्माक यद्धिसावृत्ति विहायाहिंसावृत्तिमङ्गीकुर्याम। नूनमस्माभिबाव्य यद् पारस्परिकघृणेर्ष्यादिग्रस्ते ससारेऽस्मिन् हिसावृत्त्या कथमपि कल्याणस्य न सम्भव·। कल्याणाभावे तु विश्वशान्तिस्थापनाप्रसङ्गस्तु दूरे आस्ताम्।

पापात्पापमेव जायते। अधर्मादधर्म एव विवर्धते। इत्थमेव हिंसया हिसैव प्रादुर्भवति। हिसावृत्ति सदैव शान्ति स्थापयितुं कस्यचिदपि विवादस्य च समाधान विधातु सुतरामक्षमा। प्रसङ्गेऽस्मिन् बहून्युदाहरणानि समुपस्थापयितु शक्यन्ते। न केवलमस्माक देशेऽपि तु विश्वस्यानेकदेशेषु बहूनि युद्धानि जातानि परञ्च तत्र शान्ते स्थानेऽशान्तिरेवाभूत्। अह पृच्छामि यत् शान्तिस्थापनार्थमुद्घोष्यमाणेन प्रथमविश्वयुद्धेन कि ससारे शान्तिः सस्थापिता? कि द्वितीयेनापि विश्वयुद्धेन सा शान्तिरधिगता? कि मिस्रदेशे, हिन्दचीनदेशे, कोरियादेशे, जर्मनीदेशे च हिसया शान्तिरभूत्? किमिदानी समस्तदेशेषु हिसया शान्तिसस्थापन सुकरम्?

वक्तुमिद शक्यते यत् हिसया विश्वशान्ते कथमपि न सम्भव। एक एव मार्गो येन वय संसारे शान्ति स्थापयितु समर्था स्याम। स तु मार्गोऽहिसाया मार्ग, अशोकस्य महात्मनो गान्धिनो गौतमबुद्धस्य च मार्गोऽस्ति। विश्वशान्त्यर्थ हिंसासाधनस्य वैफल्यं विलोक्येदानी सर्वे जना· सर्वे च देशाः मनसा हिसावृत्ति नाभिलषन्ति। विद्यन्त ईदृशा जना ये साम्प्रतमहिंसाया स्वरूपमेव न जानन्ति। ते तु हिसाया अभावोऽहिंसा इति मन्यन्ते। तेषां मते परहननाभाव एव अहिंसेति कथ्यते। वक्तु शक्यते यदेषा भ्रान्तिरेव जनानाम्।

अहिसा केवलमाचरणस्य स्थूलनियम एव नास्ति, अपि तु सा मनस एतादृशी वृत्तिरस्ति यस्या खलु द्वेषेर्ष्यादीनां दुर्वृत्तीना लेशमात्रमपि न भवति। भयद्वेषेर्ष्यादिरहित एव हृदयेऽहिसाया. स्थापना भवितुं शक्नोति। अहिसा केवलं निवृत्तिरूपा प्रक्रियैव नास्त्यपि तु सा बलवती प्रवृत्तिरूपा प्रक्रियाऽऽस्ति। अहिंसाया तीव्रकार्यसाधिका शक्तिरस्ति। कोऽपि जन· कस्यचिदपि प्राणिनो वधं न करोत्यत एव सोऽहिंसक इति कथनं हास्यास्पदमेव। प्रसङ्गेऽस्मिन् अवश्यं बोद्धव्यं यदहिसा न खलु निर्बलानामशक्तानाम् वास्त्रम्। "अशक्तस्तु भवेत्साधुः" इतिवत् अहिंसकाना साधुत्व न तथा यथाऽशक्तानाम्। एतद्विपरीतमहिंसाशक्तानां, सबलानां, निर्भयानां वा जनानामस्त्रं यतो हि ये खलु सर्वतोभावेन भयरहिताः, सर्वथा मानवीयदुर्वृत्तिरहितास्ते जना एवाहिंसासिद्धान्तं प्रतिपालयितु समर्था.। अहिसाया कदापि नायमभिप्रायो यत् "अहिसाया." कायरता जायते। कायरो जनो, भयभीतो लोको वा न

कथमपि तद् व्रत स्वकीये जीवने कार्यरूपेण परिणमयितु प्रभवेत् ? अहिसा प्रेममूलाऽस्ति। तस्या भयस्य सर्वथाऽभावो भवति। सामाजिके क्षेत्र एषा प्रेमस्वरूपा सती दृष्टिगोचरता याति। अहिसा शिक्षयति "आत्मवत् सर्वभूतेषु य पश्यति स पश्यति"। आर्थिक-क्षेत्रेऽहिसा सहयोगपूर्वकमुत्पादने वितरणे भोगे च प्रकटिता भवति। राजनीतौ सा लोकनीतिरूपेण प्रकाश गच्छति। नून जनाना मध्ये पारस्परिको विश्वास , पारस्परिकस्नेहश्च यदि प्रकटीभवेत्तदा शान्तिरनायासेनैव स्थापिता स्यात्। "वय सुखपूर्वक जीवन धारयामोऽन्येऽपि जीवन सुखपूर्वक यापयन्तु" एतावन्मात्रेणैवाहिसासिद्धान्तस्य चारितार्थ्य न भवति प्रत्युत परेषा जीवने साहाय्यदानमहिसाया वास्तविक स्वरूपम्। भयत्रस्तेऽस्मिन् ससारे केवल राज्यशासनेन तन्निर्मितनियमेनैव (Law) च सर्व कर्तु न शक्यते। नियमेन वेश्यावृत्ति· निराकर्तु शक्यते, परन्तु "मातृवत्परदारेषु" इति भावना तु तेन न स्थापयितु शक्यते। चौर्ये कृते कस्यचिदपि चौरस्य कृते दण्डविधान विधीयेत परञ्च बुभुक्षापीडिताना जनाना समक्ष भोजनं कुर्वता जनाना कृते न कोऽपि नियमस्य प्रतिबन्धो येन ते भोजनमकृत्वा स्वयं बुभुक्षिताना कृते तद्दद्यु । वस्तुत सत्याहिसयोर्मध्ये न कोऽपि भेद·। तथ्यमिद महात्मना गान्धिना स्वीकृतम्। तस्य मतमस्ति यदहिसामन्तरा सत्यस्य प्राप्तिर्न भवति।

एतादृश्यहिसा, यस्यां भयस्य सर्वथाऽभावो वर्तते, यस्या पारस्परिकेर्ष्याद्वेषादीना गन्धलेशोऽपि नास्ति, यस्या पारस्परिकसहयोग स्नेहश्च वर्तेते। यदि समस्ते लोके क्रियारूपेण स्थापिता स्यात्तदा कथ न विश्वशान्ति स्थापिता स्यात् ?

अह मन्ये दृढीयान् च मे विश्वासो यत् प्रतिष्ठापितायाञ्चोक्ताहिसाया विश्वे सद्य एव भयस्थितिर्दूरीभवेत्, दूरीभूतायाञ्च भयस्थितौ सुगमतया विध्वसकास्त्राणा निर्मिति समाप्ति गच्छेत्, सङ्कीर्णा सङ्काश्च निर्मूला भवेयु । कि बहुना, राष्ट्रसङ्घोऽपि स्वसाफल्यमधिगन्तुं विश्वशान्तिञ्च विधातु प्रभवेत्।

परमामोददायिनीयं स्थिति यद् रूसामेरिकादिदेशाना शासकास्तथा अन्यदेशीयाश्च नेतारो हिसावृत्तेर्भयावहपरिणाम विचार्य विलोक्य च निरस्त्रीकरणस्य वार्त्तामारभन्त। राष्ट्रसङ्घीया सदस्यदेशा प्राणपणेन निरस्त्रीकरणाय चेष्टन्ते। आशास्यते समेषा देशानामभिलाष शीघ्रमेव कार्यान्वितो भविष्यति। यदासौऽभिलाष· कार्यान्वितो भविष्यति तदा नानाविधविध्वंसकास्त्राणामुपरि क्रियमाणो धनादिव्ययो न भविष्यति। एव विधिना सुरक्षितेन विपुलधनेन राष्ट्रनिर्माण भविष्यति। रूसामेरिकासदृशा धनधान्य-सम्पन्नवैज्ञानिकसाधनयुताश्चेद् देशा सैन्यसज्जाया क्रियमाण धनव्ययं विहाय स्वधनं निर्धनानामधोगतानाञ्च राष्ट्राणा विकासाय तेषां दारिद्र्यविनाशीकरणोपायेभ्यो दद्युस्तदा नूनमेव विश्वस्य कल्याणं स्यादपि च तेषां कीर्ति चिरस्थायिनी स्यात्।

अन्तेऽह सुष्ठु वक्तु शक्नोमि यदहिसयैव सर्वाभिप्रेतविश्वबन्धुत्वभावना सुसस्थापनीया स्यात्।

''अयं निजः परो वेति गणनालघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्''।।

किं बहुनाऽधस्तनं सर्वोदयलक्ष्यम्—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।

अधिगन्तु सुकरं स्यादस्मिन् विषमतामूलके कलहप्रधाने च ससारे। आशासे हिसाज्वालादह्यमानाना जनाना रक्षार्थमयमेव एको मार्गो यत् सर्वे हिसावृत्ति विहाया-हिसामार्गमाप्नुयुरिति।

●●

वीरभेदचतुष्टयं तदपेक्षा च

(विशेष निबन्धोऽय चीनपाकिस्तानयोराक्रमण दृष्टिगत कृत्वा बहुकालपूर्व लिखित आसीत्)

संस्कृतालङ्कारशास्त्रस्याचार्यै स्वस्वग्रन्थेषु काव्यरसानां सुविस्तृतरूपेण विवेचन कृत वर्तते। काव्यरसस्य सर्वेषु भेदेषु वीररस प्रमुखोऽस्ति। यतो हीय भारतमही पुराकालादेव वीराणा भूमिरस्ति, अत संस्कृतसाहित्येऽस्य रसस्य बहून्युदाहरणानि यत्र तत्र निबद्धानि सन्ति। अस्य रसस्योत्साह स्थायीभाव., उत्तमप्रकृतय: पुरुषा अस्याश्रया, महेन्द्रोऽस्य देव, विजेतव्यशत्रवादय आलम्बनविभावा, युद्धादिसहायकसाधनाद्यन्वेषणादयोऽनुभावा, धृतिमतिगर्वस्मृतितर्करोमाञ्चादयो व्यभिचारिभावाश्च भवन्ति। यतो हि रसस्य मूल भवति स्थायिभाव, अत वीररसस्य स्थायिभावस्योत्साहस्य विवेचन प्रसङ्गोपेत वर्तते। उत्साहस्य लक्षणमस्ति —

''कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते''।

नानाविधकार्याणा प्रारम्भे य स्थिरतरस्त्वराजनकश्चित्तवृत्तिविशेषो लक्ष्यतेतरा स एवोत्साहेति नाम्ना कथ्यते विद्वद्भि। अयमेवोत्साहोऽध्यवसायेत्यभिधानेनापि ज्ञायते। उक्तञ्चामरकोशे—

''उत्साहोऽध्यवसायः स्यात्''।

एष एवोत्साहो विक्रमबलरूपेण त्रिविधशक्तिस्वपि परिगण्यत आचार्यकौटिल्येन—

''शक्तिस्त्रिविधा' ज्ञानबल मन्त्रशक्ति·, कोशदण्डबल प्रभुशक्ति, विक्रमबल-मुत्साहशक्ति''।

उत्साहोऽय ससारेऽस्मिन् सर्वविधमहत्त्वपूर्णकर्मणा मूलमस्ति। विशेषतो राज्ञां शासकानां वा त्वय राजकर्मणामाधारशिलेवास्ति। उत्साहयुता एव राजानो राजपदविभूषिता पुरुषाश्च सम्यक्तया प्रजाकल्याणकरकार्याणि स्वदेशवासिना परिपालनञ्च कर्त्तु समर्था भवन्ति। 'साधनोपायसहायदेशकालविभागविनिपातप्रतीकारसिद्धि'नामकपञ्चाङ्गै सयुक्ताऽपि राजनीति कार्यवस्तुषु दक्षता (उत्साह) तथैवानुसरति यथा कृष्यादिप्रवृत्तो जन दैवमपेक्षते—

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते।।

(कि द्वि १२)

वस्तुत राज्यश्रीरुत्साहशालिभिरेव राजभिरुपभोक्तु शक्यते । सुष्ठूक्त केनचित्—

'प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते' ।

न केवल राज्ञा शासकाना वा कृत एवोत्साहस्य महिमा, अपि तु समेषा महापुरुषाणा, विदुषा, कलाकाराणा, सैनिकाना, कर्मकराणा, समाजसेविना वीराणाञ्च स्वस्वकर्मप्रवृत्तावुत्साह एव मूलरूपेण निहितो भवति । महापुरुषाः समाजसेविनश्चोत्साह-कारणादेवैतादृशाश्चर्यकराणि कार्याणि सम्पादयन्ति यान्यस्माक कृते आदर्शस्वरूपाणि भवन्ति । उत्साहमन्तरा विद्वासो विविधविद्यार्जने तासा वितरणे च, कलाकारा. काव्यनाट्यचित्रादिनिर्माणे, समाजसेवका सर्वलोकहितकारकानेककर्मसम्पादने च नैव समर्था भवितु शक्नुवन्तीत्यत्र न काचिदत्युक्ति । सैनिकवीराणा कृते तूत्साहस्य महत्त्व सर्वाधिकमस्ति । वीरा युद्धभूभाग अनायासत स्वजनान् विस्मृत्य, स्वप्रियतरान् प्राणानुपेक्ष्य शत्रूणा सहारकरणे स्वकीयजीवनदाने च यत्प्रवृत्ता भवन्ति तत्रोत्साह एव हेतु· ।

उत्साहस्य महिमा यथैव लोके तथैवास्मदीये साहित्येऽपि बहुप्रशसित । उत्साह एव बलवान् अस्ति, तमन्तरा नास्ति किञ्चिदन्यद् बलम् । ये खलु सोत्साहा सन्ति तेषा कृते नैव किञ्चिद् दुर्लभमस्मिन् लोके—

उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम् ।
सोत्साहस्य हि लोकेषु न किञ्चिदपि दुर्लभम् ।।

य खलु समाजो देशो जनो वोत्साहहीनोऽस्ति तस्याध पतन सुनिश्चितमेव । स कदाप्युन्नतिं नाधिगन्तु शक्नोति, यतो हि तस्य कृते उन्नतेर्द्वार तु पिहितमेवास्ति—

निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः ।
सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ।।

आचार्यविश्वनाथेन वीरो रस· 'महेन्द्रदैवत ' उक्त । वीररसस्य कृते महेन्द्रस्य देवत्वस्वीकरणेऽयमेवाभिप्रायो वर्तते यद् वीरस्याधिष्ठान धैर्य्यमिति कथ्यते । महेन्द्रो यतो हि महान् धैर्य्यशाली (धीरो) वर्ततेऽत स एव देवत्वेन स्वीकृतः । उक्तञ्च केनचित्—

वीरस्य यदधिष्ठानं तद्धैर्य्यमिति गण्यते ।
धीरा महेन्द्रो यस्मात्तु सोऽयमस्याधिदैवतम् ।।

धीर स एव भवति यः खलु विकारकारणे समुपस्थितेऽपि विकृतिं न भजते । उक्तञ्च—

'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' ।

धैर्य्यं खलु मानवजीवनेऽतीव महत्त्वमावहति । शौर्यदयादाक्षिण्यादिगुणानां धैर्य-मेवावलम्बनत्वेनाङ्गीक्रियते । विपत्तिसागरं तत्तु धैर्यतरणिरेवापेक्ष्यते—

'आपदां तरणिर्धैर्यम्' ।

'विपदि धैर्यम्' ।

महापुरुषरामयुधिष्ठिरादयो धैर्यमवलम्ब्यैव स्वकर्त्तव्यपालन चक्रुर्महतीस्वपि विपत्तिषु । शिववीरराणाप्रतापादयो धैर्यावलम्बनेनैव स्वदेशस्य सम्मान रक्षितवन्त ।

एनादृशमहत्त्वमण्डितोत्साहस्थायिभावस्य वीराधिष्ठानभूतधैर्यधारकमहेन्द्रदैवतस्य वीररसस्य भेदविषये साहित्याचार्याणा पारस्परिकमतभेदोऽस्ति । केचिदाचार्यास्तु मन्यन्ते यन्निरुपपदवीरपदप्रयोगो युद्धवीर एव भवति, अतोऽस्य रसस्य दयाधर्मादिवीरभेदा कर्त्तु न युज्यन्ते । तेषा मते दानाद्युत्साहो केवल भावत्वेनैव गृह्यते । परन्त्वन्याचार्यै वीररसस्यानेके भेदा अङ्गीक्रियन्ते । तेषा मतस्य क्रमशोऽधो विवेचन क्रियते—

आचार्यभरतेन 'अथ वीरो नामोत्तमप्रकृतिरुत्साहात्मक' . प्रतिबोधादय ' इत्यादिना वीररसस्य विवेचन तु कृत परञ्च तद् भेदाना निरूपण न विहितम् ।

आचार्यहेमचन्द्रेण स्वीये काव्यानुशाससनानाम्नि काव्यशास्त्रात्मके ग्रन्थे वीररसस्य स्वरूप तथा तद्भेदानित्थमाह—

"नयादिविभाव स्थैर्याद्यनुभावो धृत्यादिव्यभिचार्युत्साहो धर्मदानयुद्धभेदो वीर " ।

आचार्यरामचन्द्रगुणचन्द्रौ स्वीये नाट्यदर्पणनाम्नि ग्रन्थे—

"पराक्रमबलन्याययशस्तत्त्वविनिश्चयैः ।
वीरोऽभिनयनं तस्य धैर्यरोमाञ्चदानतः" ।।

इति रीत्या वीररसस्वरूपकथनान्तर विवरणे—"स चानेकधा युद्धधर्मदानगुण-प्रतापावर्जनाद्युपाधिभेदात्' इति रूपेण वीरस्यानेकभेदत्वमुररीचक्रतु ।

पण्डितराजजगन्नाथेन रसगङ्गाधरनाम्नि ग्रन्थे वीररसस्य भेदाना विमर्श विस्तृतरूपेण कृत । तेन वीररसस्य भेदचतुष्टय स्वीकृतम्—

"वीरश्चतुर्धा दानदयायुद्धधर्मैस्तदुपाधेरुत्साहस्य चतुर्विधत्वात्" । परञ्च पण्डितराजेन वीरस्य चातुर्विध्यं प्राचीनानामाचार्याणा मतानुसारेणैव प्रदर्शितमिति स्वयमेव तेनाभिहितम्—

"इत्थ वीररसस्य चातुर्विध्य प्रपञ्चित प्राचामनुरोधात्" ।

तस्य विचारेण तु शृङ्गारस्येव वीरस्यापि क्षमाकर्मगुणसत्यपण्डित्यादिभेदेन बहवो भेदा कर्त्तु शक्यन्ते—

"वस्तुतस्तु बहवो वीररसस्य शृङ्गारस्येव प्रकारा निरूपयितु शक्यन्ते" ।

पण्डितराजस्य मतानुसार किञ्चिद्वैलक्षण्यमात्रेण वीरस्य दयावीरादिप्रकारभेदकल्पन

न युक्तिसङ्गतमिति प्रतिभाति। तस्य कथनमस्ति यच्चेद् वीरस्य भेदनिरूपण क्रियते तर्हि ''तस्य चत्वार एव भेदा'' इति कथन नौचित्यमावहति। यतो हि दयायुद्धधर्मदानवीरेष्वेव स्थायिन उत्साहस्य प्रतीतिर्भवति न तु पाण्डित्यवीरादिष्विति वक्तु न युज्यते—

''अनन्तरोक्तपद्ये तु नोत्साह प्रतीयते दयावीरादिषु प्रतीयत इति राजाज्ञामात्रम्''।

आचार्यधनञ्जयेन दशरूपकस्य चतुर्थप्रकाशे वीररसस्येत्थ लक्षणादिक कृतम्—

''वीर प्रतापविनयाध्यवसायसत्त्वमोहाविषादनविस्मयविक्रमाद्यैः।
उत्साहभूः स च दयारणदानयोगात्त्रेधा किलात्र मतिगर्वधृतिप्रहर्षाः''।।

उक्तरीत्या धनञ्जयस्य मते वीररसस्य भेदत्रय भवति—'दयावीरो रणवीरो दानवीरश्च।

आचार्यविश्वनाथेन साहित्यदर्पणे वीररसस्य स्थायिभावविभावादिवर्णन विधाय तस्य दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चत्वारो भेदा स्वीकृता —

'स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्''।

इत्थ सम्यक्तया विलोकयितु शक्यते यद् वीररसस्य भेदविषय आचार्याणा परस्पर महान् मतभेदोऽस्ति। तयोर्भेदनिरूपणेऽय भेदोऽस्ति यद् द्वाभ्यामपि युद्धवीरो दानवी, इमौ भेदौ स्वीकृतौ। परञ्च हेमचन्द्रेणोक्ताभ्या द्वाभ्या भेदाभ्या सह धर्मवीरो धनञ्जयेन च दयावीर परिगणित। आचार्य रामचन्द्रगुणचन्द्राभ्यां वीरस्य युद्धधर्मदानगुणप्रतापाद्युपाधिभेदेनानेके भेदा प्रपञ्चिता। आचार्यविश्वनाथपण्डितराजजगन्नाथाभ्या तस्य दयावीरो रणवीरो दानवीरो धर्मवीरश्चेति रूपेण भेदचतुष्टय प्रतिपादितम्। अत्रेद विचारणीयं यत् पण्डितराजेन प्राचा मतानुसारेणैव भेदचतुष्टयमङ्गीकृतम्। तस्य मते वीरस्य पाण्डित्यक्षमादिभिरनेके भेदा· कर्तु शक्यन्ते। अत एव तेन (पण्डितराजजगन्नाथेन) लिखित यत्—

''वीररसस्य चातुर्विध्यं प्रपञ्चितं प्राचामनुरोधात्''। (रसगङ्गाधर)

वक्तुमत्र शक्यते यत् पण्डितराजजगन्नाथेनाचार्यविश्वनाथेन च प्रतिपादिता वीरस्य चत्वारो भेदा बहुभिरभिमता अतोऽत्र दानवीरस्य, दयावीरस्य, युद्धवीरस्य, धर्मवीरस्य च स्वरूपमुदाहरणञ्च क्रमशः प्रस्तूयते।

दानवीररसस्य दान(त्याग)विषयकोत्साहः स्थायी, याचकादय आलम्बन-विभावा., सत्त्वोद्रेकादयो गुणा याचकादिकृताः श्लाघाशंसादयश्चोद्दीपनविभावा, सर्वस्वत्यागादयोऽनुभावा., हर्षधृतिगर्वादयश्च व्यभिचारिभावा भवन्ति। दानवीरस्यैकमुदाहरणमत्र समुदाह्रियते। ब्राह्मणस्य स्वरूपं धारयित्वा याचकरूपेण स्वसमक्षमुपस्थितायेन्द्राय स्वीयकवचकुण्डलानि समर्पयन् तत्रस्थान् चकितान् सभ्यान् प्रति कर्णो वदति—

"कियदिदमधिकं मे यद् द्विजायार्थयित्रे
कवचमरमणीयं कुण्डले चार्पयामि।
अकरुणमवकृत्य द्राक् कृपाणेन निर्यद्-
बहलरुधिरधारं मौलिमावेदयामि" ।। (रस०प्र०)

"याचकाय ब्राह्मणायासुन्दर कवच सुवर्णनिर्मितत्त्वात्साधारणे कुण्डले च यद् ददामि, इद तद् दानिरूपेण प्रसिद्धस्य मम कर्णस्य कियदधिक प्रत्युत स्वल्पमेव। शीघ्रमेव निर्दय यथा स्यात् तथा खड्गेन छित्त्वा रुधिरधारयुत मस्तकमपि समर्पयामि"।

अस्मिन्नुदाहरणे दानवीरस्य कर्णस्य दानवीरता वर्णिता। अत्र याचमान इन्द्र आलम्बनम्, तत्कृतस्तुतिरुद्दीपिका, कवचादिवितरणादिकमनुभाव , कर्णस्य गर्वादय सञ्चारिणश्च सन्ति।

एतत् काव्यगतवीररसस्योदाहरणम्। अद्यतने सङ्कटाकुले भारते देशे कर्ण-परशुरामबलिदधीचिप्रभृतिसदृशाना लौकिकदानवीराणा सुतरामपेक्षा। अद्य देशस्य रक्षार्थे विविधयोजनाना क्रियान्वयनार्थे च धनस्य महदावश्यकत्वम्। राष्ट्रियरक्षाकोषे महद् द्रव्यमपेक्ष्यते येन शस्त्रास्त्रनिर्माणे सैनिकाना परिपोषणे च सौविध्य स्यात्। देशस्य प्रत्येकनागरिको—भवेद्वा स निर्धनो धनिको वा दानवीरे भूत्वा राष्ट्रस्य समुचिता सेवा विधातु शक्नोति। एतादृशा धनाढ्या देश एव सन्ति ये खलु स्वपूर्वजाना कर्णादिदानवीराणा दानपद्धतिमनुसृत्य स्वकीयधनदानेन सुरक्षाकोषं पूरयितु समर्था। अनया रीत्या तेषा धनस्य सदुपयोग स्यात्, सहैव तेन राष्ट्रस्य सुरक्षाऽपि भवेत्। एवमेव रक्तदाने, भूदाने, श्रमदाने, स्वर्णदाने च सर्वे खलु भारतीया आहूयन्ते यत्ते रक्तदानेन क्षतविक्षतसैनिकाना जीवन सुरक्षेयु , भूदानेन भूमिहीनाना कृते भूमीर्दद्युर्येन कोटिशो भूमिहीना भूमिम्प्राप्य स्वीया जीविकामर्जयेयुः, श्रमदानेन राष्ट्रस्य खाद्यान्नाद्युत्पादने सहयोग दद्युर्येन विषमा खाद्यान्नादिसमस्या समाधेया स्यु , स्वर्णदानेन सर्वकारस्य सहयोग कुर्युर्येन देशस्य वैदेशिकमुद्रासमस्या सुखेनैव समाधातु शक्यते। अस्माक समक्ष महर्षिदधीचेरुदाहरणमस्ति येनासुराणा विनाशाय स्वास्थिदान कृत, येन निर्मितेनास्त्रेण निशाचराणा विनाशो जात। भामाशाहेन विपत्तिकाले महाराणाप्रतापस्य कृते महान् धनराशि प्रदत्तो येन महाराणाप्रतापेन स्वशत्रूणा विनाशस्य प्रयास कृत।

अद्य दानवीराणां समक्षमाचार्यविनोबाभावे प्रधानमन्त्र्यादयो याचकरूपेणोपस्थिता अतस्त एव तेषां दानविषयकोत्साहस्य कृते जनककारणानि (काव्ये-आलम्बनपदाभिधेयानि) प्रधानमन्त्र्यादीना याचनादीनि परिपोषकारणानि (काव्ये उद्दीपनपदव्यपदेश्यानि), दानविषयकोत्साहजन्यानि रक्तादिदानानि कार्याणि (काव्येऽनुभावपदवाच्यानि),

स्वकर्त्तव्यपालनरूपगर्वादिरूपाणि सहकारीणि (सञ्चारिभावपदवाच्यानि) भविष्यन्ति।

दयावीररसस्य स्थायिभावादय उदाहरणञ्चोच्यन्ते।

दयावीरस्य दयात्मक उत्साह स्थायिभाव, व्याधिदारिद्र्यशस्त्रास्त्रक्षुत्पिपासादि-पीडिता प्राणिन आलम्बनविभावा, व्याधिदारिद्र्यादिग्रस्ताना व्याकुलत्वादिकमुद्दीपनम्, स्वशरीराद्यर्पणादयोऽनुभावा, धृत्यादयश्च व्यभिचारिणो भवन्ति।

पौराणिककथानुसार राज्ञ शिवेर्दयालुताया सुतरा प्रसिद्धिरासीत्। एकदेन्द्रस्तस्य परीक्षा विधातुमियेष। श्येनरूपधारिणेन्द्रेणाभिद्रुत कपोतरूपधारी धर्म शिवे शरण जगाम। शिवि श्येनाय स्वशरीरदानेन कपोतप्राणान् ररक्ष। अधोलिखिते पद्ये स्वशरणमागत कपोत रक्षितु शिवि श्येन ब्रूते —

''न कपोतकपोतकं तव स्पृशतु श्येन! मनागपि स्पृहा।
इदमद्य मया समर्पित भवते चारुतरं कलेवरम्''।।

(र० ग० प्र०)

''हे श्येन! तव जिघत्सा पारावतस्य दयनीयशावकमिम स्वल्पमपि न स्पृशतु, यत इद स्वीय सुन्दरतर शरीर मया त्वदर्थे समर्पित वर्तते''।

अत्र शिविगतदयाविषयकोत्साह स्थायी, कपोत आलम्बनम्, तस्य व्याकुलत्व-मुद्दीपनम्, कपोतरक्षार्थ स्वशरीरार्पणमनुभाव, धृत्यादयश्च व्यभिचारिण सन्ति।

एवमेव दयावीररसस्याधोलिखित नागानन्दनाटकस्य पद्यमन्यदुदाहरणमस्ति यस्मिन् सुप्रसिद्धदयावीरस्य जीमूतवाहनस्य दयाविषयकोत्साहस्याभिव्यञ्जनमाह्लादकरूपेणोपवर्णितमस्ति—

''शिरोमुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात्त्वं विरतो गरुत्मन्''।।

(सा०द०)

''हे गरुत्मन्! साम्प्रतमपि मे शिरोमुखै रक्त वहति। मम शरीरे इदानीमपि मासमस्ति। त्वदीया तृप्तिर्न दृश्यते तर्हि त्व कथ मासभक्षणान्निवृत्त.''।

साम्प्रत पराक्रान्ते नानासमस्यासङ्कुले च भारते लोकदयावीराणा कियत्यपेक्षेति नेदमविदितम्। यतो हि समेषां बुद्धिमता देशवासिनामनुभवस्यैवैष विषय। यदा प्रभृति भारतवर्षेण स्वातन्त्र्यमधिगत तदा प्रभृत्येव तत्समक्षे विकटा शरणार्थिनां समस्योपस्थिता तिष्ठति। कष्टकर भृशं यदद्यावध्यपि सा (समस्या) पूर्णतया समाधान नाधिगता। अस्माकं समीपस्थो देश पाकिस्तान एतादृश क्रूर कपटाचारप्रवीणश्चास्ति यस्य

नृशसतापरिपूरितेन व्यवहारेण तद्देशस्था इस्लामेतरधर्मावलम्बिन सुतरा पीड्यन्ते। अहर्निश तेषामपमानमुत्पीडनञ्च क्रियते, येन ते जन्मभूमिभूतमपि स्वदेश (पाकिस्तान) परित्यज्य भारते शरणायागच्छन्ति। वय नैतादृशा कठोरचित्ता दयाहीनाश्च स्मो येन तेषामुपेक्षा विधातु पारयाम। धनधान्यावासादिविहीना अत्यन्त परिपीडिता (इमे शरणार्थिन) देशस्य दयावीराणा दयात्मकोत्साह जनयितु शक्नुवन्ति। अत आवश्यकमिद प्रतिभाति यद् देशवासिनस्तेषामुपरि दयार्द्रचित्ता भवेयुर्येन तेषा विषमा परिस्थितिर्दूरीकर्तु शक्येत। भारतपाकिस्तानयो पारस्परिकयुद्धात् सहस्रश उत्पीडिता पाकिस्तानदेशीया अस्माक बन्धुभूता जना देशे स्वरक्षार्थ समायाता। तेषा केचिद् स्वजनबन्धुवियोगेन केचित् स्वजन्मभूमिपरित्यागेन भृश पीडिता, पुनरपरे पाकिस्तानीयैर्लुण्ठकैरपहृतधनधान्यादयश्च सन्ति। एषु शरणार्थिषु तेऽपि वर्तन्ते ये भारतीया एव सन्ति तथा पाकिस्तानेन तद् भूम्यधिकृतत्वादुद्वासिता सन्ति। एषा कृत आवासस्य, खाद्यान्नस्य वस्त्रादेराजीविकायाश्च कठिना समस्योपस्थिता, न केवलमेतावदेव देशे साम्प्रत खाद्यान्नादिसमस्याऽपि जटिलीभूताऽस्ति। सन्त्येतादृशा निर्धना देशे येषा पार्श्वे शीतकालेऽपि शरीराच्छादनार्थ वस्त्रादिक नास्ति, आवासस्य कृते गृहाणि न सन्ति। समाचारपत्रै प्रतिदिन ज्ञायते यद् बुभुक्षया पीडनादसह्यशीताच्च केचन दुर्भाग्योपहता नरा अकाल एव कालकवलिता भवन्ति। सन्त्येतादृशा· सैनिका ये खलु देशस्य स्वातन्त्र्यपरिरक्षणरूपसङ्ग्रामे क्षतविक्षता भूत्वा तिष्ठन्ति। केचिद् भारतभूमिरक्षणे स्वीय सर्वस्वभूत जीवन समर्पयन्ति। एषा परिवारसदस्या वियोगजनितदु खपीडिताश्च सन्ति।

उपर्युक्ता. सर्वे पीडिता जना लौकिकदयावीराणा दयाविषयकभावस्य जनक-कारणानि (काव्य आलम्बनपदवाच्यानि) तान् प्रति सर्वस्वत्यागादिरूपाणि कार्याणि (काव्येऽनुभावपदाभिधेयानि) धृत्यादयश्च परिपोषकारणानि (काव्य उद्दीपनपदवाच्यानि) च भवितुं शक्नुवन्ति।

धर्मवीररसस्य धर्मविषयक उत्साह स्थायी, धर्मविषय आलम्बनम्, "धर्मो नित्य सुखदुःखे त्वनित्ये". इत्यादिवचनानुस्मरणमुद्दीपनम्, सर्वस्वसमर्पणाद्यङ्गीकृतित्वमनुभाव, धृत्यादय. सञ्चारिणश्च सन्ति।

अधोलिखिते पद्ये धर्मवीरयुधिष्ठिरस्य धर्मवीरत्वमुद्घाटित भवति। धर्मराजो युधिष्ठिर कथयति यन्मदीयं राज्यं सर्वं धनधान्यादिकञ्च धर्मस्य कृते वर्तते —

"राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये।
यच्च लोके ममायत्तं तद् धर्माय सदोद्यतम्"।। (सा०द०)

विभिन्नसम्प्रदायधर्मादिसङ्कुले भारते लौकिकधर्मवीराणां पूर्वकालापेक्षया सुतरामपेक्षा।

अज्ञानवशादद्य जनैर्धर्मस्य वास्तविक स्वरूप न गृह्यते। मन्वादिभिर्महर्षिभिर्धर्मस्य यल्लक्षण कृत तस्य न याथार्थ्य ज्ञायते सङ्कीर्णमनोवृत्तिभि । अद्यास्माक समाजे यन्नैतिकह्रासो दृश्यते तत्र धर्मवृत्तेरभाव एव कारणम्। सर्वत्र भ्रष्टाचारस्य ताण्डवनृत्य बोभूयते। अनैतिकतादेव्या यदखण्डसाम्राज्य परिलक्ष्यते सर्वत्र तत्राधार्मिकता विहायान्य को हेतु ? वेदव्यासेनोक्त यद् धर्मादेवार्थो धर्मादेव कामोऽत स (धर्म) कथ न सेव्यते ?

''धर्मादर्थश्च कामश्च किमर्थ स न सेव्यते'' । (महा०)

केचिज्जना धर्मस्य नाम्नोऽपि बिभ्यति। ते धर्मे सङ्कीर्णमनोवृत्तेर्दर्शन कुर्वन्ति। वस्तुतस्ते धर्मस्य व्यापक विशदञ्च स्वरूपमज्ञात्वैव वदन्ति। अस्माक धर्मग्रन्थेषु पुराणेषु साहित्येषु च कुत्रापि धर्म· सङ्कुचितेऽर्थे न परिगृहीत । कानिचिद् धर्मलक्षणान्यत्रोपस्थाप्यन्ते, यैर्धर्मस्य व्यापकस्वरूप सम्यक्तया परिलक्षितु शक्यते—

''यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'' ।

× × × ×

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

× × × ×

धारणाद्धर्म इत्याहुर्धर्मो धारयति प्रजाः ।
यत्स्याद्धारणसंयुक्तः स धर्म इत्युदाहृतः ।।

एषु समेषु धर्मलक्षणेषु क्वापि धर्मस्य सङ्कुचितस्वरूप न परिलक्ष्यते।

इदानी या पारस्परिकी साम्प्रदायिकी घृणा दृष्टिगोचरीभवति देशे न तत्र धर्मोऽपि त्वधर्म एव कारणम्। ससारस्य प्राय समेषा धर्माणा मध्ये वस्तुतो न कोऽपि विरोध । न कोऽपि धर्म शिक्षयति स्वानुयायिनो यत्तेऽन्यधर्मावलम्बिन प्रति घृणाद्वेषमूलकभाव धारयेयु । व्यासस्याष्टादशपुराणानामयमेव साराशो यत्परोपकार पुण्याय परिपीडनञ्च पापाय भवति—

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परिपीडनम् ।।

महात्मना तुलसीदासेनापि समुद्घोषित यत्परोपकारसदृशो न कोऽप्यन्यो धर्म परपीडनसदृशोऽधर्मश्चास्ति—

परहित सरिस धर्म नहिं भाई ।
परपीडा सम नहिं अघमाई ।।

भारते सन्ति बहवो धर्मा । तेषा मध्ये न कोऽपि विरोधस्यावसरो यतो हि धार्मिकतत्त्वेषु वास्तविकभेदो नैव भवति । सुष्ठूक्त केनचित्—

अलं भारतीया मतानां विभेदै-
रलं देशभेदन वैरेण चालम् ।
अयं शाश्वतो धर्म एको धरायां
न सम्भाव्यते धर्मतत्त्वेषु भेदः ।।

महात्मना गान्धिनाऽऽजीवनमेतन्मूलकमेवोपदेश ददादसीत् । तेषा मते ब्रह्म त्वेकमेवास्ति तदीश्वरेत्यभिधानेन अल्लेति नाम्ना वा कथ्यते । मन्दिर वा मस्जिद वा सर्वत्रैकस्यैव सर्वव्यापकब्रह्मणोऽधिष्ठानम्—

अल्ला ईश्वर तेरो नाम सबको सन्मति दे भगवान् ।
मन्दिर मस्जिद तेरो धाम ।।

वस्तुतो यो धर्मो बाधरूपेणास्माक विकासमार्गे समायाति पारस्परिकविरोध वर्धयति च स धर्म एव नास्ति । एतत्तु धर्मस्य विकृतमेव रूपमस्ति । नून मन्ये देशे धर्मवीरैर्धर्मस्य वास्तविक स्वरूपं जनाना समक्षं समुपस्थापयेयुश्चेत्तदा विभिन्नधर्मावलम्बिना कृत्रिमो धार्मिकमतभेदो दूरमपयास्यति । एतदर्थ धर्मराजयुधिष्ठिर सत्यहरिश्चन्द्रगौतमबुद्ध-गुरुनानकसन्तकबीरमहात्मगान्ध्यादय सदैवास्मान् प्रेरयिष्यन्ति ।

चतुर्थ खलु वीररसस्य भेदोऽस्ति युद्धवीर । अयमेव वीरस्य प्रमुखो भेद । वस्तुतो वीरशब्दस्य व्युत्पत्तिरपि वीरस्य युद्धवीररूपमर्थमेव प्रतिपादयति —

"विरुद्धान् राति हन्तीति वीरशब्दस्य निर्वहः" ।

निरुपपदवीरपदस्य युद्धवीर एव प्रयोगो भवति । अत्र युद्धवीररसस्य युद्ध-विषयक उत्साह स्थायिभाव , विजेतव्या शत्रव आलम्बनविभावा , रणे शत्रुचेष्टादि-दर्शनमुद्दीपनविभावा , शत्रुतिरस्कृतियुद्धोपकरणाद्यन्वेषणमनुभाव , गर्वादय सञ्चारिभावाश्च भवन्ति । कतिपयोदाहरणानि प्रस्तूयन्ते । मर्यादापुरुषोत्तमो रामो युद्धभूमौ रावण प्रति कथयति—

भो लङ्केश्वर ! दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद्गतम् ।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजां पङ्किलः
पत्रो नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ।।

(बालरामायणम्)

"लङ्काधिपते ! रावण? सीता समर्प्यताम्। स्वय रामोऽह याचे। त्व मतिभ्रम परित्यज्य नीतिमार्गमनुसर। आधुनाऽपि तवाकल्याण न जातम्। चेत्त्व मम कथन न श्रोष्यसि तदा नूनमेव खरदूषणत्रिशिरसा कण्ठरुधिरेण पङ्किलोऽय मदीय बाणो धनुर्ज्या-रोपित सन् त्वा जीवित न हास्यति"।

अत्र रामहृदयस्य युद्धविषयक उत्साह स्थायिभाव, रावण आलम्बनम्, युद्ध-दर्शनमुद्दीपनविभाव, दशवदनावज्ञामूलक कथनादिकमनुभाव, गर्व सञ्चारी च वर्तन्ते।

अधोलिखिते हिन्दीपद्येऽङ्गदस्य वीरता सुस्पष्ट परिलक्ष्यते —

रोप्यो पांव पैज के, विचारि रघुबीर-बल,
लागे भट सिमिटि, न नेकु टसकतु है।
तज्यो धीर धरनि, धरनिधर धसकत,
धराधर धीर भार सहि न सकतु है।
महाबली बालि को, दबत दलकति भूमि,
तुलसी उछरि सिन्धु, मेरु मसकतु है।
कमठ कठिन पीठि, घट्टा परो मन्दर को,
आयो सोई काम, पै करेजो कसकतु है।।

(कवितावली)

सौमित्रि को घननाद का रव अल्प भी न सहा गया।
निज शत्रु को देखे बिना उनसे तनिक न रहा गया।
रघुवीर से आदेश ले युद्धार्थ वे सजने लगे।
रणवाद्य भी निर्घोष करके धूम से बजने लगे।
सानन्द लड़ने के लिये तैयार जल्दी हो गये।
उठने लगे उनके हृदय में युद्ध भाव नये-नये।।

(त्रेता के दो वीर)

वर्तमानोऽय कालो भारतस्येतिहासेऽतीव महत्त्वमावहति, यतो हि सुदीर्घकाला-नान्तर भारतेन स्वातन्त्र्यमधिगतम्। परञ्च कस्यचिदपि देशस्य जीवने यदा कदैतादृशा विघ्ना अपि समायान्ति यैर्देशस्य स्वतन्त्रताया कृते भयोत्पत्तिरपि जायते। एतादृश एव काले वय भारतीया स्म। चीनपाकिस्तानयोर्विश्वासघातकव्यवहारेणास्माक देश सुतरा सङ्कटापन्नो वर्तते। चीनीया सैनिका अस्माक देशस्य सीमासु शस्त्रास्त्रसज्जिता कि

कर्त्तु सन्नद्धा सन्ति? तेषा मनसि कि वर्तते? एतद् भगवानेव विजानातु। पाकिस्तानीया सैनिका अपि यदाकदा सोमोल्लङ्घन कुर्वन्ति। उपद्रवकारिणश्छद्मना प्रविश्य भारतभूभागमुपद्रव विदधति। एतादृशाना सैनिकानामवरोधाय देशे युद्धवीराणामपेक्षा वर्तते। युद्धवीरा (सैनिका) एवास्माक सीम्नो रक्षितु क्षमा। अस्माक शत्रव एव खला कपटाचारिणश्च सन्ति येषा प्रतीकार सैनिकाना शस्त्रास्त्रैरेव कर्त्तु पार्यते। एतत्तु विनिश्चित यदिमे दुष्टास्तावत्कालमुपद्रव कर्त्तुमुद्यता स्थास्यन्ति यावत्कालमस्माक वीरास्तान् यमराजसदन प्रेषयितु समर्था न भविष्यन्ति। पाकिस्तानेन पूर्वमस्मान् निर्बलानेव विचार्यक्रमण कृतम्। परञ्च यदैव तेऽस्माक सैनिकाना युद्धभूमौ सहारकारिस्वरूप विलोकितवन्तस्तदैव त अपगतसाहसा युद्धभूमे पलायिता। तेषामुत्साहो विलुप्तो गर्वश्च चूर्णीभूत। युद्धभूमा अस्माकं वीरसैनिका कीलरबन्ध्वब्दुलहमीदप्रभृतयो यादृश शौर्य्य प्रदर्शित तदर्थे भारतवर्ष सदैव कृतज्ञताभाव धारयिष्यति तान् प्रतीति निश्चितप्रायम्।

भारतमहीय सदैव वीराणा जन्मभूमिभूतत्वेनासीदस्ति भविष्यति च। राम-कृष्णभीमार्जुनाङ्गदहनुमदादीनामतुलितशौर्य को न विजानाति? महाराणाप्रतापवीर-शिवाजीवीरभगतसिहचन्द्रशेखराजादसुभाषचन्द्रबोसादीनाञ्चोत्कटवीरता को न स्मरति? स्वपूर्वजाना पदचिह्नमनुगच्छद्भिरस्माक वीरै सैनिकैर्युद्धवीरानुरूपमेव कृत्य सम्पादित युद्धभूमौ। युद्धवीरस्य यादृश लक्षणं प्रतिपादित लक्षणकारैस्तत् पूर्णतो घटते तेषु। ते स्वसहायकैर्हीना अपि सन्तो बहुभि शत्रुसैनिकैरेकाकिन एव युध्यन्ते स्म। शस्त्रास्त्रघातेन क्षतविक्षतशरीरा अपि ते परमोत्साहवन्त कदापि ग्लानि न गता। समरात् कदाचिदपि शत्रुसैनिका इव पलायन न कृतवन्त —

निरायुधस्याप्येकस्य दीनस्यापि परिच्छदैः।
अभीतिबहुभिर्युद्धं व्यवसायो रणे मदः।
हर्षः शस्त्रास्त्रघातेषु समरादपलायनम्।।
भीताभयप्रदानं च प्रपन्नास्यार्तिभञ्जनम्।
एवं युद्धात्मको वीरस्तज्ज्ञैः कविभिरीरितः।।

(भावप्रकाशन)

यद्यपि पाकिस्तानेन साक ताशकन्दसन्ध्यनुसार युद्धविरामो जात। चीनदेशेन साकमपि सम्प्रति सामान्य सम्बन्धोऽभवत्। अस्माकं मते पाकिस्तानवच्चीनेन सार्द्धमपि युद्धविरामे सञ्जातेऽपि वयं सैन्यदृष्ट्या स्वदेशस्य सुदृढीकरणे शैथिल्यं न व्रजेम। वस्तुत इदानीमपेक्ष्यते सुतरा यद् भारतस्य प्रत्येकगृहे युद्धवीरैर्दयावीरैर्दानवीरैर्धर्मवीरैश्च भाव्यम्, तदैवास्माक विविधा समस्या समाहिताः स्यु, पारस्परिकसहयोगश्च वर्द्धितो

भवेत्, देशस्य सुरक्षा स्यात्, शत्रव पराभूता सन्तो न कदाप्यस्मानुपर्याक्रमण विधातु दुस्साहसञ्च कुर्यु । सुष्ठु प्रतिपादित केनचित्—

जिस देश में सैनिक घर-घर हों,
जिसके देशज बलिदानी हों।
वह देश स्वर्ग है, जिसे देख,
अरि के मस्तक झुक जाते है।।

●●

दशरूपकपर्यालोचनम्

नाट्यशास्त्रीयग्रन्थपरम्पराया भरतप्रणीतनाट्यशास्त्रानन्तर धनञ्जयविरचित दशरूपक महनीयं स्थान भजते। दशरूपकस्य रचयिता धनञ्जय परमारवशीयराज्ञो मुञ्जस्य सभाया देदीप्यमान रत्नमासीत्तत्पिता विष्णुनामक· कश्चिद् भाग्यशाली चाभवत्। धनञ्जयस्य स्थितिकालो दशमशताब्द्या उत्तरार्धे मन्यते विद्वद्भि । दशरूपकस्यावलोकवृत्तिकारो धनिकोऽपि धनञ्जयस्य कनिष्ठो भ्राताऽऽसीत्। अवलोकवृत्ति विना दशरूपकरहस्य ज्ञातुमशक्यम्। धनञ्जयेन भरतविरचित नाट्यशास्त्रमाधृत्यैव स्वीयदशरूपकनामकग्रन्थस्य रचना विहिता। दशरूपकरचनोद्देश्य प्रकटयन् धनञ्जयो दशरूपकस्य प्रथमप्रकाशे कथयति यद् भारतीयं नाट्यशास्त्रमेक विशाल रसशास्त्रं विद्यते। तस्मिन् सामान्यजनाना प्रवेशो दुष्कर इति धिया स दशरूपकविरचनद्वारा नाट्यशास्त्रीयं प्रतिपाद्यविषय सङ्क्षेपत सरलया शैल्या प्रतिपादयितुमुद्यत —

व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः।
तस्यार्थस्तत्पदैस्तेन सङ्क्षिप्य क्रियतेऽञ्जसा।। (द०रु०१।५)

विशाले नाट्यशास्त्रे खलु ललितकलासम्बद्धाः समे विषया विचारविषयता गता विद्यन्ते, परन्तु दशरूपके दशरूपकाणा तत्सम्बद्धवस्तुनेतृरसानाञ्च विवेचनं मुख्यतया जातम्। दशरूपके चत्वार प्रकाशा सन्ति। प्रथमे प्रकाशे मुख्यत· कथावस्तुनो, द्वितीये नायकस्य, तृतीये नाटकप्रकरणादिदशरूपकाणां चतुर्थे च रसस्य सम्यक् विचारो जात.।

प्रथमप्रकाशस्यादौ धनञ्जयेन परस्पर पर्यायवाचि नाट्यं रूपकं रूपञ्चेति पदत्रयं विवेचितम्। दृश्यकाव्ये नटोऽभिनेता चाङ्गिकवाचिकाहार्यसात्त्विकाभिधानैश्चतुर्भिरभिनयै काव्यनिबद्धचतुर्विधानां धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्तस्वभावानामनुकार्यपात्राणां विविधावस्थानामेतादृशमनुकरण विधत्ते येन नटानामनुकार्यपात्राणा दुष्यन्तादीनाञ्च परस्परं तादात्म्यापत्तिर्जायते। एतादृशयवस्थानुकृतिरेव नाट्यपदेनाभिधीयते—'अवस्थानुकृतिर्नाट्यम्।'

इदमेव नाट्यं रूपपदेनाप्युच्यते यतो हि नाट्यमेकं दृश्यकाव्यमस्ति। तदेव वस्तु दृश्यं भवति यस्य रूपं भवति। रूपमेव चक्षुभ्यां द्रष्टुं शक्यतेऽतो दृश्यत्वान्नाट्यं रूपेत्यभिधानेनाप्यलङ्क्रियते। धनञ्जयो वदति—"रूप दृश्यतयोच्यते।" यथा रूप-कालङ्कारे उपमेयस्योपरि उपमानस्यारोपः क्रियते तथैव नटेऽभिनेतरि वा रामाद्यनुकार्य-पात्राणामवस्थारोपो विधीयते सामाजिकैरत समारोपकारणाद् दृश्यकाव्यं रूपकेति पदेनापि कथ्यते। 'रूपकं तत्समारोपात्' धनञ्जयस्योक्तेरस्या अयमेवाभिप्राय ।

धनञ्जयमते रूपक नाट्य वा रसाश्रय भवति तथा रसाश्रयभूतस्य तस्य दश भेदा भवन्ति—

नाटकं सप्रकरणं भाणः प्रहसन डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ।। (१।८)

अर्थात् नाट्यस्य नाटक, प्रकरणं, भाण , प्रहसन, डिम , व्यायोग , समवकार , वीथी, अङ्क , ईहामृगश्चेति दश प्रकारा सन्ति । धनञ्जयेन 'अन्यद्भावाश्रय नृत्य'मित्युक्त्वा नाट्यान्नृत्यस्य तथा 'नृत्त तालललयाश्रयमि'त्यभिधाय नाट्यान्नृत्तस्य च भिन्नता स्पष्टीकृता । तन्मते नाट्यं रसाश्रय भवति । नृत्य भावमूलक तथा नृत्त तालललयमूलकञ्चास्ति । अतस्तेषा पारस्परिकाभेदशङ्का निर्मूला । अत्राय प्रश्न स्वाभाविको यत् समेषु नाट्यभेदेषु चेदनुकृतिर्वर्तते तर्हि अनुकारात्मकत्वेनाभेदात्तेषा भेद कथ कर्त्तु शक्यते? प्रश्नस्यास्य समाधि समुपस्थापयन् धनञ्जयो वदति—

''वस्तु नेता रसस्तेषां भेदकः'' ।

अर्थाद् वस्तुभेदाद्, नायकभेदाद् रसभेदाच्च रूपकाणा परस्पर भेदो जायते । इमान्येव रूपकभेदकतत्त्वानि क्रमश प्रथमे द्वितीये चतुर्थे च प्रकाशे विचारणीयानि जातानि ।

प्रथमे प्रकाशे उक्तविचारान्तरं सर्वप्रथम वस्तुन आधिकारिक प्रासङ्गिकञ्चेति भेदद्वयमभिधाय प्रासङ्गिकवस्तुनोऽपि पताका प्रकरी चेति प्रकारद्वितय विहितम् । सर्व कथावस्तु पुन· प्रकारद्वयेन विभाजितम्, एकेन प्रकारेण वस्तुन प्रख्यातम्, उत्पाद्यम्, मिश्रितञ्चेति भेदत्रयम् । द्वितीयेन प्रकारेण चापि दिव्यम्, मर्त्यम्, दिव्यादिव्यञ्चेति भेद-त्रितयमित्युक्तम् ।

अनन्तर बीज, विन्दु , पताका, प्रकरी, कार्यञ्चेति पञ्चार्थप्रकृतीनाम्, आरम्भ , यत्न·, प्राप्त्याशा, नियताप्ति., फलागमश्चेति पञ्चकार्यावस्थाना विचार विधाय पञ्चार्थ-प्रकृतीनां पञ्च कार्यावस्थाभियोगेनोद्भूताना मुखम्, प्रतिमुखम्, गर्भ , अवमर्श उपसहृतिश्चेति पञ्चसन्धीना सन्ध्यङ्गानाञ्च विस्तरेणोहापोह· कृत. । अग्रे कथावस्तु-सूच्यांशप्रकाशकानामर्थोपक्षेपकानामपि लक्षणानि प्रकाशितानि । तेषा नामानीमानि सन्ति— विष्कम्भ· (विष्कम्भको वा), प्रवेक्षक , चूलिका, अङ्कास्यम्, अङ्कावतारश्च । अन्ते कथावस्तु पुनस्त्रिधा विभाजितम्—सर्वश्राव्य नियतश्राव्यमश्राव्यञ्च । नियतश्राव्यस्यापि भेदद्वय जनान्तिकमपवारितञ्च कृत्वाऽऽकाशभाषितमपि विवेचितम् । इत्थ धनञ्जयस्य वस्तुविवेचन सर्वाङ्गपूर्णमस्ति ।

द्वितीयप्रकाशे नायकस्य सर्वाङ्गीण ऊहापोहो जात । अत्रेदमवश्यमेव ध्येय

यन्नायकस्य विचारप्रसङ्गे तस्य सर्वे परिकरा अपि विचारणीयता गता सन्ति। आदौ नायकस्य सामान्य लक्षणमुपस्थापितम्। तस्मिन् नायकस्य सामान्यगुणानामप्युल्लेखो जात —

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा।।
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।।(२/२)

नायकसामान्यलक्षणानन्तरं नायकस्य चत्वारो भेदा धीरललित , धीरशान्त , धीरोदात्त धीरोद्धतश्चोक्ता·। तेषा लक्षणान्युदाहरणानि च दत्तानि। तत शृङ्गारनायकस्य चत्वारो भेदा दक्षिण·, शठ , धृष्ट , अनुकूलश्च वर्णिता । अत्रैव नायकसहायकाना प्रतिनायकस्य च स्वरूपमपि प्रकाशितम्।

नायकविचारानन्तरं नायिकाविमर्शो जात । पूर्व नायिकाया. प्रकारत्रय स्वस्त्री (स्वकीयां वा), परस्त्री (परकीया वा) साधारणस्त्रीञ्च परिगणय्य तासा लक्षणानि विहितानि। स्वीयनायिकाया मुग्धा, मध्या, प्रगल्भा चेति भेदत्रितय प्रतिपाद्य नायिकाना स्वाधीनपतिकाद्यष्टावस्थाया वर्णन कृत विद्यते। नायिकावर्णनानन्तर नायिकासहायि-नीनां दूत्यादीनां विमर्शोऽभूत्। अत्रैव स्त्रीणां यौवने विंशतिसख्याका सहजालङ्कारा उपवर्णिता·। ततो नायकस्य कार्यान्तरसहायान् विविच्य नायकव्यापारस्य चतस्रो वृत्तयो विवेचिता.। तासा नामानीमानि सन्ति—कैशिकी, सात्त्वती, आरभटी, भारती च। अन्ते नायकादीनां देशकालानुसार क्रियावेशभाषादीना समासतो विचारं विधाय पात्राणां सम्बोधनविधिरपि विचारित ।

तृतीये प्रकाशे दशरूपकाणां सम्यक् लक्षणानि यथायोगमुदारणानि च प्रकाशितानि। रूपकभेदस्य नाटकस्य सुविदितमहत्त्वमप्यत्रैव प्रख्यातम्। नाटकस्य सुविस्तृत लक्षण कृतं राजते। नाटकविचारावसरे दूराध्वानादीनामपि समुल्लेखो जातो येषा रङ्गमञ्चोपरि प्रदर्शन निषिध्यते। यद्यपि रूपकभेदगणनावसरे नाटिका न परिगणिता तथापि सङ्कीर्णान्यभेदप्रकरणिकादिनिवृत्तये नाटिकायाः लक्षणादिकं दर्शितम्—"लक्ष्यते नाटिकाप्यत्र सङ्कीर्णान्यनिवृत्तये" धनञ्जयेन प्रकरणिकानामकभेदो न स्वीक्रियते।

चतुर्थे खलु प्रकाशे रसविचारो विशदतया कृतो वर्तते। अस्मिन् प्रकाशे प्रथम रसस्य लक्षणं विधाय लक्षणगताना विभावानुभावसात्त्विकभावव्यभिचारिणां लक्षणानि प्रतिपादितानि। दशरूपककारमते अष्टौ सात्त्विका , त्रयस्त्रिंशद् व्यभिचारिणस्तथाऽष्टौ स्थायिभावा भवन्ति। अत्रेदमवश्य ध्येयं यत् सात्त्विकभावानामनुभावत्वं स्वीकुर्वाणोऽपि ग्रन्थकारस्तेषां पृथक् स्वरूपं गणयति। स कथयति—

पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः ।
सत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम् ।।४।।

धनञ्जयसम्मता स्थायिभावा इमे सन्ति—

रति., उत्साहः, जुगुप्सा, क्रोध , हास , स्मय., भय, शोकश्च । एतानेवाश्रित्य क्रमशः शृङ्गार., वीर , वीभत्स·, रौद्र·, हास्य , अद्भुत., भयानक , करुणश्चेत्यष्टरसा भवन्ति । शमनामकस्थायिभाव धनञ्जयो नाङ्गीकरोति । तस्य मते शमभावस्य पुष्टिर्नाट्येषु न भवति । फलतः शममूलक शान्तरसोऽपि नाट्ये न स्वीकर्तु शक्यते । स वदति—

"शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य" ।।

धनिकेन शान्तरसमाश्रित्यानेकमतानामुल्लेखो विहितः ।

दशरूपककारमते सहृदयानां स्थायीभाव एव विभावानुभावसात्त्विकभाव-व्यभिचारिभावादिभि. स्वादयोग्यतामवाप्य रसरूपता भजते । स प्रथमकारिकायामेव स्पष्टीकरोति—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः ।।४।।

तन्मते रसास्वाद सामाजिकस्यैव भवति न त्वनुकार्यपात्राणा रामादीनाम् । स कथयति—

रसः स एव स्वाद्यत्वाद्रसिकस्यैव वर्तनात् ।
नानुकार्यस्य वृत्तत्वात्काव्यस्यातत्परत्वतः ।।४।३९।।

धनिकधनञ्जययो स्पष्टमिदं मतं यन्नटोऽभिनेता वा सामाजिक इव रसास्वादं कर्तुं शक्नुयात् चेत् स रसास्वादक्षमो भवेत् । धनञ्जयो वक्ति—

काव्यार्थभावनास्वादो नर्तकस्य न वार्यते ।

ध्वनिवादिनां मते विभावादयो व्यञ्जकास्तथा रसादिर्व्यङ्ग्योऽस्ति । तन्मते तेषां परस्परं व्यङ्ग्यव्यञ्जकभावसम्बन्धोऽस्ति । धनिकधनञ्जयौ व्यञ्जनाविरोधिनौ स्तः । तयोर्मते रसादीनां काव्येन सह न व्यङ्ग्यव्यञ्जकभावसम्बन्ध. । तौ तत्र भाव्यभावकसम्बन्धं स्वीकुर्वाते । तदनुसारं काव्यं भावकं रसादयश्च भाव्याः । धनिकः प्रतिपादयति—

अतो न काव्ये व्यङ्ग्यव्यञ्जकभावसम्बन्धः । किं तर्हि भाव्यभावकसम्बन्धः । काव्यं हि भावकं भाव्या रसादयः । धनञ्जयानुसारं यथा वाच्या क्वचित् श्रूयमाणा बुद्धिस्था वा क्रिया कारकैः संयुक्ता वाक्यार्थरूपं धरते तथैव रत्यादिस्थायिभावोऽपि विभावादिभिर्वाक्यार्थरूपेण प्रतीयते—

वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया ।
वाक्यार्थकारकैर्युक्ता स्थायीभावस्तथेतरैः ।। (४।३७)

उक्तकारिकामाश्रित्य धनिक कथयति—

तत्र विभावादय पदार्थस्थानीयास्तत्ससृष्टो रत्यादिर्वाक्यार्थ ।

अस्यायमेवाभिप्रायो यद्—यथा तात्पर्यवृत्त्या पदार्थानां ससर्ग एव वाक्यार्थत्वेन प्रतीयते तथैव विभावादिससृष्टो रत्यादिर्वाक्यार्थरूपेणैव प्रतीयते । तत्र व्यञ्जनाया नावश्यकता । चतुर्थप्रकाशस्यान्ते समेषामष्टाना रसाना लक्षणान्युदाहरणानि च प्रदर्शितानि ।

इत्थ द्रष्टु शक्यते यद् यद्यपि दशरूपकस्य रचना भरतनाट्यशास्त्रमाश्रित्यैव जाता तथापि तत्र भरतस्यान्धानुकरण नास्ति । दशरूपककाराणा नाट्ये शान्तरसनिषेध , व्यञ्जनाबहिष्कारस्तथा रसानुभूतिप्रक्रियादयो मौलिकविचारा ।

●●

किराते राजनीतिदर्शनम्

सस्कृतमहाकाव्यपरम्परा नितान्त प्राचीना विशाला चोदात्ताऽस्ति। महाकविना वाल्मीकिना स्वरामायणरचनया या महाकाव्यपरम्परा प्रारब्धा सा निरन्तर गतिशीला सती साम्प्रतमपि सस्कृतकाव्यससार सर्वाशत परिपूर्णता नयति। तत्परम्पराऽवेक्षणेनाचार्यबलदेवोपाध्यायानुसारं पद्धतिद्वितय परिलक्ष्यते तत्र। तयोरेकास्ति रसमयपद्धतिरपरालङ्कारपद्धतिश्च। रसमयपद्धतिसमाश्रिताना कवीना काव्यदृष्टि रसपरत्व पुनरलङ्कृतमार्गावलम्बिनां तद्दृष्टिरलङ्कारपरतां सश्रयते। रसमयपद्धतिमाश्रित्य विरचितेषु काव्येषु रसपरत्व, विषयबाहुल्यं सहजोऽलङ्कारप्रयोग , सहजा सरला च प्रसादमयी भाषा स्थान भजमानास्तिष्ठति। मार्गस्यास्य वर्गे महाकविवाल्मीकिकालिदासप्रभृतय कवय. परिगण्यन्ते। अलङ्कारमयपद्धतिर्विचित्रमार्गेणापि कथ्यते। अलङ्काराश्रिताया अस्या पद्धतेर्जन्मदातृत्वेन महाकविर्भारवि· परिगण्यते। एतामाश्रित्य विरचितेषु काव्येषु कथावस्तुनो लघुत्व वर्णनविस्तारस्याधिक्य च जायते। स्वल्पमपि वस्तु गृहीत्वा कविभिर्वर्णनैर्विशेषतया प्रकृतिवर्णनै. स्वस्वमहाकाव्यकलेवरवृद्धिर्विधीयते। समयपद्धतेर्विपरीतमेतत्पद्धतिसमाश्रयिणां काव्यभाषा कृत्रिमा, क्लिष्टा दुर्बोधा च भवति। कल्पनाप्राचुर्येणालङ्कारकृत्रिमप्रयोगेण च रसानुभूते. सुगमो मार्गो नावाप्यते। मार्गस्यास्य समाश्रयिणां मध्ये महाकविभारवे. प्रधानस्थान विद्यते। तस्य एकैव काव्यकृतिः 'किरातार्जुनीयम्' दिग्दिगन्तेषु तत्कीर्तिध्वजं विस्तारयति। अष्टादशसर्गात्मके महाकाव्येऽस्मिन् मुख्यतया महाभारतीयवनपर्वगतं कथावस्तु महाकविना भारविणा स्वकाव्यचातुर्येण विविधविषयवर्णननैपुण्येन विस्तारतां नीतम्। महाकाव्येऽस्मिन् नैकविषया वर्णनीयतां यातास्तेषु राजनीतिरेकतमोऽस्ति। किरातार्जुनीयस्य माहात्म्यमनेनैव परिज्ञातु पार्यते यत्तस्य परिगणना बृहत्त्रय्या सादरं क्रियते। तस्या परिगणितं महाकाव्यत्रितयमस्ति—किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितञ्च।

यद्यपि भारविर्नास्ति महान् राजनेता न वा तन्महाकाव्यं राजनीतिपरो ग्रन्थस्तथापि किरातार्जुनीयविश्लेषणेन सुष्ठु परिज्ञातुं शक्यते यत्तस्मिन् (किरातार्जुनीये) विद्यते राजनीतेर्भव्यं चित्रणं यत्र कुत्रचित्। कथनेऽस्मिन् याथार्थ्यन्तु वर्तत एव यत् किरातस्य कथानकं राजनीतिमाश्रितम् पाण्डवानां वनवासोऽपि राजनीतिकारणादेव जात·। वनवासिनां पाण्डवानां प्रधानशत्रुर्दुर्योधनोऽधुना राजरूपेण शासनं कुरुते प्रजाश्च सम्यक् शास्तीति वनेचरस्य (किरातस्य) वचनैर्विज्ञायते। अतो महाकाव्येऽस्मिन् राजनीतिचर्चा नितरां स्वाभावकी। एतदपि ध्येयमस्मिन् सन्दर्भे यन्महाकविभारवी राजनीतिं सम्यग् जानीते तथा ताम्प्रति (राजनीतिम्प्रति) रुचिं धत्ते।

अत्र कथनमिद नास्त्यप्रसङ्गत यत् किरातार्जुनीयकाले राजतन्त्रमासीत्। राजैव स्वराज्ये सर्वस्वभूत आसीत्। प्रजाकल्याणभावना तु नूनमासीत् तत्कालीनराजतन्त्रे परन्तु प्रजातन्त्र नैवासीत्। तदानीन्तने काले राजनीतावपि धर्मस्य कृते स्थानमासीदर्थाद् राजनीतिधर्माश्रिताऽभवत्। आधुनिकलोकतन्त्रे इव नासीत् सविधानन्तत्कालीनम्, तदा मन्वादिधर्मशास्त्रप्रतिपादितसिद्धान्तानुसारमेव समस्तानि राज्यकार्याणि सञ्चालितानि भवन्ति स्म। एतत्सर्व दृष्टिगत विधायैव किराते प्रकटित भारविराजनीतिस्वरूप सम्यक्तया परिज्ञातुं युज्यते। भारविपरिकल्पितराजनीतिदर्शनायोक्तदृष्टिरपेक्ष्यते।

सम्प्रति किरातार्जुनीयगतानि राजनीतिविषयकाणि तानि चित्राणि चित्रितानि परिज्ञातुमपेक्ष्यन्ते यैर्भारविसम्मतकिरातार्जुनीयगतराजनीतेर्दर्शन सुकर स्यात्।

भारवी राजनीतिशास्त्रज्ञाने तत्प्रयोगज्ञाने च महत्कौशलं धारयति। किरातार्जुनीयपर्यवेक्षणेन तदीयराजनीतिविषयक नीतिविषयक च ज्ञान बोधविषयताङ्गच्छत। प्रथमसर्गगतद्रौपदीवनेचरयोरुक्तिषु तथा द्वितीयसर्गगतभीमयुधिष्ठिरयोः कथनेषु नीतिराजनीतिलौकिकव्यवहारसम्बद्धं ज्ञान तदीय स्पष्टत परिदृश्यते। राजाश्रयत्वाद् भारवौ नीतिराजनीतिव्यवहारविषयकज्ञानस्यापूर्वो ज्ञानराशि।

किराते राजनीतिविषयक शास्त्रीय ज्ञानं, विशेषतो राज्ञ शासनपद्धत्या ज्ञान, प्रकाशतां याति। वस्तुत कस्यचिदपि महीपालस्य (शासकस्य) राजनीतिशास्त्रसम्बद्धबोधस्य प्रकाशन तत्प्रजाशासनपद्धत्यैव जायते। यस्य कस्यचिदपि विषयस्य शास्त्रीय ज्ञानन्तावन्न साफल्य याति यावत्तस्य प्रयोगो न जायते। भारविप्रणीतकिरातार्जुनीयस्य प्रथमसर्गे वनेचरो यथा दुर्योधनशासनपद्धतिविषये ज्ञापयति, तेन नूनं वक्तुमिद सुकर यद् दुर्योधन एकः सफलो राजा (राजनेता)। किरातस्य प्रथमसर्गस्य प्रारम्भ एव वनेचरस्याधस्तने कथने राजनीतिगताना गुप्तचरादिकर्मिकाणा हितकरकर्त्तव्यविषयको बोधो जायते—

क्रियासु युक्तैर्नृप! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

(किरात० १/४)

अस्मिन् कथने प्रभव. (राजानः) इति विशेष्यभूतस्य विशेषणरूपेण प्रयुक्तं 'चारचक्षुष' इति पद महनीयं सारतत्त्व धारयति। राज्ञो गुप्तचरा (दूता) एव तस्य नेत्राणि भवन्ति। राजा तन्माध्यमेनैव स्वराज्यविषयकाणि सर्वाणि कर्माणि क्रियमाणानि पश्यति। रजानीतिशास्त्र उक्तमपि—

चारैः पश्यन्ति राजानः शास्त्रैः पश्यन्ति पण्डिताः।
गावः पश्यन्ति गन्धेन चक्षुभ्र्यामितरे जनाः॥

अतश्चाराणां कर्त्तव्यमिदमापतति यत्तैर्नून यथार्थस्थितिविषये स्वप्रभवो न प्रतारणीया. । यतो हि एवङ्कृते तु नृपतीना महती हानिरेव भवेत्। साराशोऽस्त्यस्य कथनस्य यद् राजदूतस्येद कर्त्तव्यमस्ति यत् स सर्वदा स्वप्रभु यथार्थमेव कथयेत्। असत्यकथनेन न राज्ञ कल्याण न वा राजदूतस्य। वनेचरस्य क्षमायाचनस्यायमेव भावो विद्यते यद् राज्ञा सदा हितकरं वचन श्रोतुमुद्यतेन भाव्य भवेद्वा वचन कटुरूपम्। यतो हि—हितकर मनोहरञ्च वचन ससारे दुर्लभमेव।

किञ्चिदपि राज्यन्तदैव सफलम्भवति यदा राज्ञ मन्त्रिणश्च मध्ये सौहार्द सामञ्जस्य च भवति। अतो राज्ञा तन्मन्त्र्यादिना च सदा पारस्परिकसहयोगभावनयैव कार्य करणीयम्। राज्ञ कर्त्तव्यमस्ति यत् स स्वामात्यादेर्हितकरं वचनं शृणुयात्तथा मन्त्रिणां कर्त्तव्यमिदमस्ति यत्तै सदोचितमन्त्रणैव देया। अर्थाद् हितकरवचन(मन्त्रणा)श्रवणाभावे राजा तथा हितकरवचन(मन्त्रणा)कथनाभावे सखा (मन्त्री वा) क्रमश किम्प्रभुत्व कि सखित्वञ्च भजेते। उभयो (नृपामात्ययो) परस्परानुकूल्य एव राज्ये सर्वसम्पदो जायन्ते। दृश्य तथ्यमेतन्सर्वमधस्तने वनेचरकथने—

स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किं प्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ।।

(किरात० १/५)

श्लोकेऽस्मिन् राजनीतिसाफल्याय नृपामात्ययो पारस्परिकी सर्वहितकरी कल्याणकरी भावना च व्यक्ता। नून भारविणा राजनीतौ तत्साफल्याय नृपामात्ययो. परस्परसहयोग. काम्यते।

राजनीतौ यावन्नीतिर्न प्रतिष्ठां याति, तावन्न तत्साफल्य जायते। दुर्योधनेन दुरोदरच्छद्मना पृथिवी जिता, स जानीते सम्यक् यन्नीति विना न तत्कल्याणम्। एतदर्थमेव दुर्योधन. स्वराज्ये नीतेराश्रयण विधत्ते—

दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगती सुयोधनः । (किरात० १/७)

नीत्याश्रयण विना राजनीतिर्भारविदृष्ट्या न सफलेति ज्ञायतेऽनेन वनेचरवचनेन।

भारविसम्मतकिरातोक्तराजनीतौ केवल बाह्यशत्रूणामेव जयो नापेक्ष्यते प्रत्युत तत्र कामक्रोधाद्यान्तरिकशत्रूणां जयोऽप्यपेक्ष्यते। भारविराजनीतिः पूर्णतया मन्वादिप्रतिपारितं मार्गञ्चाश्रयते—

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ।।

(किरात० १/९)

भारविराजनीतौ धर्मार्थकामरूपस्य त्रिवर्गस्य (धर्मस्य, अर्थस्य, कामस्य च)

समवेतरूपेण सेवन न त्वेकाङ्गिरूपेण। तत्र "धर्मार्थकामा सममेव सेव्या यो ह्येकसक्त स नरो जघन्य" इति वचन परिपाल्यते। समानरूपेण त्रिवर्गस्य परिपालनेन तेषा (धर्मार्थकामाना) न कोऽपि पारस्परिको बाध —

"न बाधतेऽस्य त्रिगणः परस्परम्" । (किरात०, १/११ उत्तरार्धम्)

किरातचित्रिताया राजनीतौ पक्षपातस्य कृते नास्ति किमपि स्थानम्। राजा दुर्योधनोऽपराधिन शत्रुं यथा दण्डयति तथैव स्वपुत्रमपि सापराध दण्डयति। तत्कृते शत्रुणा सुतेन वा कृतो धर्मविप्लवोऽसह्य —

'गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम्' ।

(किरात०, १/१३ उ०)

दुर्योधन सामदामदण्डान् समाश्रित्य शासन कुरुते तस्य साम दानसहित तथा दान ससम्मान भवति। अद्य कस्मैचित् सम्मानप्रदाने प्रायेण नाश्रीयते नियम सर्वाशत । तदा मुख्यतो गुणा एव निर्णायकतत्त्वरूपेणाङ्गीकृता । दुर्योधनो गुणाश्रयणेनैव गुणवन्त कञ्चित् सम्मानयति—

'गुणानुरोधेन विना न सत्क्रिया' ।। (किरात०, १/१२ उत्तरार्धम्)

वनेचरवचनैरेतदपि तथ्य प्रकाश्यता याति यद् दुर्योधनः सामदामदण्डेति नीतित्रितयेन साक भेदनामकनीतिमपि समाश्रयते। राज्ये रक्षाविषयकसर्वपदेषु विश्वस्तानात्मीयजनान् नियुज्य स्वराज्यसञ्चालनं विधत्ते। सशङ्कोऽपि सर्वान् प्रत्यशङ्किताकार दर्शयति। ये खलु रक्षकपदमारूढा अभीष्टकार्याणि सम्पादयन्ति तेभ्यो धनादिप्रदानमपि विदधतीत्थं स्वकृतज्ञताभावं प्रकटयति—

विधाय रक्षान् परितः परेतरानशङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ।।

(तदेव, १/१४)

किरातगतायां राजनीतौ प्रजाहित सर्वोपरि विद्यते। राजनीतिगतोपायचतुष्टय-समाश्रयणेन (सामदामदण्डभेदाद्याश्रयणेन) न केवलन्तच्छासनदार्ढ्यम्प्रत्युतार्थसम्पत्तयोऽपि तद्राज्ये विलसन्तितराम्। एवमेव जनहितमाश्रित्य विहितकल्याणकार्यैः सर्वे जना निरतिशय सुखमुपलभन्ते (तदेव १/१४)। प्रसन्नभूता पृथिवी स्वयमेव धनधान्यादीनि ददातीव। (तदेव १/१८) दुर्योधन राज्ये कृषकास्तु नितरा मोदमाश्रयन्ते। तेन कृषकाणां कृते जलादिप्राप्त्यर्थमेतादृशी व्यवस्था कृता वर्तते यया कृषका अदेवमातृका भूत्वा सौख्यं लभन्ते। (तदेव १/१७)

राज्यरक्षार्थं सैन्यबलस्यापेक्षा क्रियते। दुर्योधनराज्य ईदृशा महाबलाः स्वाभि-

मानिनो लब्धकीर्त्तयो योद्धारो नियुक्ता सन्ति ये दुर्योधनसत्कृता सन्त समवेतरूपेण राज्यहित प्राणप्रणेनापि कर्त्तुमिच्छुका जायन्ते—

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्यसुभिः समीहितुम् ।।

(किरात०, १/१९)

किरातार्जुनीयगते राज्ये परराष्ट्रनीतिकृते महत्स्थान यतो हि सुनियोजितपरराष्ट्र-नीतिमन्तरा न किमपि राज्य सर्वाङ्गीणामुन्नत्तिं लब्धु समर्था भवति । दुर्योधन· परराष्ट्रनीति दृढा विधातु नितान्त सावधान । स स्वजनभूतैर्गुप्तचरैरन्यराज्ञा समस्ता क्रिया जानीते, परन्तु तत्कार्ययोजना फलप्राप्ते पूर्व न कोऽपि विज्ञातुम्प्रभवति—

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ।।

(तदेव १/२०)

एतेन दुर्योधनस्य राजनीतौ गुप्तचरयोजनाया विमल रूप विज्ञायते । ते 'गुप्तचरा इतरराजगतानि सर्वाणि कार्याणि जानन्ति परन्तु स्वस्वामिदुर्योधनेन क्रियमाणानि न कोऽपि विज्ञातु समर्थ ।

दुर्योधननीतिनैपुण्येनापरे सामन्तनरेशा एव तद्वशीभूता सन्ति यत्ते दुर्योधनस्य शस्त्रग्रहणक्रोधाद्याश्रयणमन्तराऽपि तच्छासन शिरोभिर्धारयन्ति—

गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ।।

(तदेव, १/२१)

अनेन सुष्ठु विज्ञायते यद् दुर्योधनसमये लघूनि राज्यान्यासन् । सामन्तराजानो दुर्योधनवशङ्गता आसन् । तैर्दुर्योधनाय गजादिरूपोपहारप्रदानमपि क्रियते स्म । (तदेव १/१६)

तदानीन्तनाया राजनीतौ यौवराज्यव्यवस्थाऽपि प्रचलन्ती दृष्टिगोचता याति तथा राजानो वृद्धावस्थाया शान्तिकामनया धर्मकर्मप्रवृत्ता दृश्यन्ते । दुर्योधन स्वभ्रातर दु.शासन यौवराज्येऽभिसिच्य यज्ञादिधर्मकर्म कुरुते—

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ।।

(किरात०, १/२२)

नि सशय तत्कालीनराजनीतौ स्वस्थगुप्तचरव्यवस्था परिलक्ष्यते । गुप्तचरै स्वराज्यस्य परराज्यस्य च वार्ता परिज्ञाय तद्विषये राजान· सूच्यन्ते स्म । परन्तु ते

(गुप्तचरा) स्वय किञ्चिद् विधातुं स्वतन्त्रा नासन्—

तदाशु कर्त्तु त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ।।(१/२५)

वनेचरानुसार दुर्योधनराज्यशासनविषये यत्किमपि विज्ञायते तेन नून किरात-कालीनराजनीतिस्वरूप समक्षमायाति समेषाम् । राजनीतौ तस्या निश्चितरूपेण राजहित प्रजाहित राजकर्मिकहितञ्च निविष्टमस्ति । पाण्डवाना शत्रुभूतस्य दुर्योधनस्य शासनपद्धति समुज्ज्वलरूपा नात्र सन्देह । परन्तु 'शत्रुताङ्गत दुर्योधनम्प्रति युधिष्ठिरस्य कीदृशो व्यवहार कर्त्तव्य ' इत्यस्मिन् विषये द्रौपदीभीमयोर्युधिष्ठिरस्य च विचारोऽवश्य ज्ञेय । एतद्विषये मतद्वय स्पष्टत, समक्षमायाति समेषाम् । द्रौपदी खलु 'शठे शाढ्य समाचरे'दिति नीते समर्थिका तथा भीमसेनस्तत्समर्थक । एतद्विपरीत युधिष्ठिर शान्तिनीतिपोषक । एतस्मिन् विषये किरातगतस्तेषा विचारो दृष्टिविषयता नेय ।

दुर्योधनशासनपद्धतिवृत्तश्रवणेन द्रौपदी भृश क्रोधाविष्टा जायते तथा युधिष्ठिर प्रति यदुच्चते तस्याय सार ।

ये जना दुर्योधनसमशत्रुभूतान् दुष्टान् प्रति मायायुत व्यवहार न कुर्वते, ते नून पराभवं व्रजन्ति । तैर्दुष्टैरेव तेषा विनाशोऽपि जायते—

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ।। (१/३०)

द्रौपदी शत्रून् प्रति क्रोधमूला नीति समर्थयति । तन्मते येऽवन्ध्यकोपा भवन्ति, तेषा वश्यता स्वयमेव जना समायान्ति । एतद्विपरीत क्रोधविहीनो जनो न केनचिदाद्रियते न वा तस्मात् कश्चिद् बिभेति—

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ।। (१/३३)

द्रौपदी युधिष्ठिर स्वमत ज्ञापयन्ती कथयति यच्छलछद्मपरायणं दुर्योधनम्प्रति सन्धौ दोषम्प्रदर्श्य सन्धिविघटनं करणीयम् —

अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि । (१/४५)
ईदृशमेव मतं भीमस्यापि विद्यते अथ चेदवधिः प्रतीक्ष्यते । (२/१६)

द्रौपदीमते मानो मानवतां धनं भवति । मानिनः प्राणप्रणेनापि मानं रक्षितुमुद्यता जायन्ते । मानस्तेष्वमुत्सवस्य कारणं जायते—

''पराभवोऽप्युत्सव एव मानिनाम्'' । (तदेव, १/४१)

युधिष्ठिरशान्तिनीतिमस्वीकुर्वाणायास्तस्या विचारे मुनय शान्तिनीत्या सिद्धिमाप्नुवन्ति न राजान —**'शमेन सिद्धिं मुनयो न भूभृतः'** ।। (तदेव, १/४२)

भीमोऽपि द्रौपदीनीतिसमर्थकः । तन्मते मनस्विभिर्विकासशील शत्रुगतोदय कथमपि न सोढव्य । (तदेव, २/८)

भीममते राजनीति शक्ता दृढाञ्च विधातु राजनीत्यङ्गभूतानीमानि पञ्चतत्त्वानि समङ्गीकरणीयानि । तानि सन्ति—

सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ।।

अर्थात् सहाय (मित्रराज्यसाहाय्यम्), उपाय (स्वकार्यसिद्ध्यर्थमुपायावलम्बनम्), विभागो देशकालयो (देशकालानुसारमुपायावलम्बनम्), विनिपातप्रतीकार (शत्रुकृतविपत्ति-रक्षणोपाया), सिद्धिः (शत्रूपरि विजयप्राप्ति) च ।

उक्त पञ्चाङ्गाश्रयणेन सुशक्ता राजनीति कोशस्य चतुरङ्गसैन्यस्य (दण्डस्य) च कारण भवति । राजनीतौ कोषदण्डयोर्महन्महत्त्वम् —

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः । (२/१२)

कौटिल्यानुसार शक्तिस्त्रिविधा भवति – ज्ञानबलं मन्त्रशक्ति , कोशदण्डबल प्रभुशक्ति , विक्रमबलमुत्साहशक्तिश्च ।

भीममते राजनीतावुत्साह सदाऽऽश्रयणीयो यतो हि उत्साहरहिता नृपा· कथमपि समृद्धीर्नाधिगच्छन्ति—**'न विषादेन समं समृद्धयः'** । (२/१५)

जातिकुलमर्यादारक्षका एव राजानो राज्यलक्ष्मीमधिगच्छन्ति । (तदेव २/१९) । भीमानुसारं तेजस्विनः स्वप्राणाननायासेन त्यजन्ति परन्तु स्वतेजस्विता मानमर्यादाञ्च न परित्यजन्ति (तदेव २/२०) । भीमस्येद दृढमभिमत यत्ते परेषां (शत्रूणाम्) अभ्युन्नतिं कथमपि न सहन्ते । **'प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया'** ।। (२/२१)

स्पष्टमेतद् यद् भीममतेन राजनीतौ शान्तिनीतिरनपेक्षितैव भवति । तस्यामुत्साहो, मनस्विता, तेजस्विता चादिगुणा अपेक्ष्यन्ते । समासतो वक्तु शक्यते यद् भीमोऽपि प्रकारान्तरेण द्रौपद्याः 'शठे शाठ्यं समाचरेत्' इति नीते समर्थक एव ।

द्रौपदीभीममतासमर्थकस्य युधिष्ठिरस्य व्यवहारगत विशेषतो राजनीतिगतश्च विचारोऽवश्यमेव विचारपथ नेय इति तन्मत विमृश्यते ।

शान्तिनीतिसमर्थकस्य तन्मते राजनीतौ वा व्यवहारे, सर्वथा विवेक श्रयणीय । तन्मतेऽविवेक परमविपत्तीना कारण कथ्यते—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।। (२/३०)

युधिष्ठिरमतेन गभीरशास्त्रश्रवणेन शरीर पवित्र जायते, शास्त्राध्ययनेन क्रोध-शान्तिर्जायते । पराक्रमेण क्रोधशक्ति शोभिता भवति तथा पराक्रमो नीतिपूर्वकार्जित-साफल्यस्याभूषण वर्तते । (तदेव, २/३२)

युधिष्ठिरवचनेनानेन क्रोधशान्तिपूर्वकपराक्रमाश्रयणेन नीतिगत साफल्य क्षेमकर जायते ।

नायमभिप्रायो युधिष्ठिरमतस्य यत्स राजनीतौ सर्वाशत क्रोधत्यागमावश्यक मन्यते । तन्मतानुसार यो राजा यथावसर क्रोध (तिग्मता) शान्तिञ्च (मार्दवञ्च) धारयति स सूर्य इव समस्त भूमण्डलमपि शास्तु प्रभवति—

समवृत्तिरूपैति मार्दवं समये यश्च तनोति तिग्मताम् ।

अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ।।(२/३८)

युधिष्ठिरमते यो मनुष्य (राजा) शास्त्रज्ञानमवाप्यपि स्वशरीरस्थान् काम, क्रोध, लोभ, मोह, भेद मत्सरश्चेति षडान्तरिकशत्रून्न पराजयते स शीघ्रमेव लक्ष्मीचाञ्चल्य-जनितमयशोऽधिगच्छति—

श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।

जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ।।(२/४१)

इत्थ किरातार्जुनीये राजनीतिविषयकमतद्वयस्य एकतो द्रौपदीभीममतस्य पुनरपरतो युधिष्ठिरगतस्य च शोभनं प्रकाशन जातम् ।

किराते पूर्वोक्तराजनीतिसम्बद्धवचनान्यन्तरा कतिपयान्यान्यपि राजनीतिपराणी वचनानि समुपलभ्यन्ते येन तत्कालीनराजनीतेदर्शनञ्जायते—

१ अगरीयान्न पदं नृपश्रिय (२/१४), २ अमूढ उदस्यते नयात् । (२/४९) ३ नयहीनादपरज्यते जन । (२/४९), ४ प्रकर्षतन्त्रा हि रणे जयश्री (३/१७), ५ परमं लाभमरातिभङ्गमाहु । (१३/१२), ६ महापकाराय रिपोर्विवृद्धि ।(१६/२४) ।

यद्यपि किरातार्जुनीय नास्ति राजनीतिपरको ग्रन्थो न वा महाकविर्भारवी राज-नीतिग्रन्थप्रणेता तथापि किरातार्जुनीये दुर्योधनशासनपद्धतिवर्णने, द्रौपदीभीमयुधिष्ठिरवचनेषु च यद् राजनीतिदर्शन जायते, तेन राजनीतिपरक ज्ञानन्तत्कालीनराजनीतिस्वरूपञ्च बुद्धिपटले विलसतितरामिति शम् ।

उत्तररामचरिते प्रकृतिचित्रणम्

सस्कृतकाव्यजगद् रससिद्धैर्यैर्महाकविभिर्गौरवस्थान नीतं, तेषु महाकविर्भवभूति-रन्यतम । 'कारुण्य भवभूतिरेव तनुते' 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इत्यादि-लोकविश्रुताभिरुक्तिभिस्तस्य लोकख्यातिः काव्यनैपुण्यञ्चावबुध्येते । तेन महाकविना केवल नाट्यत्रितयमेव विरचितम् । तानि सन्ति—महावीरचरितम्, मालतीमाधवम्, उत्तररामचरितञ्च । उत्तररामचरितन्तस्य नितान्त महनीया नाट्याकृति । तस्मिन् सप्ताङ्का येषु रामकथाया उत्तरार्द्धो रसमयपद्धत्योपवर्णित । रामकथोत्तरार्द्धगतस्य वस्तुनो घटनास्थान वनमेवास्ति । अत प्रकृतिवर्णननिपुणेन महाकविना प्रकृतिवर्णनस्यावसर स्वत एवाधिगत । सप्ताङ्केन विभक्तस्योत्तररामचरितस्य वर्ण्यविषयत्वेन प्रकृतिर्विशिष्टस्थान गतम् । अत्रोत्तररामचरितगत प्रकृतिचित्रण विविधप्रकारैर्विवेचनीयता नीयते ।

महाकविभवभूते प्रातिभचक्षुश्चराचरजगतो बाह्याभ्यन्तरगतमखिल स्वरूप तद्रहस्यञ्च सम्यक्तया विज्ञातु सर्वथा क्षमतामेतीति तत्प्रणीतरसभावमयरूपकत्रयानुशीलनेन विज्ञायते । नूनन्तस्य प्रातिभचक्षुषा कृत सूक्ष्मातिसूक्ष्मवस्तुभावदर्शन 'यत्र न रविस्तत्र कवि ' इति लोकख्यातामुक्ति सम्यक् चरितार्थयति । प्रातिभचक्षुर्दर्शनशक्त्या साक तेन तत्कृतदर्शन प्राकाश्य नेतु लोकोत्तरवर्णनाशक्तिरप्यवाप्ता । इत्थं महाकविर्भवभूतिर्नून भट्टतौतेन 'दर्शनाद् वर्णनाच्चाथ लोके रूढा कविश्रुति ' इति रूपेणोक्तं कविलक्षण सर्वाशतो यथार्थयति । तत्कृतेषु रूपकत्रये तस्य प्रकृतिप्रेम पदे-पदे नितरा प्रकाश्यमानं जायते । तस्य वैशिष्ट्यमिदं नून ध्येय यत् स महाकविकालिदास इव प्रकृते केवल कोमलरूपमेव न वर्णयति । तस्य कृतिषु विशेषत उत्तररामचरिते, तस्य प्रकृतिकठोररूपवर्णननिपुणाऽलौकिकशक्तिरपि सम्यक्तया दृष्टिपथमायाति ।

यद्यपि महाकविभवभूति करुणरसचित्रणेऽखिले ससारे चिरस्थायिनी दुर्लभा ख्यातिमवाप्तस्तथा 'कारुण्यं भवभूतिरेव तनुते' इति रूपेण काव्यममर्माभिज्ञैर्मनीषिभि सम्मानितोऽपि, परन्तु तस्य सर्वातिशायिरूपेण कृत भव्य सहृदयानन्दकर प्रकृतिचित्रण कथमपि दूरीकर्त्तु दृष्टिपथान्न पार्यते 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इत्युक्तिर्महनीयानि यान्याधारभूतानि कारणान्याश्रित्य सहृदयलोकसमक्ष नीतानि तत्र प्रकृतिवर्णनगतं तदीयमप्रतिम नैपुण्यमप्यन्यतमम् । सौभाग्याद् महाकविना भवभूतिनोत्तररामचरितकथावस्तुघटनास्थलरूपेण वनमप्यधिगतम् । यत्र विशेषरूपेण प्रकृतिगतविविधस्वरूपप्रकाशनाऽवसरोऽपि तेनावाप्त ।

एतदप्यत्र नूनमवधेय यदुत्तररामचरितस्य लोकख्यातनायकभूतस्य रामस्य तथा

नायिकाभूताया सीतायाश्च वनवासकालिक सहज प्रकृतिप्रेमापि प्रकृतिवर्णनरूपकार्ये सहायत्वेन जातम्। नायिकाया जनकनन्दिन्या सीताया प्रकृतिम्प्रति सहजानुराग। कालिदासस्याभिज्ञानशाकुन्तलस्य नायिका शकुन्तला यथा प्रकृतिसहचरी सती प्रकृतेरभिन्नतामधिगता दृश्यते तथैवोत्तररामचरितस्य नायिका सीताऽपि प्रकृत्यभिन्नता गता राजते। सीतया पालिता पोषिता वन्यप्राणिनस्तथा तद्वनवासीयजीवनसम्बद्धा अन्यपदार्थाश्च भवभूते प्रकृतिवर्णनपराया दृष्टेर्विषयता गता। यद्यपि नाटकेषु महाकाव्येष्विव प्रकृतिचित्रणाय स्वातन्त्र्येणावसरो न लभ्यते, तथापीद भवभूते प्रकृतिप्रेम्णो वैभव यत्तेनोत्तररामचरिते नाटके विशद चराचरप्रकृतिरुपवर्णिता।

सन्दर्भेऽस्मिन् विचारणीयमेतद् यद् भवभूति प्रकृतिसान्निध्यमवाप्तो जन इव ता सम्यग् जानीते तथा यथाशक्ति वर्णयति। प्रकृते कोमल कठोरञ्चोभयमपि रूप तेनावगतम्। उभयो रूपयोर्मध्ये यद्यपि तस्य तदीयकठोररूपस्य वर्णने विशेषाभिरुचि परन्तु कथनस्यास्य नायमभिप्राय कदापि यत्तेन प्रकृते कोमलरूपवर्णने काचिदनभिरुचि प्रदर्शिता। वस्तुस्थितिरेषाऽवश्यमेव ध्यातव्या यत् स (भवभूति·) प्रकृतेरुभयरूपवर्णने साफल्यमवाप्त इत्युत्तररामचरिताङ्कितप्रकृतिवर्णनपर्यवेक्षणेन ज्ञायते।

इत्थं प्रतिभाति यद् भवभूति प्रकृतिम्प्रति सहजत समाकृष्ट। उत्तररामचरिते स प्रकृतिवर्णनमन्तरा स्वकविताकलामलौकिकी प्रतिभाञ्च कृतार्थामेव न मन्यते। प्रकृतिम्प्रति तस्य सहजानुरागस्यानुमानमनेनैव कर्त्तु शक्यते यत्तेन नाटकारम्भ एव चित्रवीथिकाया नैकानि भव्यानि चित्राणि प्रकृते प्रस्तौति दर्शकसमक्षम्। नाटकगततपोवन-प्रस्रवणपर्वतपम्पासरोवरादीना चित्ताकर्षकाणि दृश्यानि निश्चितरूपेण मनासि हरन्ति। कविकल्पिताश्चित्रिताश्च भगवती वसुन्धरा, भागीरथी, तमसा, मुरला, गोदावरी, वनदेवी वासन्ती च नाटक भव्यता नेतु तथा प्रभावभरितञ्च विधातु सहायता यान्ति।

वीथिकायामेव राम 'देवी। रमणीयमेतत्सर' इत्युक्त्वा सीता पम्पासरोवरस्य मनोहारिणी छटा दर्शयति—

एतस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भः परिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो मया विभागः ।।

(उ० रा० च० १/३१)

श्लोकेऽस्मिन् पम्पासरोवरस्य यथार्थं रमणीयं स्वरूपं प्रकाश्यमान सत् सहृदयानां चित्तानि भावपूरितानि विधत्ते। सरोवरस्य यथार्थ बिम्बमपि साकारता याति। एकतोऽय सरोवरीयं

मनोरम रूप प्रकाशयति पुनरपरतो रामचन्द्रस्य भावपरीत हृदयमपि प्रकाश नयति।

मनोरमप्रकृतेरेकमपर बिम्ब दृष्टिपथमवश्यमेव नेयम्। नाटकस्य द्वितीयाङ्के रमणीयपञ्चवटीदर्शनावसरे शम्बूकद्वारातत्र प्रवहन्तीना निर्झरिणीना वर्णित शोभासंवलित रूप सर्वान् भावभावितान् विधत्ते—

इह समदशकुन्ताक्रान्तवानीरवीरुत्-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः।।

(उ० रा० च० २/२०)

अर्थात् पञ्चवट्या प्रवहन्त्यो नद्यः क न रमयन्ति? यासा जलानि मदोन्मत्तपक्षि-समाश्रितवेतसलताभ्य. पतितै. पुष्पैर्नितान्तं सुगन्धितानि शीतलानि विमलानि च सन्ति। यासा प्रवाहाश्च परिपक्वफलभरै श्यामलजम्बूवृक्षकुञ्जेषु पतनकारणाच्छब्दायमानाश्च सन्ति।

एकमपर कोमलभावभरित प्रकृतिगत चित्र दर्शनीय यस्मिन् वनवासकाले पौन्य पुन्येन विलोकिता सान्निध्यमवाप्ताश्च पञ्चवटीभागाश्चित्रवीथिकादर्शनप्रसङ्गे पुनरपि दृष्टिपथ समायान्ति राम नितरा भावयन्ति च—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति।।

(उत्तर० २/२७)

सस्कृतकवीनां प्रकृतिवर्णनानि प्रायेणालङ्कृतानि भवन्ति। यद्दर्शनेन वक्तुमिद नास्ति सुकरं यत्तत्कृतं तद्वर्णन कल्पनामण्डितमेवाथवा तस्मिन् विद्यते किञ्चिद् बिम्ब-ग्राहित्वम्? भवभूतिरस्ति खल्वीदृशो महाकविर्येन प्रकृतेर्बिम्बग्राहिस्वरूप चित्रितं स्वनाटकेषु विशेषेणोत्तररामचरिते।

एतद्विपरीत भवभूतिकृत प्रकृतिवर्णन विस्तृतन्तथा वास्तविक भवति। तेन कृतेन वर्णनेन प्रकृतिगत समग्रं चित्र मानसे चित्रितमिव जायते। सस्कृतस्यान्यकवीनामिव भवभूतिकृत प्रकृतिवर्णनं नास्त्युद्दीपनरूपेणापि तु तदस्ति आलम्बनरूपेण। तत्काव्येषु चित्रितमालम्बनगत वर्णन निश्चितरूपेण हृदयहारि प्रभावमण्डितञ्च जायते। इदमेव कारण यत् प्रकृतिवर्णनपरया तद्दृष्ट्या वनानि, लता, वृक्षा·, पर्वता, नद्य, पशव, पक्षिणश्चेति सर्वे कदाप्यदृश्या न

जायन्ते। उत्तररामचरितगतप्रकृतिवर्णनविश्लेषणेनोक्तकथ्य याति सत्यताम्।

यथोक्त भवभूते प्रकृतिवर्णननिपुणा कला प्रकृते कठोररूपसमुद्घाटने विशेषतो रमते। एतादृशानि वर्णनानि यथार्थभित्तिमाश्रितानि भवन्ति तथा बिम्ब ग्राहयितु सर्वथा समर्थानि च जायन्ते। कतिचिच्चित्राणि दृश्यानि तत्सम्बन्धीनि।

ग्रीष्मर्तुर्नून षण्णामृतूना मध्ये स्वभीषणरूपकारणादसह्यो दु खदायकश्च भवति। भयावहे कठोरतामापन्ने तस्मिन् समस्तचराचरजगतश्च दशा नितान्त दयनीया जायते। दण्डकारण्यभीषणतावर्णनप्रसङ्गे भवभूति कथयति—ग्रीष्मर्तुकाले कानने क्वचिच्छान्ति, क्वचिद् हिंसकजन्तूना प्रचण्डध्वनि. श्रूयते, क्वचित् स्वेच्छया सुप्ताना विस्तृतफणवता भुजङ्गानामुष्णश्वासैरग्निरुत्पद्यते, जलस्य सत्ता विनाशं गता, यत्र कुत्रचित् तुच्छगर्तेषु स्वल्पजलस्थितिर्दृश्यते। पिपासापीडितै. प्रतिसूर्यकैरजगरस्वेदजलपानेन स्वपिपासा शान्ति नयन्ति—

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभुजगश्वासप्रदीप्ताग्नयः।
सीमानः प्रदरोदरेषु विरलस्वच्छाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते।।

(उत्तर० २/१६)

एकमन्य प्रकृतिभीषणरूपप्रकाशक चित्र नयनगोचरता नेतव्यम्—

गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः।
एतस्मिन्नचलाकिनां प्रचलतामुद्वेजिताः कुजितै–
रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः।।

(उत्तर०, २/२९)

क्रौञ्चावतपर्वतस्य यथार्थरूपं वर्णयन् कवि कथयति यदस्मिन् गुञ्जायमाना कुञ्जकुटीरा· सन्ति, अत्र भल्लूकाना घू-घूशब्दैर्वर्धमानो ध्वनि. श्रूयते, यत्र काका नि·शब्दा सन्ति, यत्र मयूरशब्दैर्भयभीता. सर्पा पुराणचन्दनवृक्षस्कन्धेष्वितस्ततश्चरन्ति।'

क्रौञ्चावतपर्वतगतवर्णनमिद नून तद्बिम्बं ग्राहयति तथा तस्य पर्वतस्य भयङ्कररूप समुस्थापयति।

उत्तररामचरितस्य तृतीयाङ्कगतं प्रकृतिवर्णनं नितान्तं विततं, व्यापकं, हृदयावर्जक-ञ्चास्ति। तस्मिन् प्रकृतिसम्बद्धान्यनेकानि भव्यचित्राणि चित्रितानि वर्तन्ते यैः पाठकानां

मनासि आनन्दसागरनिमज्जनपरता यान्ति। भवभूतिना तत्र विहित प्रकृतेर्मानवीकरण मानवस्य प्रकृतेश्च मध्ये दूरत्व निवारयति पारस्परिकसान्निध्य स्थापयति च। तत्सम्बद्धानि (प्रकृतिवर्णनपराणि) चारुचित्राणि नून सरसजनचित्तानि चमत्कुर्वन्ति कालिदासविहितं प्रकृतेर्मानवीकरण स्मारयन्ति च। अत्र तमसा, मुरला, वनदेवी वासन्ती चेति सर्वाणि पात्राणि मानवरूपेणोपस्थितानि भवन्ति। सती सीतादेवी भगवत्या भागीरथ्या· क्रोडे स्वतनयद्वय जनयति। अस्मिन् अङ्के प्रकृतेर्मानवस्य च मध्ये यादृश सान्निध्यं स्थापित भवभूतिना तेन सर्वेषा परिवारसदस्यतामवाप्तानि रूपाणि समवलोक्यन्ते। सीतास्नेहभाजन वन्यकरिशावक समक्षमायाति, यस्य परिपालन सीतया पुत्रवत्कृतमासीत्। सीताया पशून् प्रत्यपि भावभरितवात्सल्यभावमवलोक्य ता (सीता) प्रशसन् रामो वदति—

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसङ्क्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम्॥

(उत्तर०, ३/१६)

श्लोकेऽस्मिन् स्वप्रियतमया साक जलक्रीडापरस्य गजस्य याश्चेष्टाश्चित्रितास्तासु नितान्त सहजता स्वाभाविकता, भव्यता, चित्ताकर्षकता चास्ति। सीतापालितो गज एकतो रामेण साक मातृवत् स्वपालिकाया सीताया. आनन्द पराकाष्ठा नयति, पुनरपरत सीताया अप्रतिमवात्सल्यस्नेह प्रकटयति च। सहृदयचेतसामानन्दकरत्वन्तु विद्यत एव तस्मिन्।

प्रकृतिमानवसान्निध्यसम्बन्धस्य प्रकाशकोऽधस्तन श्लोको द्रष्टव्यो यस्मिन् सीतापालितमयूरस्य भावमयं चित्र चित्रित विद्यते। वासन्ती राममप्रति तत्पालितस्य मयूरस्य वर्णन विदधती वदति यत् प्रत्यग्रविनिर्गतसुन्दरचञ्चलपुच्छ य मयूर तव (रामस्य) प्रिया सीता लालनपालनपूर्वकमवर्धयत् सोऽयं मयूर स्वप्रियया सह कदम्बवृक्षे उच्छिखो रत्नकिरीट इव नदति—

अनुदिवसमवर्धयत्प्रिया ते यमचिरनिर्गतमुग्धलोलबर्हम्।
मणिमुकुट इवोच्छिखः कदम्बे नदति स एष वधूसखः शिखण्डी॥

(उत्तर०, /१८)

तृतीयाङ्कस्य अधोलिखित श्लोकोऽपि द्रष्टव्यो यस्मिन् पावितहृदया वासन्ती दण्डकारण्यमागत राम विलोक्य परमहर्षिता सती—सर्वान् वन्यवृक्षादीन् तत्सत्काराय प्रेरयन्ती कथयति यत्—'सर्वे वन्यवृक्षा रामाय स्वपुष्पफलैरर्घ्य ददतु, वनवायव विकसितकमलगन्धेन सुगन्धिताः सन्त प्रवान्तु तथा अनुरागयुता पक्षिण स्वमधुरकण्ठेन

कलरव कुर्वन्तु, यतो हि राम स्वयमेव वनमिद पुनरागत. —

ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः ।
कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः ।।

(उत्तर०, ३/२४)

श्लोकोऽयं कालिदासीयं 'पातु न प्रथम व्यवस्यति जलं' इति श्लोक स्मारयति यस्मिन् पतिगृह प्रति प्रस्थातु समुद्यता समलङ्कर्त्तु कण्वाश्रमगता· समे वृक्षा आहूता ।

भवभूते. प्रकृतिचित्रणगतमेकमन्य महत्त्वपूर्ण वैशिष्ट्यमत्र बोध्यं यत् स वर्ण्य-विषयस्वरूपमवगत्य तदनुसारं भाषां प्रयुङ्क्ते । कठोरवर्ण्यविषयवर्णनावसरे तस्य भाषाया समस्ता कठोरा च पदावली प्रयुक्ता भवति । एतद्विपरीत कोमलवर्णनीयविषयवर्णनप्रसङ्गे भाषागता पदावली प्रायेण कोमलत्वं व्रजति । भाषागतं वैशिष्ट्यमिदं तदीय प्रकृतिवर्णनातिरिक्त-विषयवर्णनेऽपि सहजतो दृष्टिगोचरतां गच्छति । उत्तररामचरिते तथ्यस्यास्य साधकानि नैकानि प्रमाणानि सन्ति । प्रसङ्गेऽस्मिन् बोध्यमिदं यत् तत्रयुक्तपदावल्यामपूर्वा ध्वन्यात्मकता दरीदृश्यते । यद्वशात् वर्णनीयविषय साक्षादिवानुभूतिगम्यो भवति । एतेषु स्थलेषु पदावली श्रवणमात्रेणैव वर्ण्यात्मको भावोऽनुभूतिविषयता विन्दति । एतद्विषयकाणि कतिपयचित्राणि प्रस्तूयन्तेऽत्र यैरुक्तकथ्यं प्रमाणयितु सुकरता स्यात् —

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि–
र्घर्मस्रं सितबन्धनैश्च कुसुमैरर्चन्ति गोदावरीम् ।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ।।

(उत्तर०, २/९)

वने गोदावरीतटे विराजमानान् वृक्षान् समाश्रित्य कल्पनाविभवभरितो महा-कविरुत्प्रेक्षते, यत् तटस्था वृक्षा स्वपतद्भि. पुष्पैः गोदावरीमर्चन्ति, वृक्षेषु बहव. कपोता कुक्कुटाश्च नीडं निर्माय कूजन्त· तिष्ठन्ति, छायाश्रिता काकादय. पक्षिण स्वचञ्चुभि. वृक्षेभ्य. कीटान् त्वचश्च निष्कासयन्ति, तथा कण्डूतियुक्तगजाः स्वगण्डस्थलेन वृक्षान् कर्षन्ति । तेन कम्पमानेभ्यः वृक्षेभ्य· पुष्पाणि गोदावर्यां पतन्ति ।

एकस्मिन्नेव श्लोकेऽत्रानेकवस्तुवर्णनेन मध्याह्नकालिकवृक्षाणां तत्सम्बद्धपशुपक्षिणां स्वाभाविकक्रियाकलापगतं चित्र नितान्तमद्भुतम् । वर्णनमिदं बिम्बग्राहित्वमपि भजत

इत्यपि ज्ञेयमत्र। सन्दर्भेऽस्मिन् अधोलिखितस्याप्यनुचिन्तनमपेक्ष्यते तेनोपर्युक्त तथ्य प्रामाणिकता श्रयते—

एते ते कुहरेषु गद्गदनदद् गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः।
अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै–
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः।।

(उत्तर०, २/३०)

अर्थात् कुहरेषु गद्गदनदद्गोदवरीसलिला जलदाश्रितशिखराग्रनीलवर्णकूटास्त एते दाक्षिणा पर्वता सन्ति। परस्पराघातसङ्कुलचलमहातरङ्गकलकलैर्वेगवन्तस्त एते गम्भीरजला पवित्रा नदीसङ्गमा वर्तन्ते।

एतस्मिन् श्लोके पर्वताना नदीसङ्गमानाञ्च भव्यं सजीव च वर्णन सर्वान् चमत्करोति। अत्र प्रयुक्तपदावल्याऽपूर्वाध्वन्यात्मकता मनासि हरन्ती राजते।

उक्तवर्णनैर्वक्तुमिदं शक्यते यद् भवभूति काव्यजगतस्तानि सर्वाणि वैशिष्ट्यानि धरते यै कोऽपि कविर्महाकविपदवीमलङ्कर्त्तु क्षमते। स रसभावालङ्कारादियोजने यथा निरतिशयं नैपुण्य भजते, तथैव प्रकृतिवर्णनेऽपि चमत्कारि चातुर्य श्रयते। संस्कृतसाहित्ये महाकविकालिदासमपहाय नास्ति कोऽपि कविरन्यो यस्तत्समकक्षतां यातुं प्रभवेत्। तेनोत्तररामचरिते निजकाव्यप्रतिभया कल्पनावैभवेन लोकोत्तरवर्णनाचातुर्येण च नितान्तं सुसज्जीकृता प्रकृतिनटी युगयुगान्तं सहृदयजनचेतांसि समाह्लादयन्ती तथा भवभूतेरलौकिककाव्यप्रतिभा प्रकाशयन्ती च स्थास्यतीति शम्।

●●

वेदेषु विश्वबन्धुत्वभावः

ज्ञानार्थक 'विद्' धातो 'घञ्' प्रत्ययययोगाद् वेदपद निष्पन्न भवति। यस्यार्थ इत्थ क्रियतेऽभियुक्तै —"विदन्ति सकलधर्मार्थरहस्यमनेनेति वेद ।" वेदाश्चत्वार सन्ति— ऋग्वेद., यजुर्वेद , सामवेद , अथर्ववेद । वेदाना चातुविध्य छान्दोग्योपनिषदि प्रतिपादिर्विमेवम्—

'ऋग्वेद भगवतोऽध्येमि यजुर्वेद सामवेदमाथर्वण चतुर्थम्' । मुण्डकोपनिषदि 'ऋग्वेदो यजुर्वेद सामवेदोऽथर्ववेद इत्यादिरीत्या तथा तापनीयोपनिषदि ऋग्यजु - सामाथर्वाणश्चत्वारो वेदा साङ्गा सशाखाश्चत्वार पादा भवन्ति' इति रूपेण वेदाना चतुर्विधत्वं प्रकाशितम्।

लोकविश्रुतभारतीयसस्कृतेर्भारतस्य धर्मस्य, दर्शनाना, ज्ञानविज्ञानयो कला-दीना, कि बहुनाऽखिलस्यापि प्राचीनभारतीयवाड्मयस्य मूलप्रेरकत्वेन वेदा एव विराजन्त इति विज्ञायते निखिलैरभिज्ञै । मानवकल्याणाय निर्धारिताश्चतुर्विधा धर्मार्थकाममोक्षाभिधाना पुरुषार्थास्तत्रैव मूलरूपेण तिष्ठन्ति। भारतीयास्तिकजीवनस्य नास्ति कोऽप्येतादृशो भागो यत्र वेदप्रामाण्य नाधिगम्यते। भारते प्रायेणाचारे, व्यवहारे, धर्मादिषु च वेदप्रतिपादिता व्यवस्थैव मान्यते। भारते आहिमालयात् कन्याकुमारी यावत्, आपश्चिमात् पूर्वाञ्चल यावत्, हिन्दूना षोडशसंस्कारा वेदमन्त्रैरेव विधीयन्ते। यत्र-तत्र सर्वत्र सम्पद्यमानेषु विवाहादिसस्कारेषु वैदिकमन्त्राणामेवोद्घोष श्रवणगोचरतामधिगम्य सर्वान् जनान् पावयति तेष्वेकमप्रतिमभाव जनयति च।

भारतीयाना कृते वेदा लौकिकपारलौकिकवस्तूना परिज्ञानाय साधनभूता सन्ति। वेदमाहात्म्यमिद मनसि निधाय मनुनोच्चस्वरेणोद्घोषितम्—

सर्वेषां तु नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।
यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।। (मनु०)

केचिद् वेदरहस्यानभिज्ञा जना वेदज्ञान नीरसमिति प्रतिपादयन्ति, तेषा कृते नाट्यशास्त्रविचक्षणाना भरतमुनीनामधस्तन वचनमिद समीचीनोत्तरत्वेन मन्येत, यस्मिन् स काव्यललामभूतनाट्यस्य सर्वाणि प्रमुखतत्त्वानि चतुर्भ्यो वेदेभ्य एव विनि सृतानीति स्वीकुरुते—

जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसमाथर्वणादपि ।। (ना०शा०)

जगद्वन्द्याया लोकविश्रुताया भारतीयसस्कृतेर्मूलन्तु वेदेष्वेव राजते । भारतीय-सस्कृतेरनेकानि वैशिष्ट्यानि सन्ति, तेषु विश्वबन्धुत्वभावना सर्वाणि वैशिष्ट्यान्यतिशेते । आध्यात्मिकभावनानुविद्धा भारतीया सस्कृति· सर्वेष्वपि प्राणिषु ब्रह्माशभूतस्यैकस्यैवात्मनो दर्शनं विधत्ते । तस्या औदार्य तथा विश्वबन्धुत्वभावना चाधस्तनेषु पद्येषु यथार्थत्वेनोद्घुष्येते—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

भारतीयसंस्कृतिप्राणभूतेय विश्वबन्धुत्वभावना वेदेषु स्फुटतया दरीदृश्यते । ससारेऽस्मिन् सस्कृते सभ्यतायाश्च सर्वप्रथम दर्शन वेदेष्वेवोपलभ्यते । 'कृण्वन्तो विश्वमार्यम्' इत्यादिना न केवलं भारतमपि तु समस्त विश्वमार्य (श्रेष्ठ) विधातुमभिलाषव आर्या· स्वमानसवैशद्यं स्वीयविश्वबन्धुत्वभावनां च प्रकटीचक्रुः । वेदानुशीलनेन संस्कृते सभ्यतायाश्च विकासक्रमोऽवगन्तु शक्यते । वैदिकीसस्कृतिर्न केवलं सर्वश्रेष्ठा, अपि तु सा विश्वस्य प्रथमा संस्कृतिरस्ति । वस्तुतो मानवसभ्यतायाः सस्कृतेश्च प्रथम वरदान वेदा एव, नात्र सन्देहलेश । यजुर्वेदे युक्तमेवोक्तम्—

''सा प्रथमा संस्कृतिर्विश्ववारा'' । (यजु० ७/१४)

गीतायां 'परस्पर भावयन्त श्रेयः परमवाप्स्यथ' इत्यादिरूपेण प्रतिपादिता समाजकल्याणकरी भावना सर्वप्रथम वेदेषु दृष्टिपथं याता । यजुर्वेद आदानप्रदानयोर्महत्त्वमङ्गीकृत्यैव सम्यगुच्यते—

देहि मे ददानि ते नि मे धेहि नि ते दधे ।
निहारं च हरासि मे निहारं निहराणि ते ।।

(यजु० ३/५०)

वेदेषु गृहस्थानां कृतेऽतिथीन् सत्कर्तु बुभुक्षुभ्योऽन्नं दातु निर्देशो प्रदत्तोऽस्ति । वेदमते य· खलु गृहस्थोऽन्नादिभि. समृद्धस्सन्नप्यन्नाभिलाषुं निर्धनतया समागतान् दुःखिन प्रति कठोरभावं धरते तथा स्वय सुखपूर्वकं भुङ्क्ते स कदापि सुखदातार मित्र नाप्नुते । य. खलु गृहस्थोऽन्नाभिलाषिणे दुर्बलयाचकायान्नं प्रदत्ते स एव सत्यं भुङ्क्ते । ईदृशो दाताऽपरेभ्यो दातुं यथेष्टमन्नं कठिनसमये सहायकमित्रञ्चावाप्नोति—

य आघ्राय चकमानाय पित्वोऽन्नवान्त्सन्नफितायोपजग्मुषे ।
स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डिताटं न विन्दते ।।२।।

स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ।।३।।

(ऋ० १०/११७)

एषु मन्त्रेषू सार्वजनमाङ्गल्यमूलिका विश्वबन्धुत्वभावना प्राकाश्यमाप्याति ।

साम्यभावसवलितो व्यवहारो विश्वबन्धुत्वभावनाया महनीयमङ्गम् । यतो हि साम्ये बन्धुत्व प्रतिष्ठितम् । भावमीदृश सम्यक् परिज्ञातुमधोलिखिता वैदिकमन्त्रा अवश्यं ध्येया, येषु सर्वहितकर उपदेश. निविष्टोऽस्ति । ऋषि कामयते यत् समेषा जनाना जलस्नान समानं भवेत्, सर्वो जन साम्यभावभावित. सन् अन्न विभज्य गृह्णीयात्, समे जना एकेनैव कौटुम्बिकभावसूत्रेण निबद्धा स्यु , समेषा हृदय समानमीर्ष्यादिरहितञ्च स्यात्, सर्वे परस्परं तथैव प्रेम्णा कामयन्ता यथा गौ सद्यो जात निरावत्स काङ्क्षति—

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतार नाभिमिवाभितः ।।

(अथर्व० ३/३०/६)

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाध्न्या ।।

(अथर्व० ३/३०१)

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रार्मयि कल्पतामस्मिल्लोके शतं समाः ।।

(यजुर्वेदे १९/४६)

एषु मन्त्रेषु सर्वजनान् प्रति साम्यमूलक व्यवहार विधातु सर्वे जना निर्दिष्टा । सर्वेषा जनाना सम्पत्तौ विचारे व्यवहारे च प्रतिष्ठिते साम्यभावे विश्वबन्धुत्वभावप्रतिष्ठाया न कोऽपि सन्देह· स्यात् ।

आदानप्रदानयोर्नून विश्वबन्धुत्वभावो मूलत्वेन विराजते । वेदेषु क्वापि सङ्कीर्णता नयनगोचरतां न याति । तेषु न केवल कस्यचित् समाजविशेषस्यापि तु समेषा मानवानां कल्याणकरो भावो दृश्यते । सर्वै प्रकारै. सर्वेषां पुरुषाणां कीदृशी परिपालनकामना परिलक्ष्यतेऽस्मिन् ऋग्वेदीये मन्त्रे—

"पुमान् पुमांसं परिपातु विश्वतः" । (ऋ ६/७५/१४)

अधुना भौतिकभोगविलासलिप्ता जना परापवाद शृण्वन्त परमानन्दमनुभवन्ति, परपीडा विलोकयन्तश्च स्वचक्षूषि कृतार्थयन्ति, परन्तु वैदिका ऋषयो यजुर्वेदे स्वकर्णैरखिलमानवाना कल्याण श्रोतुमिच्छन्ति तथा स्वचक्षुभिश्च समेषा भद्र द्रष्टु कामयन्ते—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँ संस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।

(ऋग्वेदे, १/८९/८)

वैदिकप्रार्थनासु समष्टिभावना सर्वतोभावेन दृष्टिपथमायाति । वैदिका ऋषय समष्टिगतमेव माङ्गल्य कामयन्ते । यत्र कुत्रचित् व्यष्टिगतकल्याणाभिलाष प्राप्यते, तत्रापि व्यापिनी समाजकल्याणभावनैव तन्मूले विद्यते । वस्तुतस्तु समस्तविश्वस्य कल्याणकामनैव प्रार्थनामूलम् । यजुर्वेदे देव सवितार परमर्षिर्याचते यद् देवः सविता तस्मात् सर्वाणि पापकर्माणि दूरीकरोतु तथा त भद्रञ्च प्रापयतु —

विश्वानि देव सवितुर्दुरितानि परासुव ।
यद् भद्रं तन्न आसुव ।।

(यजुर्वेदे, ३०/३)

'पापान्निवारयति योजयते हिताय' इत्यादिना प्रतिपादितमित्रलक्षणलक्षितो जन सर्वदा स्वमित्रस्य हितमेवाभिलषति हितमेव च कुरुते । यजुर्वेदस्याध उपस्थाप्यमाने मन्त्रेऽनुपमो विश्वबन्धुत्वभाव परिदृश्यते, यस्मिन् ऋषिर्विश्वस्य प्राणिमात्रं मित्रचक्षुषा द्रष्टुमीहते—

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे ।।

(यजुर्वेदे ३६/१८)

अधुनाऽखिले भुवने सर्वत्र विश्वशान्त्यर्थ सर्वे कोलाहल कुर्वन्ति, परन्तु विश्वशान्तिर्दूरमेव गच्छति । तत्रेदमेव कारण यत् सर्वे वचसैव शान्तिमभिवाञ्छन्ति न तु कर्मणा ।

उपकारिषु तु सर्वे साधवो भवन्ति, परन्तु वास्तविक. साधुस्तु स एव योऽपकारिष्वपि साधुर्भवति—

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ।।

भारतीय आर्यः सर्वान् जनान् प्रति सुमति धारयितुं समीहते । स कस्यचिदुपकारित्वमपकारित्व वा न पश्यति—

''यांश्च पश्यामि यांश्च न तेषु मां सुमतिं कृधि'' ।।

(अथर्ववेदे, १७/१/१७)

भावस्य केन्द्रमन्त कारण भवति। अन्त·करणमथवा मनश्चेन्निर्मल पावन कालुष्यरहितञ्च जायेत, तदा गभीराऽपि मानवस्योक्तिर्वास्तविककार्यरूपेण परिणता न स्यात्। इदानीन्तने युगे प्रायशो मानवस्य मनस्यन्यत्, वचस्यन्यत् तथा कर्मण्यन्यदेव परिदृश्यते। निर्मले च मनसि जाते बाह्यमपि निर्मल जायते। मानवस्य शुभसङ्कल्प मनश्चेन्नूनमेव तस्य चक्षूषि भद्रमेव पश्येषु , श्रवणेन्द्रियाणि च भद्रमेव शृणुयु । आन्तरिकी शिवभावना नूनमेव बहि प्रकटीभवति नात्र सशीति काचित्। एतदर्थमेव वेदेषु मनस शिवसङ्कल्पता काम्यते—

'तन्मे मनः शिवसङ्कल्पमस्तु' ।।

विशुद्धमनसैव विश्वबन्धुत्वं राष्ट्रैकत्व च स्थापयितु शक्येते। विश्वबन्धुत्वस्य मूलमस्त्यैक्य समत्वञ्च। भारतीयदर्शनानि अखिलचराचरेष्वेकस्यैव ब्रह्मणो दर्शन विदधति। गीतायामुक्तं यत् पण्डिता विद्याविनयसम्पन्ने ब्राह्मणे, गवि, हस्तिनि, शुनि, श्वपाके च समदर्शिनो भवन्ति। ते तेषु कमपि भेद नाङ्गीकुर्वन्ति—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।। (भगवद्गीता)

समदर्शित्वभावभाविता अस्माकीना. पूर्वजा अङ्गीचक्रुर्यद् यथा सूर्यचन्द्रादय परस्परमविरोधभावेन समस्तविश्व सेवन्ते, स्वदैनन्दिन कार्य सम्पादयन्तो राजन्ते च, तथैव मानवा अपि विरोधभावं परित्यज्य समष्टिभावनानुप्रेरिताश्चैक्यनिबद्धा सन्तो विश्व-कल्याणकराणि कार्याणि निष्पादयितु समर्था भवेयु·। एतादृशी पावनी भावनाऽधस्तने वैदिकमन्त्रे सम्यक् भासते—

'सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्' ।

ऋषिभि· केवल बाह्याचरणमेव समानं च काम्यतेऽपि तु तै समेषा चित्तवृत्तयो हृदयानि मनासि चापि निर्मलत्वेनाभिलष्यन्ते। बाह्याचरणसाम्यमात्रेणैव विश्वैक्य विश्वबन्धुत्वञ्च न स्थापयितुं पार्येते। तदर्थं मानवस्य बाह्यमाभ्यन्तरमुभयविधं शुचित्वमपेक्ष्यते। एतत्सर्व मनसि निधायैवाधस्तन ऋग्वेदीये मन्त्रे समुद्घोषितम्—

समानी च आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ।।

(ऋग्वेदे १०/१९१/४)

मानव. स्वभावतो धनाद्युपार्जन कुरुते स्वसुखस्य हेतो परन्तु वेदमते

सङ्गृहीतधनादे कृतार्थता तदैव भवति यदा तस्योपयोग समाजकल्याणाय क्रियते वेद आदिशति यन्मनुष्योऽन्येभ्यश्चेच्छतहस्तैर्धनादिक गृह्णेत, तदा तेन सहस्रहस्तैरादत्त-धनादिकमन्येभ्यो जनेभ्यो दीयेत —

'शतहस्तः समाहर सहस्रहस्त उत्किर' ।। (यजुर्वेदे, ३/२४/५)

मन्त्रेऽस्मिन् आदानापेक्षया प्रदानमाहात्म्याङ्गीकारेण लोकमाङ्गल्यभावना (विश्वबन्धुत्वभावना) सुतरा सिध्यत्युदारचरितानामृषीणाम्। नूनमस्मिन् मन्त्रे 'वसुधैव कुटुम्बकम्' इति भावनाया नितरा प्रस्फुटत्वम्। चेदेतादृशी शुभा कल्याणकरी च भावना सर्वेषु मन सु स्थिति धारयेत् तर्हि निश्चितमेव समाजकल्याण स्यादित्यत्र न मनागपि सन्देहलेश ।

मैत्रीभावमन्तरा विश्वबन्धुत्वभावस्य कल्पना निर्मूलैव इति तथ्य दृष्टिगत विधाय वेदेषु मैत्रीभावस्य महिमा प्रख्यापितस्तथा तस्य कल्याणकर प्रभावो वर्णित । मैत्रीफलं प्रकाशयितुमृषि कथयति यन्मित्रस्य सहवासेन यशसा च सर्वे नन्दन्ति। मित्र धन दत्त्वा समाजस्य पाप दूरीकरोति तथा समेषा हित विधत्ते। न तत् सन्मित्रं यद् धनवान् भूत्वाऽपि स्वमित्रस्य साहाय्य न विधत्ते—

सर्वे नन्दन्ति यशसागतेन समासाहेन सख्या सखायः।

(ऋ० १०/६९/१०)

न स सखा यो न ददाति सख्ये स चाभुवे स च मानाय पित्वः ।।

(ऋग्वेदे, १०/११७/४)

अधस्तनेषु मन्त्रेषु चतुर्वर्णाना ब्राह्मणक्षत्रियवैश्यशूद्राणा प्रियभाजनत्वस्य काम-नायान्तथा समेषु रुचिविषयिण्यां याञ्चायाञ्च श्रेयस्करी विश्वबान्धुत्वभावना व्यञ्जिता विद्यते सा नून श्लाघ्या—

प्रियं मा कृणु देवेषु प्रियं राजसु वा कृणु।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये।।

(अथर्ववेदे, १९/६२/१)

रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि।
रुचं विश्वेषु शूद्रेषु मयि धेहि रुचा रुचम्।।

(यजुर्वेदे, १८/४८)

एवमेवान्यत्रापि वेदेषु बहवो मन्त्रा सन्ति येषु सुव्यक्ता विश्वबन्धुत्वभावना सर्वान् प्रभावयति तां धारयितु प्रेरयति च।

●●

वैदिकवाङ्मये पर्यावरणम्

भारतीया अखिला ज्ञानधारा वेदादेव प्रस्फुटिता. । भारतीय ज्ञानं विज्ञान दर्शन कलासाहित्यादिकञ्च वेदेषु मूलत्वेन प्रतिष्ठितानि सन्ति । चराचरजगत कल्याणकराणि वचनानि तत्राङ्कितानि राजन्ते । तत्र मनुष्याणा कृते निर्धारिताना चतुर्णा पुरुषार्थाना धर्मार्थकाममोक्षाणा साधकतत्त्वानि समुल्लिखितानि सन्ति । आधुनिके युगे यथा समस्ते ससारे तथैव भारतस्य प्राचीनवाङ्मयेऽपि पर्यावरणरक्षणपरा यत्नशीलता सर्वत्र सहजतो दरीदृश्यते । साम्प्रतिके युगे तस्य संरक्षणाय शासनेन, नैकसस्थाभि , जनैश्चानेक उपाया विधीयन्ते । गोष्ठ्य समायोज्यन्ते । समेषां वैज्ञानिकाना निर्विवाद मतमिद यत् प्राणिमात्रस्य स्वस्थजीवनस्य कृते सन्तुलितपर्यावरणस्य महत्यावश्यकता विद्यते । वस्तुतो मानवसहितसर्वजीवधारिणा स्वस्थजीवनाय पर्यावरणस्य स्वच्छता स्वस्थता सन्तुलनञ्चापेक्ष्यते । तदभावे प्राणिना जीवनं दु खापन्नमेव जायते । एतद् अस्माक दुर्भाग्यमेव यन्मानवजाते समक्ष पर्यावरणप्रदूषणस्य विकटा समस्या समुपस्थिता । तस्या समाधान सम्प्रति नितरा वाञ्छितम् ।

नूनमिद दु·खावह यद् वैदिकवाङ्मयानभिज्ञाना जनानामिय धारणा विद्यते यद् वैदिकवाङ्मयेऽद्यतना इव पर्यावरणचेतना न दृष्टिगोचरता याति । अस्मिन् विषये वक्तुमिदं युक्त यद् यद्यपि वैदिककाले वाङ्मये साम्प्रतिकपर्यावरणे'ति शब्दोऽपि न चर्चित । परन्तु वैदिकवाङ्मयानुशीलनेन सम्यक्तया ज्ञातुमिदं शक्यते यद् वैदिककालीना ऋषयो न केवल मन्त्रद्रष्टारोऽपि तु ते मानवसमक्षं समापतिताना सर्वसमस्याना ज्ञातारस्तथा तत्समाधानविषये नितान्तं जागरूकाश्चासन् । पर्यावरणरक्षणाय तत्प्रदूषणदूरीकरणाय ते सततं प्रयतमाना आसन् । ते मानवेतरपशुपक्षिप्रभृतिजीवाना तथाऽचरभूताना वनाना तद्गतवृक्षवनस्पत्यादीनां, सरित्तडागपर्वतादीना च सान्निध्य गता आसन् । ते पञ्चमहाभूतानि— पृथिवी, जलं, वायुम्, अग्निम्, आकाशं तथा सूर्यं चन्द्रमसं च वैज्ञानिकरूपेण सम्यक् जानन्ति स्म । तेषा समेषा वैदिकवाङ्मये विचारो जात. । अस्मिन् सन्दर्भे वातवरुणपृथिव्यादिसम्बद्धानि सूर्यचन्द्रादिविषयकसूक्तानि च ध्येयानि सन्ति । मानवै: सह तदितरचरजगत. अचरजगतश्च यादृशं मनोरम सान्निध्यं वैदिककाल आसीत् न तथा इदानीमिति निर्विवादमेव ।

वैदिका ऋषयस्तथ्यमिदं जानन्ति स्म यत् स्वस्थं, सन्तुलितं च पर्यावरणं मानवाय वरदानस्वरूप तथा तद्विपरीतमभिशापरूपं च भवति । एतदेव कारणं यत् ते

सदा पर्यावरण वरदानरूप विधातु चेष्टापरा आसन्। तेषा मते आकाशादीना शान्त्यवस्थायामेव लोककल्याण विद्यते। यजुर्वेदीय शान्तिपाठोऽय नून ध्येयोऽस्मिन् प्रसङ्गे—

'ओऽम् द्यौ शान्तिरन्तरिक्षᳬशान्ति पृथिवीशान्तिराप शान्तिरोषधय· शान्ति। वनस्पतय शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्ति सर्वᳬशान्ति· शान्तिरेव शान्ति सामा शान्तिरेधि। ओऽम् शान्ति ,शान्ति., शान्तिः'॥ (यजु०, अ० ३६, मन्त्र-१७।)

ईदृशशान्तिपाठस्य मूल इयमेव भावना राजते यत् पर्यावरणस्याङ्गभूताना जलपृथिवीवनस्पत्यन्तरिक्षादीनां शान्त्या एव मानवकल्याणविधायिनी शान्ति प्राप्तु शक्यते। अशान्तेषु चान्तरिक्षादिषु मानव कथमपि शान्तिमवाप्तु क्षमो न स्यात्। अशान्तिदशायां सुखस्य प्राप्तिरसाध्यैव—'अशान्तस्य कुत सुखम्'।

वैदिकसभ्यता प्रायो वनाश्रिता। वैदिककाले आध्यात्मिकचिन्तनस्य शिक्षाया-स्तपश्चरणस्य वाङ्मयरचनायाश्च वनानि प्रमुखकेन्द्राण्यासन्। गुरुकुलानि, आश्रमास्तत्रैवासन् यत्र नैका ज्ञाननिधिभूता महर्षयो निवासं कुर्वन्ति स्म। वेदे समुल्लिखितो यद् य ओषधीनां पानं कुरुते स जीवति, ओषधिर्मनुष्य रक्षति, जगत् पालयति तथा त स्वस्थ विधत्ते—

यस्त्वा पिबति जीवति त्रायस्ते पुरुषं त्वम्।
भर्त्री हि शश्वतामसि जनानां च न्यञ्जनी॥

वृक्षादीनां महत्त्वमङ्गीकृत्यैव वैदिककाले तेषा रक्षणे जनचेतना दृश्यमानाऽस्ति। वैदिककालादेव पिप्पलादिवृक्षाणा पूजा प्रचलिता विद्यते। तन्मूलेऽपि इयमेव भावनाऽस्ति यद् वृक्षादिरक्षणेन पर्यावरणस्य रक्षण तथा पर्यावरणरक्षणेन मानवजीवनस्य रक्षण शुद्धिश्च—

इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्।
आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा॥ (मनु० ११/६४)
फलवतां तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम्॥ (मनु० ११/१४२)
वनस्पतीनां सर्वेषामुपभोगं यथा यथा।
तथा तथा दमः कार्यो हिंसायामिति धारणा॥ (मनु० ८/२८५)

उपर्युक्तेषु मनुस्मृतिकथनेषु हरितवृक्षादिकर्तन पापं मत्वा तत्कृते प्रायश्चितस्य दण्डस्य च विधानस्य मूले वृक्षादिरक्षणमूलाया वैदिकभावनाया एव प्रतिबिम्बनम्।

सम्प्रति वनानां रक्षणाय वनाङ्गभूतानां वृक्षादानी रोपणाय नैक उपाया समा-श्रियन्ते। नैका योजनाश्च कार्यान्विता क्रियन्ते। परन्तु—इदमत्र ध्येय यद् वनादिमहिमा

वैदिककाल एव परिज्ञात आसीत् तत्कालीना ऋषयो जानन्ति स्म यज्जलवर्षायै वनाना महदुपयोगित्वम्। जङ्गलान्याधिकवर्षाहेतुरिति ज्ञातमेव। वनानामुपरि जलवर्षण भवति। वस्तुतोऽनावृष्टिवारणाय तेषा महत्यपेक्षा। सन्दर्भेऽस्मिन् अधस्तनोऽय मन्त्रो द्रष्टव्य —

अबुध्ने राजा वरुणो वनस्योर्ध्व स्तूपं ददते पूतदक्षः।
नीचीनाः स्युरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः।।

(ऋग्वेदे, १/२४/७)

अत्र वैज्ञानिकमिद तथ्यमवश्यमेव ध्येय यत् सूर्यकिरणजातमाकाशे जलसञ्चय विधायावर्षणकालेऽपि वनोपरि जलवर्षायै प्रेरयन्ति।

एतदप्यवश्यमेव दृष्टिपथ नेय यद् वैदिककाले काञ्चिद् योजनामन्तराऽपि जङ्गलमहिमा विदित आसीत्। तत्कालीनजनजीवन वनेन साकमधिक सम्बद्धमासीत्। अरण्यकप्रभृतयो ग्रन्थास्तत्रैव विरचिता। आरण्यकेत्यभिधान तथ्यमिद प्रकाशयति। चतुर्ष्वाश्रमेष्वाश्रमत्रयस्य (ब्रह्मचर्याश्रमस्य, वानप्रस्थाश्रमस्य, सन्यासाश्रमस्य च) तदेव केन्द्रमासीत्। गुरुकुलान्याश्रमादयश्च तत्रैवासन्। तपश्चरणाध्ययनाध्यापनादीना वनमेव मुख्यं क्षेत्रमासीत्।

प्राणिमात्रस्य जीवन सञ्चालयितु तत्स्वस्थ विधातु च जलस्य महती भूमिका। 'आपो वै सर्वदेवता', 'आप एव ससर्जादौ', इत्यादिवैदिकवचनै जलमाहात्म्यमङ्गीकृतम्। आप सूक्त, नदीसूक्त, वरुणसूक्तं तथा तत्सम्बद्धान्यपराणि सूक्तानि च यथा जलस्य महिमान प्रकटयन्ति तथैव तस्य मानवोपकारित्वमपि दर्शयन्ति। अधुना समेषा समक्षं जलप्रदूषणस्य प्राणिघातिनी समस्या समुपस्थिता। ऋग्वेदस्य दशममण्डले कामनेय कृता शोभते यज्जलं मातेव अस्मान् पालयेत्—

यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः।

"निकामे निकामे नः पर्जन्यो वर्षतु", "फलवत्यो न ओषधय. पच्यन्ताम्"।

एतासु प्रार्थनासु जनकल्याणकामना व्यक्ता सर्वान् समाह्लादयति।

ऋषिभिरवबुद्धमिद तथ्य यत्पर्यावरणस्य स्वस्थता शुद्धता च स्वास्थ्यायोपकारिण्ये स्त एव ताभ्यामध्ययनविचारशीलतादिकमपि प्रभावित जायते। अत एव तै पर्वतानां नदीनां सङ्गमस्य च सान्निध्यमधिगन्तुमुपदिष्टम्—

उपहरे गिरीणां सङ्गमे च नदीनाम्।
धिया विप्रो अजायत।। (यजु० २६/१५)

वरुण जलदेवत्वेन परिकल्प्य तद्विषयिणी वन्दना नून महनीया—जलेन विशेषरूपेण सम्बन्धाद् वरुणो जलस्य देवता तथा तस्य स्वामी मन्यते। ऋग्वेदस्थपञ्चममण्डलस्य ६३ तम सूक्त तस्य जलवर्षणशक्ति वर्णयति। वरुण समुद्रजले विचरति—अद्भिर्यावि वरुण समुद्रै । (१/१६१/१६)

नद्यादिभि सः घनिष्ठसम्बन्धात् नद्यो वरुणवस्त्ररूपेण कथ्यन्ते—**'वना वसानो वरुणो न सिन्धून्'** । (९/९०/२)

जलदेवतारूपेण वरुण सर्व चराचरजगत् पोषयति रक्षति च, अत एव ऋषि. प्राप्तवस्तु रक्षणाय तथाऽप्राप्तवस्तुप्राप्तये कल्याणकामनां विधत्ते—

'शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वात्तिभिः सदा नः' ।।

(वरुणसूक्त, मन्त्र-८)

अद्य वन्यजन्तूना (पशुपक्षिप्रभृतीना) रक्षणाय शासनेन बहुयोजना प्रचालिताः नैकराजकीयविभागाश्च सस्थापिता येषु वनविभाग समुल्लेख्य· । न केवले भारते, समस्ते खलु लोके, पर्यावरणदिवसोऽपि महता समारम्भेणायोज्यते। वैदिककाले पर्यावरणसम्बन्धिनी कापि सस्था नासीत्। वन्यजीवने यथा मानवास्तथैव पशुपक्षिप्रभृतयोऽपि नितरासुरक्षिता , स्वस्था , प्रसन्नाश्चासन्। तत्कालीनवन्यजीवनाकलनेन याथार्थ्यमिद सहजत प्रकाशमायाति। यत् तत्रस्थैर्मानवै साक मानवेतरप्राणिना प्रीतिकरो घनिष्ठ सम्बन्ध आसीत्। तत्र सर्वे प्राणिन परस्पर भावयन्त· सन्त जीवन यापयन्ति स्म। मनुष्या मानवेतरप्राणिनां सौख्ये निजसौख्यं, तदु खे निजदु ख मन्यन्ते स्म। एतादृश्येव सुखदु खानुभूतिर्मानवान् प्रत्यपि तदितरप्राणिहृदयेष्वप्यासीत्।

प्राणिजातस्य कृते जलस्य इव वायोरपि नितरामुपयोगित्वम्। वेदेषु 'अस्य भुवनस्य राजा 'अपा सखा' 'प्रथगजा' . 'आत्मादेवाना भुवनस्य' इत्यादिवचनै वायुमहिमा गीत । यद्यपि वैदिककाले वायुप्रदूषणस्याद्यतना इव समस्या नासीत् परन्तु ऋषयो जानन्ति स्म यत् शुद्धवायुना जीवनरक्षणं भवति। दूषितवायुजनिता रोगा तत्कारकाः कृमयश्च तदा नाविदिता आसन्। जीवनापहारक कृमि विनाशयितु सोक्तिर्ध्यातव्या यया ऋषि कामयते यद् यथा शिलाखण्ड चणकान्न पिनष्टि तथैवाह कृमीन् चूर्णयिष्यामि—

ये कृमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्वन्तः।
ये अस्माकं तन्वमाविविशुः सर्वं तद्धन्मि जनिमं कृमीणाम्।।
इन्द्रस्य या मही दृषत्क्रिमो विश्वस्य तर्हणी।
तथा पिनष्मि संकृमीन् दृषदा खल्वाँ इव।।

हानिप्रदकृमिविनाशने वेदेषु दृश्यमाना दत्तचित्तता निश्चितरूपेण महनीया।

वेदेषु यज्ञविधानस्य महती प्रतिष्ठा। भारतीय धर्मानुष्ठान प्रायेण यज्ञमय विद्यते। 'यज्ञो वै विष्णु' 'यज्ञो वै श्रेष्ठतम कर्म' 'यज्ञोऽपि सर्वाणि भूतानि भुनक्ति' 'सर्व यज्ञे प्रतिष्ठितम्' इत्यादिवचनेषु यज्ञस्य महिमा प्रतिपादित। यज्ञस्य धार्मिकाध्यात्मिकलाभै सह तस्य कतिपयभौतिकलाभा अपि वर्तन्ते, येषा पर्यावरणशुद्ध्या सह प्रगाढ सम्बन्ध। चरैर्मनुष्यपशुपक्षिप्रभृतिभि सार्द्ध कृषिवनवृक्षलतादीना रक्षणाय जल जीवनाधायक तत्त्व विद्यते। तज्जलोत्पादिका वर्षा अनेकार्थसाधिका।

यज्ञस्यैकं मुख्य प्रयोजन जलवर्षणमपि विद्यते। शतपथब्राह्मणे लिखित वर्तते यद् यज्ञाग्नेर्धूभ, धूमाद् अभ्र तस्माद् वृष्टिश्च भवति—

सन्दर्भेऽस्मिन् मनुस्मृतिकारस्य वचनमपि चिन्त्यम्। तदनुसारमग्नौ प्रक्षिप्ता आहुतय. सूर्यकिरणान् प्राप्नुवन्ति तथा सूर्यकिरणैर्वृष्टिर्भवति, वृष्टेरन्नमन्नात्तु प्रजा जायन्ते—

अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः।। (मनु० ३/७६)
'अग्नेर्वै धूम्रो जायते धूम्रादभ्रं अभ्राद् वृष्टिः'।

वायुप्रदूषणं दूरीकर्तुमपि यज्ञस्योपयोगित्वम्। दुर्गन्धेन रोगाणुभिश्च दूषित वायुं प्रमार्जयितु यज्ञस्य विधानं महदुपकारकम्। वायुप्रदूषणेन वृक्षलतावनस्पत्यादिषु नैका रोगा जायन्ते। चरेषु, विशेषतो मनुष्येषु, श्वासरोग-गलदोष-अक्षिदोष-रक्तदोष-शिर पीडाप्रभृतयो रोगा. समुत्पद्यन्ते। एतादृशानि वायुप्रदूषणानि दूरीकर्तुमपि यज्ञा महती भूमिकां निर्वहन्ति। महर्षिदयानन्दो वदति—'यज्ञाग्नौ प्रक्षिप्ता पदार्था सूक्ष्मरूपेण चतुर्दिक्षु प्रसृत्य वायुनां साकं दुर्गन्ध निवर्तयन्ति मनुष्यो यत्परिमाण घृतं सुगन्धमयं पदार्थञ्च भुङ्क्ते तेषां (घृतपदार्थानां) यज्ञाग्नौ प्रक्षेपेण लक्षशो मनुष्याणामुपकारो जायते''। (सत्यार्थप्रकाश·, तृतीय· समुल्लास·)

पञ्चमहाभूतानां मध्ये पृथिव्या अपि मुख्य स्थानम्। ससारस्य आधारशिला सैवास्ति। सस्यवृक्षलतावनस्पत्यादीनामुत्पादिका पृथिवी एव। अखिल पृथिवीसूक्तं पृथिव्या महत्त्वं वर्णयद् भासते—

'सा नो भूमिर्विसृजतां माता पुत्राय मे पयः'।
'माता भूमिः पुत्रोऽहं पृथिव्याः'।।

वैदिककाले नाम्नाऽपरिचितस्यापि पर्यावरणस्य व्यापक रूपमृषिभिर्बुद्धमासीत्। यद्यपि तदानीन्तने काले साम्प्रतिककाल इव प्रदूषणसमस्या नापतिता जनानां समक्षम्।

परन्तु समस्या सा तैर्दूरदर्शिभि शास्त्रज्ञैरज्ञाता नाऽऽसीत्। तदानीन्तना लोका· प्राकृतिकपर्यावरणातिरिक्तसामाजिकसास्कृतिकमानसिकपर्यावरण प्रत्यपि दत्तावधाना आसन्। यथा सर्वे जानन्ति समष्टि सर्वथा शान्ता स्वस्था सन्तुलिता च विधातु व्यष्टे शान्ति, स्वस्थता सामञ्जस्यञ्च अपेक्ष्यन्ते। तदर्थमपि मानसी शुद्धिरपेक्ष्यते। यावन्मन सु शिवत्वभावनोदात्तविचारश्च न स्थाप्येते, तावत् मानसशान्तेः सद्भावोदात्तविचारयोश्च स्थितिर्न स्यात्। 'मन एव मनुष्याणां कारण बन्धमोक्षयो.' इत्युक्तिमाश्रित्यैव शिवसङ्कल्पप्रभृतिसूक्तानि विरचितानि। तस्य सूक्तस्याधस्तना मन्त्रा अवश्यमेव चिन्त्या —

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।।२।।
सुसारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु।।३।।

इत्थं द्रष्टु शक्यते यद् वैदिका ऋषय· पर्यावरणस्य रक्षण सवर्धन निर्दोषत्व च प्रति सहजत सावधाना आसन्। तेषा सावधानताया स्वरूप वैदिकवाङ्मये यत्र तत्र नयनगोचरता याति। पर्यावरणस्य निर्माणे येषा पदार्थाना प्राणिना वा योगदानमस्ति ते सर्वे तेषा दृष्टिं गता आसन्। अस्मिन् सन्दर्भे तैत्तिरीयोपनिषदि उत्पत्तिप्रक्रिया वर्णिता नून विचारणीया—

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधिभ्योऽन्नम्। अन्नाद्रेतः। रेतसः पुरुषः। स वा एष पुरुषोऽन्न रसमयः' इति।

●●

भारतीया संस्कृतिर्वाल्मीकीयरामायणे

महर्षिवाल्मीकि: सस्कृतसाहित्यस्यादिकविरस्ति तथा तस्य रामायणमादिकाव्यम्। वाल्मीकिरामायण चरमा काव्यसौन्दर्यभूमि गत चिरकालादेव सहृदयजनचेतासि नितरा समाह्लादयद् विराजते। तस्य माहात्म्य न केवलं काव्यदृष्ट्या, अपि तु धर्मदृष्ट्या, संस्कृतिदृष्ट्या, समाजदृष्ट्या, विचाराचारदृष्ट्यापि विद्यते। तद्गतो रसपरिपाक, अलङ्कारसौन्दर्य, प्रकृतिच्छटा, प्रसादमयी भाषा, कमनीयशैली चैकत पाठकान् चमत्कुर्वते पुनरपरतस्तस्मिन् चित्रितान्यादर्शचरित्राणि, समुज्ज्वलोदारा भारतीया सस्कृति समुन्नतसमाजादयश्चापि पाठकान् सर्वान् सर्वाशत प्रभावयन्ति। वाल्मीकीयरामायणस्य माहात्म्यमनेनैवाकालयितु शक्यते यत्तत् परवर्तिसस्कृतसाहित्यस्योपजीव्यत्वेन विद्यते। तदाश्रित्य विरचितानां संस्कृतकाव्यमहाकाव्यनाटकादीना संख्याऽतिभूयसी। इद वाल्मीकीयरामायणमेव, येन न केवल भारत एव रामकथा प्रचालिताऽपि तु ससारस्य विशेषत एशियामहाद्वीपस्यानेकेषु देशेषु सा प्रतिष्ठापिता। इत्थं वाल्मीकीयरामायणस्य गौरवगाथा रामकथामाध्यमेन सर्वत्र गीयमाना राजते।

काव्यसौन्दर्येण सह चेत् कश्चित् कामयते प्राचीन्भारतीयसमाज, धर्म, सस्कृति च विज्ञातु तर्हि तेनावश्यमेवाध्येय रामायणम्। समुज्ज्वला भारतीया सस्कृतिस्तु सर्वाशत चित्रिता तत्र। भेदेष्वभेद, उदारता, सहिष्णुता, समताभाव, चतुर्विधपुरुषार्था, वर्णाश्रमा, धर्मप्रवणता, नैतिकता, आदर्शचरित्र च भारतीयसंस्कृतेर्वैशिष्ट्यानि। भारतीयसस्कृतिगतानि तानि वैशिष्ट्यानि सर्वाणि वाल्मीकीयरामायणे प्रतिबिम्बितानि तामाश्रयितुं नितरा प्रेरयन्ति जनान्।

भारतीयसंस्कृतौ चरित्रस्याचारस्य वापूर्वो महिमा स्वीक्रियते। 'आचार परमो धर्म·' इति मन्यमाना भारतीयसस्कृतिरङ्गीकरोति यदाचारहीन जन वेदा अपि पावायितु न समर्था: 'आचारहीन न पुनन्ति वेदा'। वाल्मीकीयरामायणे पात्राणा चारुचित्रणं जातम्। तन्नायकस्य रामस्य चारित्र्य कं न प्रीणयति? रामस्य चरित्रे तद्गत सत्यशीलस्नेहादिरूप सर्व वैशिष्ट्यं राजते। सोऽयोध्याकाण्डे जाबालिम्प्रति सत्यपरिपालनविषयक स्वीयदृढव्रत विज्ञापयितुं कथयति, यत् स सत्यप्रतिज्ञ सन् लोभवशान्मोहवशादज्ञानवशाद्वा विवेकशून्य सन् स्वपितु. सत्यमर्यादां न कथमपि खण्डयिष्यति—

नैव लोभान्न मोहाद् वा न चाज्ञानात् तमोन्वितः।
सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः।।

(वा० रा० अयो०)

सत्य रामस्य कृते सर्वथेष्टम्। सत्यभावभावित सत्यवादी स· सीता प्रति कथयति—'सत्यमिष्ट हि मे सदा'। ता स प्रबोधयति स्वविचार यत् सत्यप्रतिज्ञापरिरक्षणे स स्वजीवन, जानकी, लक्ष्मण सर्व त्यक्तु शक्नुयात्, परन्तु स प्रतिज्ञा परिहातु न शक्नुयात्—

अप्यहं जीवित जह्यां त्वां वा सीते सलक्ष्मणाम्।
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः।।

(वाल्मीकिरामायणे)

न केवल राम एव, अपि तु रामायणगतेषु रामपक्षपात्रेषु सर्वेषु भव्यचारित्र्यस्य स्थितिर्दृष्टिगोचरता गत्वा स्वमहिमान तनुते।

भारतीयसस्कृतौ चतुर्विधपुरुषार्थाना धर्मार्थकाममोक्षाणा महनीय स्थानम्। तेष्वपि धर्मस्य स्थान सर्वोपरि विद्यते। इदमेव कारण यद् धर्माचरणाय तद्रक्षणाय च यतन्ते सर्वे महापुरुषा उपदिशन्ति चापरान् जनान् तत्कर्त्तुम्। वाल्मीकीयरामायणे राम स्वयमेव विग्रहवान् धर्म उच्यते—'रामो विग्रहवान् धर्म'। धर्मदृष्ट्या वाल्मीकीयरामायणेऽनेके यज्ञा विधीयमाना दृष्टिपथं समायान्ति। राजा दशरथ· पुत्रप्राप्त्यर्थमश्वमेध यज्ञं कुरुते। यदा स सुतप्राप्तिहेतोरश्वमेधयज्ञविधानाय स्वमति प्रकटीकुरुते—

मम लालप्यमानस्य सुतार्थं नास्ति वै सुखम्।
तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम।।

(बालकाण्डे, ८।८)

तदा सर्वे महर्षय सरय्वा उत्तरे तीरे यज्ञभूमिविधानाय सहर्षमुनमति ददति—

सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्।। (बालकाण्ड ८।१२)

राजा दशरथो धर्मेण प्रजा पालयति तथाऽधर्म निवारयति स्वीये राज्ये—

अवेक्ष्यमाणश्चारेण प्रजा धर्मेण रक्षयन्।
प्रजानां पालनं कुर्वन्नधर्मं परिवर्जयन्।।

(बालकाण्डे, ७।२१)

धर्मशास्त्रादिग्रन्थेषु षोडशसस्कारा प्रतिपादिता सन्ति, ये भारतीयसस्कृते प्राणभूता इव मन्यते। तैरेव भारतीया सस्कृति सकले लोके स्वमहिमान ख्यापयति।

रामायणे धर्मविधानानुसार सस्काराणा व्यवस्था परिदृश्यते। बालकाण्डे राज्ञो दशरथस्येच्छानुसार तस्य चतुर्णा पुत्राणा नामकरणसंस्कार गुरुवसिष्ठो विधत्ते—

अतीत्यैकादशाहं तु नामकर्म तथाकरोत् ।
ज्येष्ठ राम महात्मानं भरतं कैकेयीसुतम् ।।
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा ।
वसिष्ठः परमप्रीतो नामानि कुरुते तदा ।।

(वा०रा०, १८।२१-२२)

रामायणकाले विवाहसस्कार कन्यादानपूर्वक सम्पाद्यते स्म । राजा रोमपाद स्वकन्या शान्तामृष्यशृङ्गाय विधिपूर्वक ददाति—

अन्तःपुरं प्रवेश्यास्मै कन्यां दत्त्वा यथाविधि ।
शान्तां शान्तेन मनसा राजा हर्षमवाप सः ।।

(बाल०, १०/३२)

रामायणेऽनेकत्र दाहसंस्कारस्य व्यवस्था क्रियमाणा नयनगोचरता याति । अरण्यकाण्डे राम. सलक्ष्मणो दिवङ्गतस्य जटायोश्चिता विधाय दाहसस्कार विधत्ते—

एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम् ।
ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः ।।

(अरण्य०, ६८।३१)

एवमेव युद्धकाण्डे मृतस्य रावणस्यान्त्येष्टिसंस्काराय राम दिशति । ततो विभीषणो शास्त्रविधिपूर्वक रावणस्य दाहसस्कार सम्पादयति—

स ददौ पावकं तस्य विधियुक्तं विभीषणः ।

तत्र तु शवयात्रायाश्चितायाश्च विस्तृत वर्णन विद्यते । (युद्ध ११२/१२०) शवदाहानन्तर बहुत्र जलाञ्जलिप्रदानमपि क्रियमाण समालोक्यते । गृध्रराजस्य शवदाहानन्तर रामलक्ष्मणौ जल दत्त —

उदकं चक्रतुस्तस्मै गृध्रराजाय तावुभौ । (वा० रा०)

भारतीयसंस्कृतावतिथिर्देव इव पूज्यो भवति—'अतिथिदेवो भव' । अतोऽतिथिसत्कारस्य महती प्रतिष्ठा भारतीयजनजीवने । रामायणेऽनेकत्रातिथिसत्कारस्य सन्दर्भा नयनगोचरता यान्ति । राज्ञा जनकेन जनकपुर्यां दशरथ· सात्क्रियते—

उवास परमप्रीतो जनकेनाभिपूजितः ।

चित्रकूटं प्रति प्रस्थितस्य भरतस्यागमनं श्रुत्वा निषादराज उपायनसामग्री प्रगृह्य भरत मिलितुं याति—

इत्युक्त्वोपायनं गृह्य मत्स्यमांसमधूनि च ।
अभिचक्राम भरतं निषादाधिपतिर्गुहः ।। (अयो० ८४।१०)

अवसरे तस्मिन् निषादस्यातिथिसत्कारमूलक वचन नितान्तमाह्लादजनकम्—

निष्कुटश्चैव देशोऽयं वञ्चिताश्चापि ते वयम् ।
निवेदयाम ते सर्वं स्वके दाशगृहे वस ।।
(अयो० ८४/१६)

अत्रिनामको महर्षि स्वाश्रममागतानामतिथिभूताना सीतारामलक्ष्मणादीना सत्कृति विदधाति—

स्वयमातिथ्यमादिश्य सर्वमस्य सुसत्कृतम् ।
सौमित्रिं च महाभागं सीतां च समसान्त्वयत् ।।
(अयो० ११७/६)

एवमेव महर्षिभरद्वाजद्वारा स्वाश्रमे रामादीनामुत्तरकाण्डे रामद्वाराऽनेकर्षिसमेतस्य च्यवनर्षेस्तथाऽगस्त्यमुनिना रामस्यातिथिसपर्यामूलका अनेकप्रसङ्गा रामायणे उपलभ्यन्ते ।

रामायणे वर्णाश्रमधर्मो नितरां प्रतिष्ठितो दृश्यते । चत्वारो वर्णा धर्मशास्त्रानुसारं स्वस्वकर्मनिरता विराजन्ते । विजितेन्द्रिया ब्राह्मणा. सयता· सन्तो दानाध्ययनादिकर्मसुदत्तचित्ताः सन्ति—

स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताः प्रतिग्रहे ।।

रामायणे पातिव्रतधर्म पराकाष्ठां गतो स्वमहिमानं प्रख्यापयति । जनकनन्दिनी सीता पतिव्रतपरिपालननिरतानां नारीणां शिरोमणिरूपेण भ्राजते । लङ्कायां स्वसमीपमुपस्थितस्य हनुमत· स्वपृष्ठोपरि स्थापयित्वा रामसमीपे तन्नयनप्रस्तावं सा दृढतापूर्वकं तिरस्करोति—

चरणेनापि सत्येन न स्पृशेयं निशाचरम् ।
रावणं किं पुनरहं कामयेयं विगर्हितम् ।।
भर्तुर्भक्तिं पुरस्कृत्य रागादन्यस्य वानर ।
नाहं स्प्रष्टुं स्वतो गात्रमिच्छेयं वानरोत्तम ।।

शकुनशापवरदानादीना कृतेऽपि भारतीयसंस्कृतौ स्थानं विद्यते । एतन्मूलका अनेके सन्दर्भाः परिलक्ष्यन्ते तत्र । हनुमद्गमनात्प्राक् लङ्कास्थिताशोकवाटिकायामव-

स्थितसीतासमक्षमनेकशकुनसन्दर्भा उपस्थिता , यै सा शोकश्रान्तिरहिता सती नितरामाह्लादिता भवति—

सा वीतशोका व्यपनीततन्द्रा शान्तज्वरा हर्षविशुद्धसत्त्वा ।
अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रिरिवोदितेन ।।

उत्तरकाण्डे राज्ञो मरुतस्य यज्ञविधानावसरे महेन्द्रादिभिर्देवै पक्षिभ्यो वरप्रदान विधीयते—

एवं दत्त्वा वरांस्तेभ्यस्तस्मिन् यज्ञोत्सवे सुराः ।

रावणेन हन्यमानोऽयोध्यानरेशानरण्यको रावणमित्थ शपति—

उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम् ।
रामो दाशरथिर्नाम स ते प्राणान् हरिष्यति ।।

भारतीयसस्कृतेर्वैशिष्ट्यमेकमनुपभमस्ति यत्तस्यामौदार्यभावस्य महती पराभूमि परिलक्ष्यते । तस्याम् 'अयं निज. परो वेति गणना न क्रियतेतराम् । तदनुसारम् 'उदार-चरिताना कृते तु सम्पूर्णा वसुधैव कुटुम्बकमिव मन्यते—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।

रामायणे औदार्यस्यापि नैका प्रसङ्गा अङ्किता राजन्ते । औदार्यभावस्य तदा पराकाष्ठा यदा युद्धभूमौ हत रावण समभिलक्ष्य राम कथयति यद् रावणे मृते शत्रुताऽपि मृता । स तस्यान्त्येष्टिसस्काराय विभीषण समादिशति तथा तम्प्रति स्वसद्भाव प्रकाशयति—

मरणान्तानि वैराणि निवृत्तं नः प्रयोजनम् ।
क्रियतामस्य संस्कारो ममाप्येष यथा तव ।।

एवमेवानेके प्रसङ्गा वाल्मीकिरामायणे पुनर्जन्मादिसम्बद्धा. समुपलभ्यन्ते, येषु भारतीया सस्कृति स्वसमुज्ज्वलरूपेण प्रतिबिम्बिता सती सर्वान् चमत्करोति । नास्त्यत्युक्तिरस्मिन् कथने यद् भारतीयसस्कृतेर्यथार्थ स्वरूप द्रष्टु वाल्मीकीयरामायण-मवश्यमेव समालोचनीयम् ।

●●

वाल्मीकिरामायणे रामवनगमनम्

महाकविवाल्मीकिविरचित रामकथाश्रित रामायण न केवल सस्कृतसाहित्ये प्रत्युत विश्वसाहित्ये महनीयं स्थानं भजते। सप्तकाण्डात्मके तस्मिन् रामकथागता नानाविषया वर्ण्यतां याता.। अखिले रामायणे वाल्मीकिना सरलसरसपदावलीयुता प्रसादमयी भाषा चोदात्ता शैली प्रयुक्ता। वाल्मीकिरस्ति प्रतिभावान् कवि । तस्य भावप्रवणता, सूक्ष्मेक्षिका, रसप्रियता, प्रकृतिप्रेम कविसामर्थ्यञ्चेति सर्व रामायणे पदे-पदे प्रकाश्यतां याति। दर्शनवर्णनक्षमा तदीयाऽलौकिकसृष्टिभूतकाव्यसर्जनपरा शक्तिर्नूनं सर्वातिशायिनी। स चराचरयोर्बाह्याभ्यन्तरगतं स्वरूप विज्ञातुं वर्णयितुञ्च सामर्थ्यमेति।

तदीयाऽनुभूतिर्नितान्त गम्भीरा। तस्या क्षेत्रमतिविशालं विद्यते। एषैव दशा तस्य लोकोत्तरवर्णनानैपुण्यस्यापि। प्रथमत स कस्यचिदपि वस्तुनोऽलौकिकप्रतिभया दर्शनं कुरुते तदनन्तरं कल्पनाप्रधानया वर्णनशक्त्या वर्णयति। यद्यपि रामायणस्य महत्त्ववैविध्य लोकविश्रुत, परन्तु तदीयं काव्यसौन्दर्यमत वैशिष्ट्यमपि लोकोत्तरमित्यत्र न सन्देहलेश.। सम्पूर्णे महाकाव्ये यथा विभिन्नपात्रचित्रणं चरजगतो भावचित्रण, रसचित्रण, प्रकृतिचित्रणं, वस्तुचित्रणमलङ्कारयोजनञ्च नितरा भव्यरूपेण दृष्टिविषयता यान्ति, तन्निसंशयं श्लाध्यम्।

वाल्मीकिरामायणवर्ण्यविषयाणा क्षेत्रमतिविशालमस्ति। तत्र केचित् प्रसङ्गा नितान्तभावप्रवणाश्च सन्ति। ते सन्ति—

(१) कैकेयीवरयाचनम्।

(२) रामवनगमनम्।

(३) भरतस्य चित्रकूटप्रस्थानं तथा तत्र रामेण सह मेलनम्।

(४) सीताहरणम्।

(५) जटायुमरणम्।

(६) युद्धे लक्षणस्याचेतनत्वम्।

(७) वनवासकालान्ते भावविह्वलभरतस्य रामप्रतीक्षा।

अत्र रामवनगमनप्रसङ्गविमर्शोऽपेक्षितः। अतस्तद्विवेचनं प्रस्तूयते।

अयोध्याकाण्डे वृद्धावस्थापन्नो राजा दशरथो राजसभायां सर्वसमक्षं राजधर्मादात्मानं निवर्तितुं श्रीरामं यौवराज्ये नियोक्तुञ्च प्रस्तौति। प्रस्तावं तमङ्गीकर्तुमथवान्योपायं विज्ञापयितुं सर्वान् निवेदयति च—

सोऽहं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते ।
संनिकृष्टानिमान् सर्वाननुमान्यद्विजर्षभान् ।।

(वा० रा० अयो० का० सर्ग २ श्लोक-१०)

दशरथप्रस्ताव सहर्ष सर्वैरनुमोदितो जात । राज्याभिषेकसमाचार श्रुत्वा सर्वे खलु मोदान्विता जाता । समाचारेणानेन सम्पूर्णाऽयोध्यानगरीआनन्दसागरे निमज्जितेवागच्छत् । तदनन्तर रामाय राज्ञा दशरथेन राजनीतिविषयका बहूपदेशा प्रदत्ता । श्रीरामेण मातृभवन गत्वा शुभसमाचारस्य विषये माता कौसल्या तदनन्तर लक्ष्मणश्च विज्ञापित । राज्याभिषेकाय समस्ता व्यवस्था विहिता । सीतासहित श्रीरामो धर्मनियमतोऽभिषेकाय सज्जितो भवति । अयोध्यानगर्या हर्षोल्लसिताना जनाना महान् सम्मर्दोऽभवत् । तस्मिन्नेवावसरे शुभसमाचारमिम श्रुत्वा मन्थरा कैकेयीमन्यथा बोधयतु चेष्टते, परन्तु कैकेयी तदनुरोधमुपेक्षते । परन्तु तया पौन पुन्येनानुरुध्यमाना कैकेयी भृश खेदमवाप्ता सती कोपभवन प्रविशति—

शुक्लमाल्यानि लाजांश्च पृथक्चम धुसर्पिषी ।
अहतानि च वासासि रथं सर्वायुधान्यपि ।।

(तदेव, ३/९)

कोपभवनमनुप्रविष्टा कैकेयी तत्र गत्वा दशरथो मिलति । स्ववञ्चनया राजान दशरथ स्ववशे कृत्वा तया राज्ञा तस्यै पूर्वप्रदत्तयोर्वरयोरेकेन भरताभिषेक पुनरपरेण चीराजिनधरस्य श्रीरामस्य चतुर्दशवर्षात्मको वनवासश्च याच्येते—

अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम् ।
यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ।।
नवपञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनधरो धीरो रामो भवतु तापसः ।।

(तदेव, अयो० ११/२४ - २७)

कैकेयीयाचितौ वरौ दशरथवदेनाकारणत्वेन जातौ । असीमपीडाकुल स विविधप्रकारै कैकेयी सम्बोधयति वरयाचना विहातुञ्चताम्प्रेरयति । शोकाकुलस्य दशरथस्येमानि वचासि नितान्त कारुण्यभरितानि सन्ति—

कौसल्यां च सुमित्रां च त्यजेयमपि वा श्रियम् ।
जीवितं चात्मनो रामं न त्वेव पितृवत्सलम् ।।

(तदेव, अयो० १२/११-१२)

परन्तु दीनवचनै· कथमपि दुष्टा कैकेयी न प्रभाविता जायते। कठोरहृदया सा वदति दशरथ यत् 'श्रीरामनिर्वासनमन्तरा नाहमन्येन केनचिदप्यन्येन वरेण सन्तुष्यामि'—

भरतेनात्मना चाहं शपे ते मनुजाधिप।
यथा नान्येन तुष्येयमृते रामविवासनात्।।

(वा०रा०, अयो० १२/४९)

कोपभवनगत दारुणमिद वृत्त न केनाप्यवगतन्तावत्। गुरुवसिष्ठेन, श्रीरामेण, कौसल्यासमेतमातृभिरयोध्याप्रजाभिश्चापि भृश शोकावहमिद वृत्त न विज्ञातम्। राज्याभिषेकद्रष्टुकामानि समेषां चक्षूषि वल्कलधर श्रीराम द्रक्ष्यन्तीत्यस्य कल्पनाऽपि न कृताऽऽसीत्। सुमन्त्रेण गुरुवसिष्ठागमन सूचयित्वाऽभिषेकगतानि कार्याणि सम्पादयतुमनुरुद्धो राजा न किमपि ब्रवीति। केवल तन्मुखादेतान्येव वचासि नि सृतानि—

वाक्यैस्तु खलु मर्माणि मम भूयो निकृन्तसि।।

(तदेव, अयो० १४/५९ उ०)

श्रीरामराज्याभिषेकसमाचारेण अयोध्याया. राजपरिवारसदस्यास्तथा समस्ताः प्रजाश्चाप्रतिमानन्दभरिता जायन्ते। नृत्यवादनगायनतत्परास्ते राज्याभिषेक द्रष्टुं समुत्सुकाः सन्ति। (तदेव, १६ सर्ग)

सुमन्त्रेणाहूतेन श्रीरामेण राजभवन गत्वा सुन्दरासनस्थौ कैकेयीदशरथौ विलोकितौ। श्रीरामद्वारा कृते चरणस्पर्शे शोकाकुलेन दशरथेन न किञ्चिदुक्तम्। तन्मुखात्केवल 'रामेति' शब्दो नि सृत·—

रामेत्युक्त्वा तु वचनं वाष्पपर्याकुलेक्षणः।
शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम्।।

(तदेव, अयो० १८/३)

स्वपितुरीदृशी दीना दशा विलोक्य श्रीरामस्य हृदय विदीर्ण जायते। पितृक्लेशकारण ज्ञातु स शोकाभिभूतो जायते। तदा कैकेयीम्प्रति तेनोक्तानि वचासि नूनं तस्य मातृपितृभक्तिं द्योतयन्ति—

अतोषयन् महाराजमकुर्वन् वा पितुर्वचः।
मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे।।

(तदेव, अ० १८/१५)

क्रूरहृदया कैकेयी निश्छलं श्रीरामं वदति यत्स (श्रीराम·) तत्सर्वं कर्त्तुमुद्यतो भवेत्, यत् सा वदति, तदा सा नून राजशोककरण ज्ञापयिष्यति—

यदि तद् वक्ष्यते राजा शुभं वा यदि वाशुभम् ।
करिष्यसि ततः सर्वमाख्यास्यामि पुनस्त्वहम् ।।

(वा०रा०, अ० १८/२५)

तदा श्रीरामेण यथोत्तर प्रदत्त तत्तु नून तन्मातृपितृभक्तिप्रख्यापकमस्ति—

अहो ! धिङ् नार्हसे देवि वक्तुं मामीदृशं वचः ।
अहं हि वचनाद् राज्ञः पतेयमपि पावके ।।
भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे ।
नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ।।
तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् ।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ।।

(तदेव, अयो० १८/२७, पू० २८, २९, ३०)

श्रीरामस्य पितृभक्ति सत्यनिष्ठाञ्च विज्ञाय निष्ठुरहृदया कैकेयी दशरथप्रदत्तवर-द्वयस्य वृत्तान्त श्रावयन्ती कथयति यद् वरद्वयमेव पितृशोकस्य मूल कारणम् । तदवसरे तदुक्तानि वचासि महत्क्रौर्य दारुणञ्च भजन्ते । (तदेव, अयो० १८/३५ - ३८)।

अत्रेदं नून बोध्य यद् एतत्पूर्व कोपभवने कारुण्यमयवचोभिर्दशरथस्य कैकेयीन दयार्द्रता याता । दशरथस्य दैन्यवचांस्यपि तत्काठिन्यास्पदं हृदय प्रसादयितु न शक्तानि जातानि । (तदेव, अयो० १२/१३-१४)।

श्रीरामगतवनवासस्य समाचार ज्ञात्वा दशरथस्यान्त पुरे शोकसरित प्रवाहिता । श्रीरामो यदा वनवाससमाचार विज्ञापयितुंय स्वमातृभवनङ्गतस्तदा पुत्रवत्सलया मात्रा कौसल्ययाऽपि न किञ्चिद् ज्ञातमासीत् । तदा सा पुत्रमङ्गलकामनया दत्तचित्ता सती भगवद्विष्णुपूजां कुर्वाणाऽऽसीत् । (तदेव, २०/१४-१६)।

अतीवविनम्रभावेन पुत्रश्रीरामेण प्रणतया तया स्वतनय आशीर्वादपूर्वक वात्सल्यभावेन सम्मानित । (तदेव, अयो० २०/२०)।

पुत्रवत्सलया जनन्या पितृदर्शनायादिष्टः श्रीरामो नितरां भावविह्वलोऽभूत्—

सत्यप्रतिज्ञं पितरं राजानं पश्य राघव ।
अद्यैव त्वां स धर्मात्मा यौवराज्येऽभिषेक्ष्यति ।।

(तदेव, अयो० २०/२४)

स्वमातृवात्सल्यातिशयमवलोक्य श्रीरामस्यापि कोमलमानसं भावपूर्णमभूत् । परन्तु नासीदन्यो मार्गस्तत्समक्षं सत्यकथनमन्तरा । श्रीरामेण तन्मातोक्ता यत् 'मातः ! न

त्वया विज्ञायते यत्तवोपरि वज्रपातोऽभूत्। सम्प्रति मया यद्वक्तव्यमस्ति तेन त्वया सह सीतालक्ष्मणावपि दु खितौ भविष्यत'। (वा०रा०, अयो० २०/२७)

तेन (श्रीरामेण) जनन्युत्तरमनपेक्ष्यैव स्ववनवासभरताभिषेकयोर्वृत्तान्त श्रावितम्—

भरताय महाराजो यौवराज्यं प्रयच्छति।
मां पुनर्दण्डकारण्यं विवासयति तापसम्।।
स षट् चाष्टो च वर्षाणि वत्स्यामि विजने वने।
आसेवमानो वन्यानि फलमूलैश्च वर्तयन्।।

(वा०रा०, अ० २०/३०-३१)

स्वपुत्राभिषेकद्रष्टुकामा कौसल्या दारुणवृत्तान्तेनानेन भृश पीडिता जाता। तद्दशा वर्णयन् कवि कथयति। (वही, २०/३२)।

प्रसङ्गेऽस्मिन् शोकाभिभूताया कौसल्याया कारुण्यपूरितानि वचासि श्रुत्वा कस्य चेतो न रोदिति? तस्या कारुण्यगतस्य विलापस्य वचनानि नितान्त पीडाकराणि सन्ति—

यदि पुत्र न जायेथा मम शोकाय राघव।
न स्म दुःखमतो भूयः पश्येयमहमप्रजाः।।

(तदेव, अ० २०/३६)

स्वतनयश्रीरामस्य वनगमन निश्चित विज्ञाय सा तेन सह वन गन्तुं तथैवोद्यता जायते यथा काचिद् धेनुर्गच्छन्त स्ववत्समनुगच्छति—

कथं हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति।
अहं त्वानुगमिष्यामि यत्र वत्स गमिष्यसि।।

(तदेव, अ० २४/९)

महतीविपत्तिङ्गताया अपि मातुर्हृदयं स्वसन्ततिम्प्रति स्नेहाशीर्वादपूरितम्भवति। सा तदुभयं प्रदातुमुद्यता भवति सर्वदा। वनवासवृत्तान्त श्रीरामस्य तदर्थ दृढनिश्चयञ्च परिज्ञायापि सा तस्य ससुख पुनरागमनस्य कामनां कुरुते—

अपीदानीं स कालः स्याद् वनात् प्रत्यागतं पुनः।
यत् त्वां पुत्रक पश्येयं जटावल्कलधारिणम्।।

(तदेव, अ० २४/३७)

अयोध्याकाण्डस्य पञ्चविंशतितम· सर्ग· कौसल्यागतवात्सल्येन नितान्तं परिपूरित.। कौसल्यैका भारतीयमाताऽस्ति यस्या पालनं भारतीयसस्कृतिमाश्रित्य कृतं वर्तते।

विषमपरिस्थित्यामपि सा स्वतनयमेवमुपदिशति—

पितृशुश्रूषया पुत्र मातृश्रुश्रूषया तथा।
सत्येन च महाबाहो चिरं जीवाभिरक्षितः।।

(तदेव, अ० २५/६)

स्वहृदये दृढा रामभक्ति धारयतो लक्ष्मणस्य चर्चाऽस्मिन् सन्दर्भेऽप्रासङ्गिकी नास्ति। स क्षणमेकमपि राम विना स्थातु न शक्नोति। तत्कृते श्रीरामो जीवनसर्वस्वमिव वर्तते। वनवासवृत्तान्त यदा तत्कर्णकुहरेषु पतित तदा तदीयाक्रोश पराभूमि यात ।

अयोध्याकाण्डस्य त्रयोविंशसर्गगतानि तदीयानि वचनानि नून ध्येयानि यैस्तदीया दृढा रामभक्ति प्रकाश्यते। (अयो० का० सर्ग २३)।

भृश क्रुद्धो लक्ष्मण रामराज्याभिषेके विघ्नरूपेणोपस्थितान् सर्वान् शत्रुत्वङ्गतान् जनान् मूलतो विनाशयितु स्वदृढ निश्चयमित्थ ज्ञापयति श्रीरामम्—

अद्य चन्दनसारस्य केयूरामोक्षणस्य च।
वसूनां च विमोक्षस्य सुहृदां पालनस्य च।।
अनुरूपाविमौ बाहू राम कर्म करिष्यतः।
अभिषेचनविघ्नस्य कर्तृणां ते निवारणे।।

(तदेव, अयो० २३/३८-३९)

अत्र श्रीरामवनवासवृत्तेन भृष पीडिताया सीताया अपि दयनीया पतिभक्तिमूला च दशा दर्शनीया। वनजन्यकष्टानि श्रावयित्वा वनगमनान्निवारिताया अपि जनकनन्दिन्या वचनानीमानि निश्चितरूपेण तदीयामविचला पतिभक्तिं प्रकटयन्ति—

न पिता नात्मजो वात्मा न माता न सखीजनः।
इह प्रेत्य च नारीणां पतिरेको गतिः सदा।।

(तदेव, अयो० २६/६)

त्वया च सह गन्तव्यं मया गुरुजनाज्ञया।
त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम्।।

(तदेव, अयो० २९/५)

राज्ञो दशरथस्य प्रताडितवात्सल्यकारुण्यं पराकाष्ठां गतो विद्यते। श्रीरामं विना स क्षणमेकमपि न जीवितु शक्नोति। सत्यनिष्ठोऽपि सन् पुत्रवात्सल्याभिभूत· स वदति यत् "वत्स रघुनन्दन ! कैकयीवरदानकारणादह मोहग्रस्तोऽस्मि। त्वं मां कारागारे निक्षिप्य अयोध्याया राजा भवेति—

अहं राघव कैकेय्या वरदानेन मोहितः ।
अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् ।।

(वा०रा०, अ० ३४/२६)

दशरथस्य विहतवात्सल्यन्तदा पराभूमि यात यदा श्रीराम सीतालक्ष्मणाभ्या साक स्वपिवनगमनायाशीर्वादात्मकादेशमवाप्तु तत्समीपं गत· । तान् विलोक्यैव दशरथस्तान्ति धावितः परन्तु विचलितो भूत्वा भूमौ पतित । दशा विषमामिमां समवलोक्य सीतालक्ष्मणाभ्या सहित· श्रीरामोऽरोदीत् । (तदेव, अ० ३४/१७-२०) ।

परन्तु सत्यनिष्ठश्रीरामः कथमपि सत्यनिष्ठ स्वपितर सत्यव्रतपालनात् पृथक्कर्तु नाभिलषति । स वदति यत् "पितरमसत्यनिष्ठ विधाय सोऽक्षय्य राज्य, सर्वभोग, वसुधाधिपत्य, सीतामन्याभिलषितपदार्थानपि स्वीकर्तु न शक्नोति । तदीया खल्वियमेव कामना वर्तते यत् पितु सत्यप्रतिज्ञा सत्या भवतु" । एव गूढ रामवचन श्रुत्वा राजा दशरथ शोकेन भृशं पीड्यमान· स्वपुत्र श्रीराममुरसा सयोज्याचेतनोऽभूत् । तदानी तस्य जडशरीरं जडपदार्थ इव चेतनाशून्योऽभवत्—

एवं स राजा व्यसनाभिपन्नस्तापेन दुःखेन च पीड्यमानः ।
आलिङ्ग्य पुत्रं सुविनष्टसंज्ञो भूमिं गतो नैव चिचेष्ट किञ्चित् ।।

(तदेव, अ० ३४/६०)

वनवासाय सीतालक्ष्मणाभ्या साकं वल्कलवस्त्रधारणप्रसङ्गस्तु नितरा हृदय-द्रावकमस्ति । सीतावस्त्रधारणन्तु भृश पीडाकरं वर्तते । सीताविवाहस्य कतिपयदिनान्येव व्यतीतानि । जनकस्य दुहितुर्दशरथस्य पुत्रवध्वा ईदृशी व्यथामयी दशा क न पीडयति? यदा श्रीरामस्य सहयोगेन सीता वल्कल धारयन्ती आस्ते तदा तत्रोपस्थिताना सर्वासामन्त पुरनारीणा चक्षूंषि नेत्राश्रुपरिपूरितानि जातानि । गुरुवसिष्ठोऽपि नेत्राश्रुभरितनयनो जातः । सीताम्प्रति तद् वात्सल्यमपि ताडितमभूत् । सीताविषये तदीयोक्तिरियमवश्यमेव दृष्टिपथ नेया—

इयं हि कस्यापि करोति किञ्चित् तपस्विनी राजवरस्य पुत्री ।
या चीरमासाद्य जनस्य मध्ये स्थिता विसंज्ञा श्रमणीव काचित् ।।

(तदेव, अ० ३८/५)

तेनोक्त कैकेयीम्प्रति यत्सोऽपि सीतारामाभ्या सह वनवास गमिष्यति तथा सर्वे नगरनिवासिनोऽपि यास्यन्ति । शत्रुघ्नेन सह कैकेय्याः पुत्रो भरतोऽपि गमिष्यति वनम् । (तदेव, अ० ३७/२५/२६-२७) ।

कैकेय्युपरि क्रूरप्रहारं कुर्वता तेन पुनरुक्त यत्सर्वे वन गमिष्यन्ति त्वमेकाकिनी सती वृक्षै· सह वसन्ती निर्जनशून्याया अयोध्याया राज्य कुरु। नूनमेव त्वदीयमाचरण सम्पूर्णप्रजाना कृतेऽहितकारकमस्ति।

ततः शून्यां गतजनां वसुधां पादपैः सह।
त्वमेका शाधि दुर्वृत्ता प्रजानामहिते स्थिता।।

(वा०रा०, ३७/२८)

कैकेयीम्प्रति गुरुवसिष्ठस्याध कथनन्तु महदर्थगौरवपूर्ण यथार्थञ्चास्ति। स पुन ब्रूते—'यत्र रामो राजा न भविष्यति न तद्राज्य राज्य भविष्यति, तत्तु जङ्गलमेव भविष्यति। एतद्विपरीतं श्रीरामो यत्र वसिष्यति तद् वनमपि स्वतन्त्रराष्ट्रत्वेन भविष्यति'—

न हि तद् भविता राष्ट्रं यत्र रामो न भूपतिः।
तद् वनं भविता राष्ट्रं यत्र रामो निवत्स्यति।।

(तदेव, ३७/२९)

गुरुवसिष्ठेनेदमपि स्पष्टीकृत कैकेयीम्प्रति यद् 'यस्मै भरताय तया राज्य याचित स तदीय पुत्रो भरत· वशपरम्पराविरुद्ध न किञ्चित् करिष्यति। वस्तुतस्तस्मै राज्य याचमानया त्वया तस्य (भरतस्य) अहितमेव विहितम्'। (तदेव, अ० ३७/३१-३२)

प्रसङ्गेऽस्मिन् लक्ष्मणस्य भूमिकाऽस्त्येतावती यत् स सपूज्यभ्रात्रा श्रीरामेण सह वनं गन्तु दृढनिश्चय। यथा तस्य भ्रातृभक्तिरविचला श्रीरामम्प्रति विद्यते तथैव तन्मातु सुमित्राया वात्सल्यमपि श्रीरामम्प्रति निश्च्छलमास्ते। वन गन्तु समुपस्थित स्वपुत्र लक्ष्मण सा एवमादिशति—

रामं दशरथं विद्धि मां विद्धि जनकात्यजाम्।
अयोध्यामटवी विद्धि गच्छ तात यथासुखम्।।

(तदेव, अ० का० ४०/९)

यद्यपि स्वपुत्रलक्ष्मणस्य वनगमनं तत्कृतेऽसह्यमस्ति तेन तत्पुत्रवात्सल्य प्रताडित भवति, परन्तु श्रीराम सीताञ्च प्रति स्नेहमिश्रितो यो वात्सल्यभावो तन्मानसे राजते तद्वशात् तया (सुमित्रया) लक्ष्मणो वनं गन्तुं सीतारामौ सेवितुञ्चादिष्ट।

वस्तुत सम्पूर्णे सन्दर्भे दशरथस्य कौसल्यायाश्च विशेषत प्रताडितवात्सल्य-भावस्य प्रकाशन जात विद्यते। श्रीरामवनगमनेन तदीया (कौसल्यागता) दशा तथैव भवति यथा व्याघ्राकृष्टवत्सवियोगेन कस्याश्चिद् धेन्वा भवति। तदीयमधोवचासि नून मर्मभेद- कराणि सन्ति—

साहं गौरिव सिंहेन विवत्सा वत्सला कृता।
कैकेय्या पुरुषव्याघ्र बालवत्सेन गौर्बलात्।।

(वा०रा०, अयो० ४३/१८)

कौसल्याया यादृश स्नेहमयं वात्सल्यं स्वपुत्रं श्रीरामम्प्रति विद्यते तथैव तत् सीताविषयेऽपि विद्यते। स्वबध्वा राज्ञो जनकस्य दुहितु सीताया वनगमनन्तु तत्कृते नितरामसह्यमस्ति। तदीयमधस्तन वचन कारुण्यपर नूनमेव ध्यातव्यमत्र—

भुक्त्वाशनं विशालाक्षी सूपदंशान्वितं शुभदम्।
वन्यं नैवारमाहारं कथं सीतोपभोक्ष्यते।।
गीतवादित्रनिर्घोषं श्रुत्वा शुभसमन्विता।
कथं क्रव्यादसिंहानां शब्दं श्रोष्यत्यशोभनम्।।

(तदेव, अ० ६१/५-६)

पितर मातर च प्रणम्य तथा तदाशीर्वाद प्रगृह्य सीतालक्ष्मणाभ्या साक श्रीरामो यदा वन प्रस्थितस्तदा परिवारजना इवायोध्यापुरवासिनो बाह्यजनाश्च सर्वे नितरा शोकाकुला मूर्च्छिताश्च जायन्ते—

प्रयाते तु महारण्यं चिररात्राय राघवे।
बभूव नगरे मूर्च्छा बलमूर्च्छा जनस्य च।।

(तदेव, अ० ४/१८)

श्रीरामवियोगेन न केवलं नरा नार्यश्च दारुण शोकमनुभवन्ति प्रत्युतायोध्याया गजाश्वप्रभृतयो मानवेतरप्राणिनोऽपि भृश पीड्यमाना भवन्ति—

तत् समाकुलसम्भ्रान्तं मत्तसङ्कुपितद्विपम्।
हयसिञ्जितनिर्घोषं पुरमासीन्महास्वनम्।।

(तदेव, अयो० ४०/१९)

प्रवासिन स्वप्रियस्य समाचारं विज्ञातु तत्सम्बन्धिना समुत्कण्ठा नितान्त स्वाभाविकी। सीतालक्ष्मणाभ्यां साक श्रीराम वन प्रेष्य यदा सुमन्त्र अयोध्यामागतस्तदा तं दशरथ नानाप्रकारेण स्वजिज्ञासामित्थं प्रकटयति—

किमुवाच वने रामः किमुवाच च लक्ष्मणः।
सुमन्त्र! वनमासाद्य किमुवाच च मैथिली।।

(वा०रा०, अ० ५८/११)

एषु प्रश्नेषु तदीया पुत्रवियोगजनिता व्यथा नितान्त मुखरिता भवति। सुमन्त्र-मुखेन श्रीरामसन्देशश्रवणानन्तरं सीतालक्ष्मणसहितश्रीरामस्य दर्शनकामना तदीया न पूर्तिङ्गता स (दशरथः) सुमित्राकौसल्यासमक्ष भृश विलपन् स्वप्राणान् परित्यक्तवान्—

इति मातुश्च रामस्य सुमित्रायाश्च संनिधौ।
राजा दशरथः शोचञ्जीवितान्तमुपागमत्।।

(तदेव, अयो० ६४/७७)

नूनमसौ वाल्मीकिरामायणस्यायोध्याकाण्डस्य रामवनगमनप्रसङ्ग. काव्यात्मक-भावसृष्टिरेका। वियोगवात्सल्यस्येदृशं हृद्य सजीवञ्च चित्रणमन्यत्र सुदुर्लभमेव। वाल्मीकिचित्रित वियोगवात्सल्यमयं चित्रमिदं न केवल संस्कृतकाव्यजगत. प्रत्युत सम्पूर्णकाव्यलोकस्य नितरां हृद्य भावभरितञ्चचित्रम्।

●●

वाल्मीकिरामायणे वर्षावर्णनम्

रामकथा भारतस्यापूर्वो निधि । यद्यपि तस्या मूल प्राचीनतमे वैदिकवाङ्मयेऽपि समुपलभ्यते परन्तु तस्यै सर्वाङ्गपूर्ण वाङ्मयस्वरूपं प्रयातुमादिकविर्वाल्मीकिरेव यशोभाग् जात इत्यत्र न काऽपि सशीति । सर्वगुणोपेत कौशल्यानन्दवर्धन सर्वजनाभिवन्द्य श्रीराम स्वमहाकाव्यस्य नायकत्वेन निर्धार्य तेन रामायणाख्यं यदादिकाव्यं प्रणीतन्तेन रामकथया न केवल भारतस्यापि तु विश्वस्य सारस्वतयात्रा विहिता । क्रौञ्चवधस्य घटनानन्तर रामायणस्य प्रणेता महर्षिवाल्मीकिर्लोके आदिकविपदवीमधिगतस्तथा तत्काव्यमादिकाव्याभिधानमवाप्तम् । रम्या रामायणी कथा विरच्य वाल्मीकिर्लोके सकलजनवन्द्यो जात —

नमस्तस्मै कृता येन रम्या रामायणी कथा ।

रामायणं नैककाव्यकृतीनामुपजीव्यत्वेन जातम् । बृहद्धर्मपुराणे तत्काव्यबीजत्व सङ्गतमेवोक्तम्—

पठ रामायणं व्यास काव्यबीजसनातनम् ।
यत्र रामचरित्रं स्यात् तदहं तत्र शक्तिमान् ।।

(प्र० ख ३०/४७/५१)

वाल्मीकिकृतं रामायण न केवल सस्कृतसाहित्य अपि तु समस्ते विश्वसाहित्ये नितरामादरास्पदमस्ति । वस्तुतस्तस्य ख्यातिरन्ताराष्ट्रियाऽस्ति । रामायण खलूपजीव्यत्वेन परवर्तिनामनेकसंस्कृतमहाकाव्यनाटकादीनामाधारभूमि । भारतीयसस्कृतिदृष्ट्या, काव्यसौन्दर्यदृष्ट्या धर्मदृष्ट्या च रामायणस्य सुतरा महत्त्वम् । काव्यविधादृष्ट्या तत्महाकाव्यपदवी भजते । काव्यशास्त्राचार्यकृतानि महाकाव्यलक्षणानि प्रायेण रामायणमेवाश्रित्य कृतानि । सप्तकाण्डेषु विभक्तमिद महाकाव्यमनेकवर्ण्यविषयता भजते । रामायणस्य कथानायको लोकवन्द्य श्रीरामो वर्तते । परवर्तिनामनेककाव्यानां स एव नायकत्वेनाङ्गीकृत । श्रीरामेऽनेकगुणाना समवायो विद्यते । तन्नायकत्वविषये समापतितानामक्षेपाणां विषये महाकविर्जयदेवस्येयमुक्तिर्निंतान्तमहत्त्वमावहति—

स्वसूक्तीनां पात्रं रघुकुलतिलकमेकं कलयताम् ।
कवीनां को दोषः स च गुणगणानामवगुणः ।।

रामायणस्य महत्त्वमनेनैवानुमातुं शक्यते यत्तदाश्रित्यानेकविद्वद्भिरनेकटीकाः कृता । महाकाव्यभूते रामायणे नैकविषया वर्ण्यतां याता । यतो हि सम्पूर्णा रामकथा

तस्मिन् चित्रिताऽतस्तत्सम्बद्धान्यखिलानि पात्राणि तत्र सम्यक्तया चित्रितानि। तस्मिन् सीतारामविवाहः, रामराज्याभिषेकः, रामवनगमनम्, दशरथमरणम्, भरताभिषेक·, सीताहरण, जटायुमरण, सुग्रीवविभीषणमैत्री, अनेकराक्षसवध , बालिवध , रामरावणयोर्युद्ध रावणकुम्भकर्णादिवधः सुग्रीवविभीषणराज्याभिषेकः, सीताप्राप्ति·, सीतालक्ष्मणादिभि सह रामस्यायोध्याम्प्रति प्रस्थानं, रामस्य राज्यारोहण रामराज्यञ्चेति नैका विषया वर्णिता । उक्तविषयैः साक रामायणे यादृश पितृप्रेम, भ्रातृप्रेम, मातृप्रेम, पतिप्रेम, मित्रप्रेम च वर्णितं तत्तु नितान्त महनीयम्। एतदरिक्तं महनीयवर्ण्यविषयोऽस्ति प्रकृतिवर्णनम्। रामायणे प्रकृतिवर्णनस्य भव्या छटा दृष्टिविषयता याति। तत्र वृक्षलतादिसमेतवनानां नदीना पर्वताना वन्यजीवाना विशदतया वर्णनं विद्यते। अस्मिन्नेव प्रसङ्गे ऋतूनामपि तत्रातिमनोहरं चित्ताकर्षकञ्च वर्णनं राजते। रामायणगतस्य ऋतुवर्णनस्य महतीय विशेषता यत्तदालम्बनरूपेण जातम्। संस्कृतस्यान्यकवीनामिव वाल्मीकिनोद्दीपनरूपेण प्रकृतिवर्णन प्रायेण न कृतम्। रामायणगतप्रकृतिवर्णनस्येदं वैशिष्ट्यमवश्यमेव ध्यातव्य यत्तेन वर्ण्यविषये सर्वाशतो याति बिम्बत्वम्। वर्ण्यविषय. साक्षादिव नृत्यतितरां नेत्रसमक्षं सर्वेषाम्। उक्तवर्णने चास्यापरा विशेषतास्ति तद्गतं काव्यसौन्दर्यम्। प्रकृतिवर्णनगतालङ्कारप्रयोगेण प्रकृतेरनुपमा शोभा ग्राह्यता च जायते। अधुना रामायणगत वर्षावर्णनमपेक्षितम्।

रामायणे ऋतवोऽपि गता वर्ण्यताम्। तेषु वर्षर्तु. स्वभव्यरूपेण दृष्टिगोचरता याति। ईदृश भव्यं मनोहरञ्च वर्षर्तुवर्णनमन्यत्र सुदुर्लभमेव। व्यापिनी वाल्मीकिसूक्ष्मदृष्टि वर्षर्तोः सर्वस्मिन् पक्षे पतति। इत्थं प्रतिभाति यत् स वर्षादर्शनकाल एव तद्वर्णनं करोति। एकस्मिन् श्लोक एव स अनेकवस्तूनि वर्ण्यविषयत्वेन गृह्णाति।

वर्षर्तुवर्णन वाल्मीकिरामायणे सर्वप्रथम किष्किन्धाकाण्डे नेत्रपथमायाति। काण्डस्य प्रारम्भे बालिवधस्य सुग्रीवाभिषेकस्य चानन्तर माल्यवतः पर्वतस्य पृष्ठभागे प्रतिवसन् रामो लक्ष्मणं प्रति वर्षर्तुस्वरूपं प्रकाशयितुमित्थं ब्रूते—

अयं स कालः सम्प्राप्तः समयोऽद्य जलागमः।
सम्पश्य त्वं नभो मेघैः संवृतं गिरिसन्निभैः॥

(वा० रा० किष्किन्धाकाण्ड २८/२)

अर्थात् 'सुमित्रानन्दन ! साम्प्रतं लोकेभ्यो जीवनाधायकं जलं प्रापयितुं पर्वताकारा मेघा गगने दृश्यमानाः सन्ति। यैर्विततमिद गगनं समाच्छादितम्। विदितमेव यद ग्रीष्मकाले सूर्यस्य भीषणातपेन जगन्नितान्तं तप्तं जायते। धरण्यपि शुष्कतां धूलधूसरितां च प्रयाति। वायुरपि दाहकत्व भजते, परन्तु प्राप्ते च वर्षाकाले पृथिव्यां विकीर्णा धूलिकणाः प्रशान्तिङ्गताः, वायुश्च शीतलत्वं श्रयते, ग्रीष्मगताः सर्वे दोषाः सुनिरुद्धा·,

भूपालानां युद्धयात्रा निरुद्धाश्च जाता परदेशस्थाश्च जना स्वदेशम्प्रति समागच्छन्ति–

रजः प्रशान्तं सहिमोऽद्य वायु –
र्निदाघदोषप्रसराः प्रशान्ताः ।
स्थिता हि यात्रा वसुधाधिपानां
प्रवासिनो यान्ति नराः स्वदेशान् ।।

(वा०रा०, २८/१५)

वर्षाकाले मेघाना साम्राज्यमिव जायते । वस्तुतो वर्षाकालो मेघकालत्वेनापि वक्तु शक्यते । 'जलदसमये'त्यादिवचनैरिदमेव तथ्य प्रामाण्य याति । वर्षासमये कृष्णवर्णाना मेघाना बाहुल्य भवति । गगने दृश्यमाना मेघा युद्धभूमिस्था गजा इव तारस्वरेण गर्जन्ति । इमे (मेघाः) खलु गिरिराजशिखराकृति धारयन्ति प्रकाशमाना विद्युतो मेघरूपगजराजोपरि पताका इवोड्डीयन्ते । गगन उड्डीयमाना बलाका शैलेन्द्रशिखरशोभा धारयन्ति—

विद्युत्पताकाः सबलाकमालाः
शैलेन्द्रकूटाकृतिसन्निकाशाः ।
गर्जन्ति मेघाः समुदीर्णनादा
मत्ता गजेन्द्रा इव संयुगस्थाः ।।

(तत्रैव, २८/२०)

औपम्यविधानेन रमणीयतामवाप्तमिद वर्णनमिति ज्ञेयम् ।

वर्षाकाले यदा मेघा भवन्ति तदा तैर्गगनमाच्छन्न सन्न दृश्यते तदभावे च दृश्यते । गगनस्य स्थिति सागर इव जायते यतो हि कदाचित् सागररूप पर्वताच्छन्नं सन्न दृश्यते कदाचिच्च पर्वताभावे दृश्यते द्रष्टव्यमिद बिम्बमधस्तने श्लोके—

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं बिभाति ।
क्वचित्क्वचित् पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य ।।

(तत्रैव, २८/१७)

इत्थ प्रतिभाति यद् वाल्मीके प्रकृत्या सह घनिष्ठ सम्बन्ध । अन्यकविरिव तेन प्रकृते· पारम्परिक वर्णनं न विधीयते । वनेन सह तस्यापि तथैव सम्बन्धो यथा तत्काव्यनायकस्य रामस्य वनेन (सम्बन्ध)। वनगतानि सर्वाणि वस्तूनि सकलाश्च प्राणिनस्तत्परिचिता इव प्रतीयन्ते । वन्यजीवन तत्कृते तथैव परिचितं यथा रामचन्द्रस्य (कृते) । अत एव तदीये वर्षावर्णने नितान्त याथार्थ्य, सहजता, प्रभावशालित्वञ्च विद्यते ।

ग्रीष्मानन्तर समागते वर्षाकाले वनस्य कीदृशी नयनाभिरामा दशा भवतीति विलोकनीयमस्मिन् श्लोके—

जाता वनान्ताः शिखिसुप्रवृत्ता
जाताः कदम्बाः सकदम्बशाखाः ।
जाता वृषा गोषु समानकामा
जाता मही सस्यवनाभिरामा ।।

(वा०रा०, २८/२६)

वर्षाकाले वनान्तभागे मयूरा नर्तनशीला , कदम्बवृक्षा पुष्पै शाखाभिश्च सम्पन्नाश्च जाता· । गवेन्द्रा समानरूपेण गोषु सकामा जाताः तथा पृथिवी हरितसस्य-वनादिभि सौन्दर्यमापन्ना जाता । वर्षाकाले केन कि क्रियते? इति द्रष्टव्यमस्मिन् श्लोके—

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गमाः ।।

(तत्रैव, २८/२७)

अत्र यथासख्यालङ्कारसाहाय्येन वर्षाकालीनानामनेकवस्तूनां वर्णन नितान्तं भव्यम् ?

वर्षाकाल आकाशे सदा पयोदा विद्यमाना जायन्ते । कदाचिच्च मेघानामीदृशमाधिक्य भवति यत्किञ्चिदपि न दृश्यता याति । मेघघटाभिर्गगन समाच्छाद्यते, न रात्रौ तारागणा विलोक्यन्ते, न दिवसे सूर्य· । प्रचुरं जलराशिमवाप्य धरित्री परमा तृप्तिं व्रजति, दिशा अपि समाच्छादिता भूता दृष्टिगोचरतां न गच्छन्ति । वर्षाजनितमन्धकारसाम्राज्य विलोकनीयमस्मिन् श्लोके—

घनोपगूढं गगनं न तारा
न भास्करो दर्शनमभ्युपैति ।
नवैर्जलौघैर्धरणी वितृप्ता
तमोविलिप्ता न दिशः प्रकाशाः ।।

(तत्रैव, २८/४७)

वर्षासमये मेघानां राज्यमिव भवति । वाल्मीकिना वा तेषां नैकचित्राणि चित्रितानि । नीलमेघा आकाशेऽपरमेघैस्तथैव सम्मिलिता भवन्ति यथा दवाग्निना दग्धा पर्वता अपरपर्वतैः सम्बद्धा दृष्टिगोचरा जायन्ते —

नीलेषु नीला नववारिपूर्णा
मेघेषु मेघाः प्रतिभान्ति सक्ताः ।
दवाग्निदग्धेषु दवाग्निदग्धाः
शैलेषु शैला इव बद्धमूलाः ।।

(वा०रा०, २८/४०)

वर्षासमये वर्षणशीला नीला मेघा आकाशे नीचैरागच्छन्ति तथा भृशं गर्जन्ति। तेषा गर्जन समुद्राणामपि कोलाहल तिरस्कुरुते। ते स्वजलप्रवाहैर्नदीः, तटाकानि, सरासि वापी पृथिवीञ्चाप्लावयन्ति। एतत्सम्बद्ध चित्रं मनोहरता गत विद्यते—

मेघाः समुद्भूतसमुद्रनादा
महाजलौघैर्गगनावलम्बाः ।
नदीस्तटाकानि सरांसि वापी-
र्महीं च कृत्स्नामपवाहयन्ति ।।

(तत्रैव, २८/४४)

वर्षाकाले वर्षागता जलवेगा पतन्ति धरण्यां, वेगयुता वायवो वान्ति, स्वतटं विनाश्च नद्यो वहन्ति। एतद्विषयकं दृश्यं वर्णितमस्मिन् श्लोके चारुतया—

वर्षप्रवेगा विपुलाः पतन्ति
प्रवान्ति वाताः समुदीर्णवेगाः ।
प्रणष्टकूलाः प्रवहन्ति शीघ्रं
नद्यो जलं विप्रतिपन्नमार्गाः ।।

(तत्रैव, २८/४५)

वर्षर्तौ वर्षाजलैः पर्वतशिखरा नितान्तं प्रच्छालिता जायन्ते। तेभ्यः पतनशीला निर्झरा मुक्ताकलापा इव महती शोभां धारयन्ति। एतद्विषयकं दृश्यं मनोहरं दृश्यतां यात्यस्मिन् श्लोके—

महान्ति कूटानि महीधराणां
धाराविधौतान्यधिकं विभान्ति ।
महाप्रमाणैर्विपुलैः प्रपातै-
र्मुक्ताकलापैरिव लम्बमानैः ।।

(वा०रा०,कि०का०, २८/४८)

वर्षाकालो न सर्वेषा कृते सौख्यावहो न वा दु:खप्रद । गजगवेन्द्रसिहपर्वत-प्रभृतयस्तु प्रफुल्ला जायन्ते, परन्तु राज्ञा युद्धविषयक उत्साहो मन्दता गच्छति । एकस्मिन्नेव श्लोके सर्वे सहैव वर्ण्यता गता —

मत्ता गजेन्द्रा मुदिता गवेन्द्रा
वनेषु विक्रान्ततरा मृगेन्द्राः ।
रम्या नगेन्द्रा निभृता नरेन्द्राः
प्रकीडितो वारिधरैः सुरेन्द्रः ।।

(तत्रैव, २८/४३)

सर्वविदितमिद यथार्थ यद् वर्षाकाले जम्बूवृक्षा नीलवर्णपरिपक्वफलै: परिपूर्ण-कलेवरा भवन्ति । तेषा शाखोपरि मधुरफलरसलोभेन भ्रमरा राजमाना जायन्ते—

अङ्गारचूर्णोत्करसन्निकाशैः
फलैः सुपर्याप्तरसैः समृद्धैः ।
जम्बूद्रुमाणां प्रविभान्ति शाखा
निपीयमाना इव षट्पदौघैः ।।

(तत्रैव, २८/३०)

जना जम्बूफललोभेन वर्षाकाल प्रतीक्षमाणास्तिष्ठन्ति । प्राप्ते च तत्समये तेऽनायासेनाभीष्टफलानि प्राप्नुवन्ति समानन्दिताश्च भवन्ति । जम्बूफलै पतितै पृथिवी-समाच्छादिता च जायते । (तत्रैव २८/१९)

वर्षागमेन वनानि विशेषत. सौन्दर्यावहानि भूत्वा जनान् समाह्लादयन्ति । घासा हरितवर्णतामवाप्य प्रफुल्ला इव लक्ष्यन्ते । मयूराश्चानन्दभारभरिता नृत्यव्यापारव्यापृता नृत्योत्सवं मानयन्ति—

वर्षोदकाप्यायितशाद्वलानि
प्रवृत्तनृत्तोत्सवबर्हिणानि ।
वनानि निर्वृष्टबलाहकानि
पश्यापराह्णेष्वधिकं विभान्ति ।।

(तत्रैव, २८/२१)

अनेन नि:सन्दिग्धं वर्षाकालिकं वन दृष्टिपथमायाति हृदयं हरति च ।

वर्षाकाले भगवान् विष्णु: क्षीरसागरमाश्रयते, सरित: सागरमुपयान्ति, मुदिता

बलाका जलदान् प्रति धावन्ति तथा सकामा सत्यो रमण्य स्वप्रियान् यान्ति—एतत्सर्व चारुतया चित्रितमत्र—

निद्रा शनैः केशवमभ्युपैति
द्रुतं नदी सागरमभ्युपैति ।
हृष्टा बलाका घनमभ्युपैति
कान्ता सकामाः प्रियमभ्युपैति ।।

(तत्रैव, २८/२५)

अत्र निद्राया भगवत्समीपगमनवर्णनेन विष्णो· क्षीरसागरे शयनरूप पौराणिक सन्दर्भ उल्लिखित ।

वर्षाकाले वीरवधूट्य प्रादुर्भूय प्रकाशमाना सत्यो मनोहारिणी छटा विस्तारयन्ति । एतद् दृष्टिगत विधाय कवि कथयति यद् वीरवधूट्य. सुसज्जितनारीशोभां धारयन्ति—

बालेन्द्रगोपान्तरचित्रितेन
विभाति भूमिर्नवशाद्वलेन ।
गात्रानुपृक्तेन शुकप्रभेण
नारीव लाक्षोक्षितकम्बलेन ।।

(तत्रैव, २८/२४)

एतद्वर्णनं नूनं रात्रौ वर्षागतं दृश्य नेत्रसमक्षं बिम्बितमिव विधत्ते ।

कदम्बादिवृक्षशाखारूढा· पुष्परसपानसक्ता षट्पदा वर्षाजनितजलधारानिपातैराहता· सन्तः कीदृशमाचरन्तीति प्रेक्षणीयमत्र—

धारानिपातैरभिहन्यमानाः
कदम्बशाखासु विलम्बमानाः ।
क्षणार्जितं पुष्परसावगाढं
शनैर्मदं षट्चरणास्त्यजन्ति ।।

(तत्रैव, २८/२९)

पुष्परसलोलुपाः षट्पदाः कथमाचरन्ति वर्षासमये—इति समुद्घाटितमनेन ।

प्रस्तरखण्डोपरि पतनाद्विखण्डितवेगा निर्झरा यदा भ्रमरगुञ्जनभरितासु गुहासु पतन्ति तदा तेषां शोभा नितान्तं वर्धमाना सर्वान् मोहयति । बिम्बमिदं ग्रहीतुं दर्शनीयोऽयं श्लोको नूनम्—

शैलोपलप्रस्खलमानवेगाः
शैलोत्तमानां विपुलाः प्रपाताः ।
गुहासु सन्नादितबर्हिणासु
हारा विकीर्यन्त इवावभान्ति ।।

(वा०रा०, २८/४९)

वर्षाकाले निर्झराणा वास्तविक स्वरूप समुद्घाटयत्यय श्लोक ।

वर्षाकालो गजेन्द्राणा मयूराणाञ्च कृते निरतिशयरूपेणानन्दकरो भवति । नास्ति तथ्यमिद कविकृतेऽविज्ञातम् । अत एव स वदति यन्निर्झरसामीप्यमवाप्य मदोन्मत्ता गजेन्द्रा केतकिपुष्पसुगन्धमाघ्राय नितान्त मुदिता गर्जन्ति तथा मयूरा रव कुर्वन्ति—

प्रहर्षिताः कैतकिपुष्पगन्ध-
माघ्राय मत्ता वननिर्झरेषु ।
प्रपातशब्दाकुलिता गजेन्द्राः
सार्धं मयूरैः समदा नदन्ति ।।

(तत्रैव, २८/२८)

वर्षर्तुसमये मोदमाना दर्दुरा अपि न विस्मृता वाल्मीकिना । वर्षाकालमपहाया-न्यर्तुकाले दर्दुरा निद्रामवाप्ता इव तिष्ठन्ति, परन्तु वर्षासमये ये मेघगर्जनेन निद्रा विहाय नानाविधरूपाकृतिवर्णनादयुक्तास्ते नवजलधाराभि प्रताडिता ससुखं सोत्साहञ्च शब्दध्वनि कुर्वन्ति—

अधस्तने श्लोके नानाभावकल्पनामण्डितहृदयो वाल्मीकि स्वकल्पनावैभनेन कीदृश कल्पयतीति द्रष्टव्यम्—

नरैर्नरेन्द्रा इव पर्वतेन्द्राः
सुरेन्द्रदत्तैः पवनोपनीतैः ।
घनाम्बुकुम्भैरभिषिच्यमाना
रूपं श्रियं स्वामिव दर्शयन्ति ।।

(तत्रैव, २८/४६)

यथा जलकलशेन नरेन्द्रोऽभिषिक्तो भवति तथैवेन्द्रप्रदत्तेन पवनदेवानीतेन च मेघरूपजलकलशेनाभिषिक्ता (प्रक्षालिता·) इमे पर्वता सर्वांशत· शोभन्ते । रूपकालङ्कारमाध्यमेन साकरता नीता कल्पनेयं सत्यमानन्दयति ।

कवेरेकमपर वैशिष्ट्यमत्रावश्यमेवोल्लेखमर्हति तदस्ति मानवीयकरणतया प्रकृतिवर्णनम्। यद्यपि कविदृष्टिवर्षागतयाथार्थ्यमेव वर्णयितु रमते, तथापि वर्षावर्णन-प्रसङ्गे यत्र कुत्रचित् तद्वर्णन मानवीकरणप्रभावित सन्निहितां भव्यता सजीवताञ्च धरत इति परिज्ञायते। वैशिष्ट्यमिदमवगन्तुमधस्तना श्लोका दृष्टिपथमानेतव्या —

सन्ध्यारागोत्थितैस्ताम्रैरन्तेष्वपि च पाण्डुभिः।
स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम् ।।
मन्दमारुतनिःश्वासं सन्ध्याचन्दनरञ्जितम्।
आपाण्डुजलदं भाति कामातुरमिवाम्बरम्।।
एषा धर्मपरिक्लिष्टा नववारिपरिप्लुता।
सीतेव शोकसन्तप्ता मही वाष्पं विमुञ्चति।।
मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः।
मारुतापूरितगुहाः प्राधीता इव पर्वताः।।

(तत्रैव, २८/५,६,७,१०)

सन्ध्याकाले रक्तश्वेतमेघरूपवस्त्रधर आकाश वस्त्रपट्टिकाबद्धव्रणो मनुष्य इव प्रतीयते। आकाशो मन्दमन्दवायुरूपनि श्वास प्रवाहयन्, रक्तिमरूपरक्तचन्दनलिप्तः पीतमेघशकलयुक्तो विरही मनुष्य इव भाति। धूपसन्तप्ता नवीनजलसिक्ता धरणी शोकसन्तप्ताश्रूणि प्रवाहयन्ती सीतेव परिलक्ष्यते। श्यामघनरूपमृगचर्मधरास्तथा श्यामघनरूपमृगचर्मधरा जलधारारूपयज्ञोपवीतधरा वायुपूर्णकन्दरा. पर्वता वेदपाठिन इव समवलोक्यन्ते।

अत्र सर्वत्र रूपकालङ्कारसमाश्रयणेन प्रकृते कृत मानवीकरण निरतिशय शोभामावहतीति स्पष्टमेव।

वाल्मीकिवर्षावर्णनपरिशीलनेन वक्तुमिदं नासमीचीन यत्तस्य (वाल्मीकेः) वर्षा-वर्णनमिदमेकतो वर्षागत वास्तविक बिम्ब विम्बयति पुनरपरतस्तस्या (प्रकृते) मानवी-करणमपि प्रख्यापयति। निरतिशयभावभरितेन प्रकृतियथार्थस्वरूपाभिज्ञेन, नानाविध-कल्पनामण्डितहृदयेन वाल्मीकिना यादृश वर्षावर्णन विहित सरलसरसपदावलीयुता प्रसादमयी भाषा समाश्रित्योदात्तशैल्या तत्तु नूनं मनोहारित्वं प्रभावातिशयञ्च धत्ते नास्मिन् कथने संशीति काचित्। वाल्मीकेर्वर्षावर्णनमिदं सम्पूर्णे सस्कृतकाव्यजगति महनीय स्थानं भजत इति दिक्।

●●

श्रीमद्भागवत-सन्देशः

अष्टादशमहापुराणाना मध्ये श्रीमद्भागवतपुराणमत्यन्तं महत्त्वावह प्रशस्यमुपादेय-श्चास्ति। भारतस्य धार्मिकाध्यात्मिकवाङ्मये श्रीमद्भागवतमेकं समुज्ज्वलग्रन्थरूपेण देदीप्यते। एतत्पुराणम्प्रति भारतीयास्तिकजनानां हृदयेषु निरूपमा श्रद्धाऽऽस्था चास्त। महनीयपुराणेऽस्मिन् ज्ञानभक्तिवैराग्याणां त्रिवेणी प्रवहतितराम्। यस्यामवगाहनेन पण्डितजना आत्मजीवनं कृतार्थयन्ति।

श्रीमद्भागवतेऽपूर्वो ज्ञानराशि सुगुम्फित। तत्र निहित ज्ञानराशि प्रकाशयितु नैकवैष्णवसम्प्रदायै स्वस्वसिद्धान्तानुसारं तदीया व्याख्या लिखिता·। श्रीमद्भागवतप्रति-पाद्यविषयाणां गाम्भीर्य महत्त्वञ्चाकलय्याधस्तनोक्ति याथार्थ्यमेवावहति—

'विद्यावता भागवते परीक्षा'।

श्रीमद्भागवते द्वादशस्कन्धा सन्ति येषु विविधविषयानवलम्ब्य विभिन्ना अध्या-याश्च राजन्ते। लोके विशेषतो भारतवर्षे यादृशी प्रसिद्धि. श्रीमद्भागवतस्यास्ते न तादृशी कस्यचिदन्यस्य पुराणस्य। वस्तुतो भारतस्याध्यात्मिकसांस्कृतिकधार्मिकजीवनं श्रीमद्-भागवतप्रभावेण प्रभावितम्। श्रीमद्भागवतस्य महतीय विशेषता यदनेकसस्कृतकाव्य-नाटकादीनामुपजीव्यग्रन्थोऽयम्। पुराणमेतद् वेदरूपकल्पवृक्षस्य परिपक्वं फलं यत् श्री शुकदेवरूपशुकमुखसम्बन्धात् परमानन्दमयसुधया परिपूर्णतां याति। तस्मिन् फले मूर्तिमान् रसो राजते अतो भावुकै· पृथिव्यामस्या तद् रसस्य पानं वारं-वारं करणीयम्—

निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः।।

पुराणेऽस्मिन् यद्यपि विविधविषया उपवर्णितास्तत्र नैकाख्यानानां साङ्गोपाङ्गं वर्णनं, परन्तु मुख्यरूपेण भगवत श्रीकृष्णस्य विशेषाङ्कनम्। भागवतपुराणे स्पष्टीकृत-मिदं यत् तत्त्वविदः कोविदा सच्चिदानन्दरूपं ज्ञानं (तत्त्वं) मन्यन्ते। तत्तत्त्वञ्च ज्ञातृ-ज्ञानभेदविरहितमखण्डमद्वितीयञ्चास्ति। तदेव केनचित् ब्रह्मेति पदेन, केनचित् परमात्मेति पदेन, केनचिद् भगवानिति पदेन चाभिधीयते—

वदन्ति यत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।।

उक्तं सत्यरूपं तत्त्व सर्वान्तर्व्यापि तथा सर्वथा निर्विकारमस्ति। तदेव श्रीवासुदेवकृष्णेति नाम्नाप्युच्यते—

ज्ञानं विशुद्धं परमार्थमेक-
मनन्तरं त्वबहिर्ब्रह्म सत्यम्।
प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं
यद्वासुदेवं कवयो वदन्ति।।

प्रसङ्गेऽस्मिन् तस्यैव भगवत श्रीकृष्णस्य प्राप्तिसाधनरूपेण भक्तिर्विशदरूपेण विवेचिता। भगवत श्रीकृष्णस्य प्राप्तेरर्थोऽस्ति परमपदस्य प्राप्ति·। मोक्षप्राप्तेस्त्रीणि साधनानि सन्ति—ज्ञान, निष्कामकर्म भक्तिश्च। एषु त्रिषु साधनेषु कर्मज्ञानरूपौ मार्गौ कठिनौ पर भक्तिरूपो मार्ग· सुकर साध्यश्च। परमज्ञानिना शुकदेवमुनिना श्रीमद्भागवते सर्वाशतो भगवद्भक्तिरेवोपदिष्टा। तदनुसार धीमान् पुरुषो, भवेद्वा निष्कामः सकामोऽथवा मोक्षकामो भवेत् तीव्रभक्तियोगेन केवलं पुरुषोत्तमभगवत एवाराधना विधेया—

अकामः सर्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन भजेत पुरुषं परम्।।

श्रीमद्भागवतानुसारं भगवत्प्रसादेनैव धर्मानुष्ठानस्य पूर्णसिद्धिः अतः समग्रचित्तेन भक्तेन भक्तवत्सलस्य भगवतो नित्यं निरन्तरं श्रवण, कीर्तन, ध्यानमाराधनञ्च विधेयानि—

तस्मादेकेन मनसा भगवान् सात्वतां पतिः।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा।।

भगवत्प्रेममयी भक्तिरेव केवल जीवनसाफल्यस्य मूलमन्त्रः। तदाश्रयेण यदा ससारस्य समस्ता आसक्तयो विनश्यन्ति, तदा हृदयमानन्दभरेण भरितं जायते तथा भगवत्तत्त्वं स्वयमेवानुभूयते। हृदये भगवत साक्षात्कारेण हृदयग्रन्थयो भिद्यन्ते, सकला सन्देहा विनश्यन्ति, कर्मबन्धनानि च क्षीयन्ते —

एवं प्रसन्नमनसो भगवद् भक्तियोगतः।
भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते।।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे।।

श्रीमद्भागवतानुसार श्रीकृष्णो वेदतात्पर्यरूप । स एव यज्ञोद्देश्यम् । श्रीकृष्णावाप्तये एव योगा समाश्रीयन्ते तथा कर्मणा परिसमाप्तिरपि श्रीकृष्ण एव भवति। ज्ञानद्वारा ब्रह्मतत्त्वरूप श्रीकृष्ण एव प्राप्तव्य तपश्चरणमपि श्रीकृष्णप्रसादाय विधीयते—

वासुदेवपरा वेदा वासुदेवपरा मखाः ।
वासुदेवपरा योगा वासुदेवपराः क्रियाः ।।
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः ।।

सच्चिदानन्दब्रह्मावतार भगवन्तं श्रीकृष्ण प्रत्येवात्मसमर्पणमूलभक्तेरनुष्ठानमेव श्रीमद्भागवतस्य प्रमुख सन्देशोऽस्ति । यतो हि मानवाभीष्ट कल्याण तस्मादेव भवति । श्रीमद्भागवतानुसार मानवकृते स एव सर्वोत्तमो धर्मो येन भगवति श्रीकृष्णे भक्तिर्भवेत् । भक्तिरपि सर्वकामविरहिता निरन्तरमक्षुण्णा वर्द्धनशीला च भवेत् । एवविधया भक्त्या हृदयमानन्दस्वरूप परमात्मानं लब्ध्वा कृतकृत्य जायते । परमोऽय महिमा भक्तेर्यद् भगवति कृष्णे भक्तिप्रादुर्भावकाले, अनन्यप्रेम्णा तस्मिन् चित्ते योजिते च निष्कामज्ञानवैराग्ययोराविर्भावो जायते । एव ज्ञानवैराग्येऽपि भक्तिमूल एवेति प्रतिभाति ।

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययाऽऽत्मा सम्प्रसीदति ।।
वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् ।।

श्रीमद्भागवतस्य द्वितीये स्कन्धे श्रीशौनकमहाभागः सूत ब्रूते यद् भगवत श्रीकृष्णात् पराङ्मुखानीन्द्रियाणि विफलान्येव । यो मनुजो भगवत श्रीकृष्णस्य कथां कदापि न सश्रुणुते, तस्य कर्णौ निरर्थकौ, या जिह्वा भगवल्लीलाजातं न गायति सा दर्दुरजिह्वेव 'टरटरे'ति निरर्थक शब्दं कुरुते, यच्च शिरो भगवच्चरणयोर्न नमति तत् कौशेयवस्त्रमुकुटादिभिरलङ्कृतमपि भारमात्रमेव, यौ च करौ भगवन्तं न पूजयत. तौ हेमकङ्कणाभूषितावपि शवकराविव (शोभाविहीनौ स्त), मनुष्यस्य ये चक्षुषी भगवत. स्मारकाणि नदीतीर्थमूर्तिप्रभृतिपदार्थान्न पश्यत., ते मयूरपक्षेषु चित्रितनेत्रमिव निष्प्रयोजन एव वर्तते, यानि पदानि भगवतल्लीलास्थलानि प्रति न यान्ति तानि शक्तियुतान्यप्यचलवृक्षसन्निभानि मन्यन्ते, न सन्ति तानिहृदयानि यानि भगवन्मङ्गलमयनाम स्वयं श्रवण-कीर्तिनैरपि द्रवितानि भूत्वा न प्रवहन्ति तानि लौहसदृशानि सन्ति—

बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुरे नरस्य ।

जिह्वासती दार्दुरिकेव सूत! न चोपगायत्युरुगायगाथा।।
भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम्।
शावौ करौ यौ कुरुतः सपर्या हरेर्लसत काञ्चनकङ्कणौ वा।।
वर्हायिते ते नयने कराणां लिङ्गानि विष्णोर्न निरीक्षतो ये।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ।।
तदश्मसारं हृदयं बतेदं यद् ग्रह्यमाणैर्हरिनामधेयैः।
न विक्रियेताथ महाविकारो नेत्रे जलं गात्रसहस्रहर्षः।।

श्रीमद्भागवते विविधोपाख्यानमाध्यमेन दया-क्षमा-मैत्रीभावपरोपकार-जन-कल्याणभावनाद्युदात्तमानवमूल्यपरिपालनाय यदुपदिष्ट तत्तु निर्विवादरूपेण महत्त्वपूर्णम्। वस्तुतः श्रीमद्भागवतो भक्तिप्रधानो ग्रन्थ। ग्रन्थस्यास्य मुख्यतो भगवान् कृष्णः प्रतिपाद्य। अत ससारप्रपञ्चपरित्यागपूर्वक तद्भक्तिमङ्गीकर्तु प्रेरणाप्रेरिता जना। प्रायश समस्तोपाख्यानानां कृष्णभक्तिरेव केन्द्रीभूत लक्ष्यम्। एषूपाख्यानेष्वेकतो नारदादिसिद्धमुनिभिर्भगवद्भक्तिरेव स्वसाधनाया अन्तिमफलत्वेन मन्यते पुनरपरतो ध्रुवप्रह्लादसन्निभैर्बालकै· सासारिकबन्धनविनिर्मुक्तैर्भगवद्भक्तिराश्रीयते। न केवलमेतावदेव, गजेन्द्रमोक्षादिमाध्यमै भगवत सहजकृपानिदर्शनपूर्वक साधितमिद यद् भगवान् जीवमात्र प्रति कृपालुरस्ति। स निश्छलस्नेह समवलोक्य श्रद्धालुं प्रति दयार्द्रभाव भजते। जले ग्राहेण निबद्धो गजो यदा आर्तस्वरेण भगवन्त स्मृतिपथ नीतवान् तदा भगवता सद्य एव स (गज) सङ्कटविनिर्मुक्तो विहित·। वृत्तान्तैरेभि. भगवन्त प्रति विश्वासं भक्तिञ्च कर्तु सन्देशोऽधिगम्यते।

एतदत्र नूनमवधेय यद् ग्रन्थस्यास्य केन्द्रीभूतवर्ण्यभगवत. श्रीकृष्णस्य विधेयभक्ति-माध्यमेन बहव उदात्ता भावा प्राणिमात्रकल्याणकरा उपदेशाश्च समेषां श्रीमद्भागवत-पाठकाना समक्षं दृष्टिपथ नीता।

भगवद्भक्त प्रह्लाद सहजदेवविरोधिन स्वपितरं यदुपदिशति तद् ग्रन्थस्यास्य मुख्याशत्वेन परिग्रहीतु युक्तम्। तदुक्तात्मशुद्धि प्राणिजात प्रति प्रीतिश्च कस्य न प्रियतां यात? प्रह्लादोक्त्या प्रकारान्तरेण सर्वजीवान् प्रति साम्यमूलकमाचरणमेव भगवत्पूजा-त्वेन व्यज्यते—

जह्यासुरं भावमिमं त्वमात्मनः
समं मनो धत्स्व न सन्ति विद्विषः।
ऋतेऽजितादात्मन उत्पथस्थितात्
तद्धि ह्यनन्तस्य महत् समर्हणम्।।

प्रह्लादकथनस्यायमेव सारो यत् तज्जनको हिरण्यकशिपु आसुरभावमपहाय सर्वान् प्राणिन. प्रति साम्यमूलक व्यवहार विदध्यात्। स्वमनसि साम्यभावं धारयेत् सर्वान् प्राणिनः प्रति। नूनमत्र 'मन एव मनुष्याणा कारण बन्धमोक्षयो.' इत्युक्तिं दृष्टिगता विधायैव मानसशुद्ध्यादिकं केन्द्रविषयीकृतम्। वस्तुतो मनसाऽखिलान् (जीवान्) प्रति साम्यभावधारणमेव भगवतो सर्वातिशायिनी पूजा।

श्रीमद्भागवते महर्षिदधीचिद्वारा लोककल्याणाय स्वशरीरास्थिप्रदानं नि·सन्दिग्ध-रूपेण परोपकारभावनाया पराकाष्ठा। तदस्थीनि प्राप्तु प्रार्थयमानान् देवान् उपदिशन् दधीचिर्वदति यद् य· खलु विनश्वरेण शरीरेण मुख्यतो धर्मस्य गौणतो यशसश्च सम्पादन न कुरुते, स खलु वृक्षादिसदृशपदार्थेभ्योऽपि निष्कृटतर । महाजनाना शाश्वत-धर्मपरिपालकानामयमेवोपदेश· शिरोधार्यतया विभाति यन्मनुष्य कस्यचिदपि प्राणिन सुखे सुख दुःखे दुःखञ्च अनुभवेत्—

योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान्।
ईहेत भूतदयया स शोच्यः स्थावरैरपि।।
एतावनव्ययो धर्मः पुण्यश्लोकैरुपासितः।
यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति।।

सन्दर्भेऽस्मिन् स्वविमातृद्वाराऽवमानितं ध्रुव तन्मातृकृत उपदेशोऽधस्तनश्लोक-गतो नूनमवधेयः—

मामङ्गलं तात परेषु मंस्था
भुङ्क्ते जनो यत्परदुःखदस्तत्।।

यद्यपि श्रीमद्भागवते श्रीकृष्णपराभक्तिरेव मुख्योपदेशविषयतां गत्वा तत्सन्देशतया प्रतिफलति, परन्तु पूर्वोक्ता विषयास्तथा कतिपयान्येऽपि विषया· प्रकारान्तरेण सन्देशप्रदत्व विन्दन्तीति दिक्।

●●

श्रीमद्भागवते शैशवचित्रणम्

सस्कृतवाङ्मयस्य पौराणिकसाहित्य नितान्तं विशालं व्यापकं महनीयञ्चास्ति। भारतीय-धर्म-दर्शन-भक्ति-सस्कृतीतिहासभूगोलप्रभृतीनां ज्ञानाय पौराणिकज्ञान नितरामपेक्षते। भारतीयजनजीवनोपरि पुराणानां निरतिशयप्रभावोऽस्ति। अष्टादशमहापुराणानां मध्ये श्रीमद्भागवतपुराणस्य महिमा ख्यातिङ्गतो विद्यते। श्रीमद्भागवते द्वादश स्कन्धा सन्ति। ग्रन्थस्यास्य दशमस्कन्धो महत्त्वपूर्णोऽस्ति। पुराणेऽस्मिन् काव्यगत सौन्दर्यमपि पराकाष्ठा गत वर्तते। दशमस्कन्धे भगवत कृष्णस्य प्रादुर्भाव, तस्य जन्ममहोत्सवस्तथा तस्य नानाविधा बाललीलाश्चातिचारुतया वर्णिता.। निबन्धेऽस्मिन् श्रीमद्भागवतगत वात्सल्यमयं शैशव वर्ण्यते। सर्वविदितमेतत्तथ्य यत् श्रीकृष्णस्य जन्म कारागारे एव जातम्। श्रीकृष्णप्रादुर्भावकाले समस्ता दिशाः प्रसन्नाश्च जाता। निर्मलाकाशे तारागणा प्रकाशमाना जाता.। समे ग्रामा, नगराणि च मङ्गलमयान्यभूवन्। नद्यो निर्मलत्व गता। वृक्षेषु पुष्पाणि विकसितानि। आनन्दकरः शीतलो मन्द· सुगन्धितश्च वायुर्वाति। भ्रमराः पक्षिणश्च मुखरिता जाता।

एतदवश्यमेवात्र ध्येय यत् प्रादुर्भावकाले सन्तो देवाश्च परमामोदमवाप्ता·। स्वर्गे देवानां दुन्दुभयो गुञ्जिता आसन्। किन्नरा गन्धर्वाश्च मङ्गलगीतगायनतत्परा अभूवन्। आनन्दितैर्देवैर्मुनिभिश्च महतोत्साहेन पुष्पवृष्टि· कृता। जलभरा मेघा. समुद्रपार्श्वे गत्वा शनै शनैर्गजन्ति स्म। बालकृष्णजन्मकाल· शुभगुणान्वित आसीत्। जन्मनक्षत्रादीना शुभत्वमासीत्—

अथ सर्वगुणोपेतः कालः परमशोभनः।
यर्ह्योवाजनजन्मर्क्षं शान्तर्क्षग्रहतारकम्॥

(भाग०, १०/३/१)

पुत्रजन्मावसरे पित्र्योरानन्दो नितान्तं सहजतां भजते। श्रीकृष्णपितुर्वसुदेवस्य हृदयमपि वात्सल्यस्नेहेन भरितन्तथाऽऽनन्दपूरितं जातम्। आनन्दभारभरितेन तेन महता हर्षेण दशसहस्रगवां दानं ब्राह्मणेभ्यो विहितम् (१०/३/९-१०)। दु.खावहमेतद् वृत्त यत् कंसभयान्नन्दस्य भावमयं वात्सल्यं नितरामाहतमभूत्। कारागारात् कथञ्चित्रिसृत्य तेन स्वयं स्वनवजातशिशुं नन्दगृहे प्रेष्य तस्थाने नन्दतनया समानीता कारागारे। ईदृश्या भयावहस्थित्यां तत्कालीनं तदीयं करुणवात्सल्यं भृशं व्यथितमभूत्। (१०/४)। कारागारे स्वसन्ततिं हन्तुं समागतं क्रूरकंसं प्रति देवक्या अधोलिखिता याचना कं न पीडयति?

तमाह भ्रातरं देवी कृपणा करुणं सती ।
स्नुषेयं तव कल्याणं स्त्रियं मा हन्तुमर्हसि ।।
नन्वहं ते ह्यवरजा दीना हतसुता प्रभो ।
दातुमर्हसि मन्दाया अङ्गेमां चरमां प्रजाम् ।।

(भाग०, १०/४/४-६)

देवक्या याचनायामस्यामत्यन्तहृदयद्रावकभावभरिता· सन्ति । तस्या वस्तुत स्वसन्ततिरक्षणाय कारुण्यपूणाऽह्वानसंलक्ष्यते । सम्प्रति नन्दगृहे जायमान पुत्रोत्सवो दृष्टिविषय करणीय । पुत्ररत्नप्राप्तिमवगत्य नन्दस्य सदयहृदय विलक्षणानन्देन परिपूरित जातम् । असीमानन्देन तस्य हृदय परिप्लावित जातम् । तदवसरे वस्त्रालङ्कार-सहितमेकलक्ष्यपरिमित दान विप्रेभ्य सम्पादितम् (१०/५/३) । तदाऽऽनन्दघटिकाया ब्राह्मणसूतमागधादिकृतेन मङ्गलमयाशीर्वादेन स्तुतिगानेन च तदानीन्तोऽवसरोऽसीमा-नन्दसवलितोऽभूत् (१०/५/५) । पुत्रजन्मकाले न केवल यशोदानन्दौ परमप्रसन्नता यातौ, अपि तु समस्तं व्रजमण्डलं परमानन्दोल्लसितमभवत् । मानवै सह देवा पशुपक्षिणश्च सर्वे महती प्रीतिमवापु । अवतारस्वरूपबालककृष्णस्य जन्मप्रभावेण नन्दगृहे रिद्धिसिद्धय स्थान गृहीतवत्य· । नन्दसदनं लक्ष्मीक्रीडास्थलमिव सम्बभूव (१०/५/१८) ।

कुलपुरोहितेन गर्गाचार्येण रोहिण्या पुत्रस्य नामचतुष्टयं कृतम्—रौहिणेय राम , बल· सङ्कर्षणश्चेति । यशोदाया बालतनयस्य च 'कृष्णवर्णत्त्वात्'-'कृष्ण' इति नाम कृतम् । (भाग०, १०/८/१३-१४) ।

वास्तविकरूपेण वसुदेवपुत्रत्वात् कृष्णस्य 'वासुदेवेति' नाम विहितम् । प्रसङ्गेऽस्मिन् तस्येयमधोलिखितोक्तिर्विचारणीया—

तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ।
श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः ।।

(भाग०, १०/८/१९)

अर्थात् 'हे नन्द ! गुणेन, सम्पत्या, कीर्त्या प्रभावेण च त्वदीयोऽयं पुत्रो भगवान् नारायण इव विद्यते । कुलपुरोहितमुखादानन्दमयी वाणी श्रुत्वा नन्दस्य आनन्द पराकाष्ठा यातः । उक्तं च तेन मदीया सकलाशा. पूरिता – 'अतोऽहं कृतकृत्योऽस्मि' ।

अनन्तर ग्रन्थकारेण कृष्णबलरामयोरनन्ता लीला वर्णिताः । इयं खलु सार्वत्रिकी स्थितिर्बालकाना विद्यते यत्ते समवयस्कान् सहयोगिनो बालान् प्राप्य महता समारम्भेण नैकविधबालचेष्टाक्रियादिषु प्रवृत्ता भवन्ति । कृष्णबलरामसयोगेन एषैव स्थितिर्जाता विद्यते ।

श्रीमद्भागवतदशमस्कन्धस्य अष्टमाध्याये बालकृष्णबलरामयोरुभयोरपि बालक्रीडाया विशद हृदयावर्जक मनोहरञ्च स्वरूप वर्णित राजते। तच्च खलु बोधव्यम्—

कालेन व्रजताल्पेन गोकुले रामकेशवौ।
जानुभ्यां सह पाणिभ्या रिङ्गमाणौ विजह्रतुः।।
तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ
घोषप्रघोषरुचिरं व्रजकर्दमेषु।
तन्नादहृष्टमनसावनुसृत्य लोकं
मुग्धप्रभीतवदुपेयतुरन्ति मात्रोः।।

(भाग०, १०/८/२१-२२)

स्वल्पवयस्का शिशव शैशवावस्थाया यथा खेलन्ति, चलन्ति हसन्ति—अपरिचितजनाननुसरन्ति, वास्तविकी स्थिति विज्ञाय पलायन्ते स्वमातृक्रोडं पतन्ति, स्वपाद-बद्धाभूषणानां मधुरध्वनि श्रुत्वा परमां प्रीति 'प्राप्नुवन्ति चैतत्सर्व बालकरामकृष्णावपि सम्पादयत। नूनमिद बालक्रीडाप्रकाशकवर्णन तयोर्बालकयोर्यथार्थ बाल्यक्रीडाविषयकं विम्बग्राहि चित्र समुपस्थापयति पाठकचेतासि समाह्लादयति च।

पित्रोर्विशेषतो जनन्या हृदये शिशव. वात्सल्यमयं स्नेह स्वस्य रूपेण वचसा कर्मणा च जनयन्ति। रोहिणीयशोदा चापि दुग्धं पिबन्त, दुग्धपानकाले स्वस्वतुच्छ-दन्तपूरितं मुख दर्शयन्त स्वस्वबालक राम कृष्णञ्च समवलोक्याप्रतिममानन्द विन्दत। स्वशिशुदर्शनस्पर्शनकाले पशुपक्षिणामपि जननीना हृदयं वात्सल्यस्नेहसिक्तं जायते तर्हि जन्मदात्रीना मानवमातृणा वात्सल्यस्नेहातिशयस्य का कथा? रोहिणी यशोदा च स्वस्वशिशुचेष्टा क्रियादिकञ्च विलोक्य निरतिशय स्नेहसिक्ते जायेते। भावभरितत्त्वात् तयो स्तनेभ्य· दुग्धधारा प्रवहति। कर्दमलिप्तशरीरौ रामकृष्णौ यदा परावर्तेते तदा तच्छरीरे परमा शोभां धारयत.। भावसवलिते तयोर्मातरौ स्वक्रोडे निधाय निजबालकौ दुग्ध पाययत। यदा स्तनपानं कुर्वन्तौ तौ (रामकृष्णौ) स्वमातृमुख पश्यतस्तदा तयोर्मन्दमन्दस्मितं लघुदन्तकलिकाश्च समवलोक्य ते आनन्दसागरे निमज्जत—

तन्मातरौ निजसुतौ घृणया स्नुवन्त्यौ
पङ्काङ्गरागरुचिरावुपगुह्य दोर्भ्याम्।
दत्त्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य
मुग्धस्मिताल्पदशनं ययतुः प्रमोदम्।।

(भाग०, १०/८/२३)

उक्तसन्दर्भा बालस्वभावस्य तत्स्वरूपस्य तल्लीलानाञ्च नितान्त भव्यमुदाहरण-

मिति न विज्ञापयितु युक्तम्। तेषु सन्दर्भेषु वात्सल्यभावस्य पराकाष्ठा गत स्वरूपमपि समापतति समक्षं समेषाम्।

क्रमशो वर्धमानानां बालाना वयोऽनुसारन्तेषा लीला अपि वर्धन्ते। ते (बाला) पशूना पुच्छादिक प्रगृह्य समानन्दन्ति। व्रजमण्डलेऽपि रामकृष्णावपि बाललीला कुरुत। याभिस्तत्रत्या गोपिका अपि परममुदिता जायन्ते (१०-८-२४)।

कृष्णरामौ (कृष्णबलरामौ) उभावपि चञ्चलौ क्रीडासक्तौ चास्ताम्। तौ क्वचिद् शृङ्गधरमृगादिपशूननुसरतो गोपिकाना समक्षम्। क्वचिच्च जाज्वल्यमानेन अग्निना सह क्रीडितु धावत। कदाचित् कुक्कुरपार्श्व यात। क्वचित् गर्तसमीप यात। क्वचिच्च मयूरादिपक्षिणौ गच्छत। एतादृशानि तयो. कृत्यानि विलोक्य तद् वारयितुमिच्छन्त्यावपि जनन्यौ नैराश्य व्रजत। अपराणि कर्माणि विहाय ते बालयोरेव रक्षणभारं वहत (१०-८-२५)।

नूनमत्र शैशवजीवनस्यानन्दकरं बिम्बं बिम्बितम्। यद्यपि बालद्वयस्य समस्तबालक्रीडाभिरखिलं गोपिकाजगत् परमानन्दं भजते। एकदा तु ताः परमप्रीतिभरा नन्दगृहं गत्वा यशोदाम्प्रति कृष्णबाललीलामवर्णयन्—

वत्सान् मुञ्चन् क्वचिदसमये क्रोशसञ्जातहासः
स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः।
मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भाण्डं भिन्नति
द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य तोकान्।।
हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यै-
श्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वित्।
ध्वान्तागारे धृतमणिगणं स्वाङ्गमर्थप्रदीपं
काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः।।

(भाग०, १०/८/२९-३०)

उक्तविवरणेन चपलबालकृष्णस्य चापल्यसंवलिता भूयस्यः क्रियाः वर्णिताः। कदाचित् कृष्ण· दुग्धदोहनकाल विनाऽपि वत्सान् मोचयति, भर्त्सित. सन् विहसति। कदाचित् विविधैश्चौर्योपायैर्दधिदुग्धजातं चोरयित्वा स्वयं खादति वानरेभ्यो वितरति च। चौर्यप्रवीण स. दधिदुग्धादिपात्राणि त्रोटयति। तस्य चाञ्चल्यस्यैषा स्थिति· यत् स स्वमित्राणां कन्धमारुह्य शिक्यभाण्डगतं पदार्थ गृह्णीते। तस्य चौर्यप्रावीण्यमनेनैवानुमातु शक्यते यत् स गृहे निक्षिप्तं गुप्तातिगुप्तानि वस्तूनि जानीते। स स्वचातुर्येणास्माक-

मनुपस्थित्या सर्वाणि कार्याणि सम्पादयति।

निश्चितमेव गोपिकावर्ण्यमानान्यखिलानि कार्याणि चपलबालकृष्णानुकूलानि सहजानि च विद्यन्ते। वर्णनेनानेन बालकृष्णस्यैक स्वरूपबोधक चित्र दृष्टिविषयतां याति सर्वान् मोदयति च।

दशमस्कन्धस्य नवमदशमाध्याययोर्बालकृष्णस्यालौकिकचेष्टानामपि विशदतया वर्णन जातम्, येनावताररूपकृष्णस्य स्वरूप याथार्थ्य याति। एतादृशेषु कृत्येषु कृष्णस्या-लौकिकरूपेण साक तदीय बालचापल्यमौद्धत्यमलौकिकस्वरूपज्ञानायासेन प्रकाश्यन्ते। प्रसङ्गेस्वेषु समुद्घाटित कृष्णचित्र सामान्यत सम्पूर्णस्य चापल्यमात्रस्य बालजगतोऽप्रतिम स्वरूपं समुद्घाट्यते।

बालेष्वेतादृशो खेलानुरागो विद्यते यत्ते क्रीडासमये नितरा क्रीडासक्ता जायन्ते। तदा तैस्तदितराणि वस्तूनि तूपेक्ष्यन्ते—एव मातापित्रावपि समुपेक्ष्यमाणौक्रियेते। एकदा कृष्णबलरामौ ग्वालबालै सह क्रीडुत्तौ यमुनातटगतौ। रोहिण्या वारवारमाकारितावपि तौ यदा नायातौ तदा तत्र तया (रोहिण्या) यशोदा प्रेषिता। तदा यशोदाया स्तनेभ्यो वात्सल्याधिक्याद् पय प्रवहति स्म। तदानी यशोदाया अधोलिखितानि वचनानि नितान्त भावमयानि सन्ति—

कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब।
अलं विहारैः क्षुत्क्षान्तः क्रीडाश्रान्तोऽसि पुत्रक।।

(भाग०, १०/११/१५)

वात्सल्यभावभरिताया यशोदाया सदय हृदय वात्सल्यभावाप्लावित जातम्। सा चराचरजगतो भगवन्त श्रीकृष्ण स्वपुत्रत्वेन मन्यते स्म। एकेन हस्तेन कृष्ण पुनरपरेण बलरामं गृहीत्वा तया तौ गृहमानीतौ। तदनन्तरं स्वपुत्रमाङ्गल्यायापेक्षितानि कृत्यानि विहितानि च। (भाग०, १०/११/२०)

बालानां स्थित्या न केवल पितरावपि तु ताभ्यां सह सर्वे सुखमनुभवन्ति। तदानी बालकृष्णबलरामावित्थ जनप्रियत्व यातौ येन नन्ददम्पत्या सार्क अन्येऽपि पुरवासिन सदा तयोरेव कृष्णबलरामयोरेव) चर्चां कुर्वाणास्तिष्ठन्ति स्म—

इति नन्दादयो गोपाः कृष्णरामकथां मुदा।
कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम्।।

(भाग०, १०/११/५८)

बाला प्राय स्वजीवन खेलनकूर्दनैरेव यापयन्ति। कदाचित्ते स्वसहचरै सह

निलायनक्रीडा क्रीडन्ति, कदाचित् सेतुबन्धन कुर्वन्ति, कदाचिद् वानरा इव नृत्यन्ति, कदाचिच्च विचित्राणि खेलनानि कुर्वन्ति। रामश्यामावपि निजमित्रै सार्ध सदा खेलन-तत्परावेव स्वबाल्यजीवन कृतार्थयत —

एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे।
निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः।।

(भाग०, १०/१२/५९)

कृष्णस्य एकमभिधान गोपालेति वर्तते। गोपालनव्रतधारणत्वादेव स 'गोपाल' इति कथ्यते। तदीय बाल्यजीवन गोपालनव्रतपालन एव याति। गोसेवाप्रसङ्गेऽपि तदीया बालक्रीडा मनोहारिण्यस्तथा नितान्तमानन्ददायिन्य. सन्ति। गोसेवासम्बन्ध एका ग्वालबालमण्डली निर्मिताऽऽसीत्। समस्तग्वालबाला एव तस्या सदस्या बभूवु। ग्वालबालमण्डल्या· कृष्ण एव प्रधानो जात·। यदा ते सर्वे बुभुक्षिता पीडिता जातास्तदा तैरेकत्रैव स्थित्वा भोजनं कर्त्तु निर्णीतम्। (भाग०, १०/१३/६)

निर्णीयेदं गोचारणरता· सर्वे बाला वत्सान् जलं पाययित्वा हरितघासक्षेत्रेषु अमुञ्चन्। स्वस्वशिक्यानि मुक्त्वा भोक्तुं समुद्यता आसन्। तत्रस्था सर्वे कृष्णोन्मुखा एव आसन्। तदानीन्तना मण्डलीस्थाना बालानां शोभा पराभूमि गता—

अत्र भोक्तव्यमस्माभिर्दिवा रूढं क्षुधार्दिताः।
वत्साः समीपेऽपः पीत्वा चरन्तु शनकैस्तृणम्।।
तथेति पाययित्वार्भा वत्सानारुध्य शाद्वले।
मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा।।

(भाग०, १०/१३/६-७)

बालमण्डलीगतं मनोहर चित्रमिदमाधुनिककालेऽपि क्रीडाक्षेत्रेषु गोचरभूमौ वा स्थितानां बालमण्डलीनां चित्र बिम्बयति। भोजनकाले तेषां समेषां बालानां पात्राणां वैविध्यं नूनं समाह्लादयतिस्म। (भाग०, १०/१३/९)

बालाना स्वभाव एव यत्ते सर्वदैव मनोविनोदपरा भवन्ति। तत्र केचिद् हसन्ति केचिच्च हासयन्ति। एतादृश्येव दशा भोजनकर्मपराया: बालमण्डल्या जायमाना राजते। बालकृष्णो बलरामसहित यदा सन्ध्याकाले स्वगृहमागच्छति स्म तदा मातृणां वात्सल्यस्नेह परममहनीयतां व्रजति। नन्दस्य तु क्रोध एव दूरं गत स परममोदान्वितो जात। वात्सल्यमयचित्राणि तदानीन्तनानि चारुतया चित्रितानि। तेषां चित्रमेकमत्र प्रस्तूयते—

तदीक्षणोत्प्रेमरसाप्लुताशया
जातानुरागा गतमन्यवोऽर्भकान्।

उदुह्य दोर्भिः परिरभ्य मूर्धनि
घ्राणैरवापुः परमां मुदं ते ।।
ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः ।
कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ।।

(भाग०, १०/१३/३३-३४)

अनन्ता. सन्ति बालकृष्णस्य लीला । ता अद्भुता प्रभावभरिताश्च वर्तन्ते, तासा लीलाना सम्बन्धो न केवल मानवलोकेनाऽपि तु समस्त चराचरजगद् अपि सम्बद्ध ताभि । अखिला गोपा· (गोपिकाश्च) तल्लीलाना क्रीतदासा । स (कृष्णः) स्वमातृ-पित्रोर्विमलस्नेहभाजनम् । पशुपक्षिणोऽपि तदनुरागिण । गवान्तु कथैव निरुपमा, कृष्णात्तासा पृथक्करणे ता मूल्यहीना इव जायन्ते । गोचरण खलु कृष्णबालजीवनस्याभिन्नमङ्गमस्ति । अस्मिन् सन्दर्भे वृन्दावनगत तन्मधुरलीलासम्बद्ध चित्रमिदं नून दर्शनीयम्—

क्वचिच्च कलहंसानामनुकूजति कूजितम् ।
अभिनृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित् ।।

(भाग०, १०/१५/११)

गोचारणसमये यदा गावो दूरङ्गता भवन्ति तदा कृष्णस्तन्नामग्रहणद्वारोच्चैः स्वरै. तदाह्वानं विधत्ते । तन्मधुरध्वनि श्रुत्वा गोभि. सह सकलग्वालबाला प्रेमविह्वला जाता सन्ति । (भाग०, १०/१५/१२)

श्रीकृष्णबाललीलाया विशेषतेय स्मृतिपथं याति यत् तल्लीलायां चकोरक्रौञ्च-प्रभृतय पक्षिणोऽपि स्थानमवापु । (तत्रैव, १०/१५/१३)

नृत्यकर्मणि बालाना सहजप्रवृतिर्जायते । कृष्णश्यामावपि ग्वालबालै. साकं नृत्यानन्दं लभमानौ राजेते—

नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः ।
गृहीतहस्तौ गोपालान् हसन्तौ प्रशशंसतुः ।।

(तत्रैव, १०/१५/१५)

कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ।
वेणुपाणितलैः शृङ्गैः प्रशशंसुरथापरे ।।

(तत्रैव, १०/१८/१०)

दशमस्कन्धस्याष्टादशेऽध्याये शैशवचित्रण चरमभूमिं गत सर्वान् सहृदय-जनान् आनन्दसागरे निमज्जितानिव विधत्ते । तत्र बालक्रीडानामेकं सजीवं, मनोहरं भव्यं

च बिम्बं बिम्बितम्भवति। अधोलिखितेषु श्लोकेषु कृष्णबलरामयोर्बालक्रीडा निरतिशयभव्यरूपेण वर्ण्यतामवाता विद्यते—

क्वचिद् बिल्वैः क्वचित् कुम्भैः क्व चामलकमुष्टिभिः ।
अस्पृश्यनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया ।।
क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ।
कदाचित् स्पन्दोलिकया कर्हिचिन्नृपचेष्टया ।।
एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ।
नद्यद्रिद्रोणिकुञ्जेषु काननेषु सरस्सु च ।।

(भाग०, १०/१८/१४,१५,१६)

अत्रेद ज्ञेय यत् कृष्णबलरामयोश्चित्रिताया क्रीडायामस्या बालानुरूपा सहजता सजीवता चास्ति। तद्दर्शनेन ग्रामीणबालानां बाललीलाबिम्ब नेत्रयो समक्ष बिम्बितमिव जायते। श्रीमद्भागवते उपर्युक्तानि चित्राणि विहायान्यान्यपि शैशवलीलासम्बद्धानि चारुचित्राणि चित्रितानि राजन्ते। चित्राणामेषां वैशिष्ट्यमिद नून दृष्टिपथमानेय यत् शैशवचित्रणप्रसङ्गे देवकीवसुदेवयोर्यशोदानन्दयोश्च वात्सल्यप्रेम्णो यादृशं व्यञ्जन जात तादृशमन्यत्र दुर्लभम्। तत्र सयोगवात्सल्येन साक करुणवात्सल्यस्यापि चित्रण निरतिशय भव्यमस्ति। श्रीमद्भागवतगतवात्सल्यानुशीलनेनेद वक्तुमिद युक्त यद् रसाना मध्ये वात्सल्यस्य रसत्वेन प्रतिष्ठा न्यायैव।

निस्सन्देह श्रीमद्भागवतस्य शैशवचित्रणं सर्वातिशायि विद्यते। अखिले संस्कृतसाहित्ये क्वचिदपि तादृश शैशवचित्रण नोपलभ्यते। बाललीलाकृते तु श्रीमद्भागवत विरलमेव। सौभाग्यमेवेदमस्माक यत् श्रीमद्भागवतद्वारा सस्थापिता शैशवचित्रणपरम्परा तत्परवतिसंस्कृतसाहित्ये तथा तदनन्तर हिन्दीव्रजभाषाद्याधुनिकभाषासाहित्येष्वपि गतिशीला विद्यते। बाल्यजीवनस्य सफलचित्रकारसूरदाससस्तुलसीदासश्च प्रमाणत्वेन गृह्येतामिति दिक्।

●●

देवीभागवते विश्वमङ्गलभावना

विशाले भारतीयवाङ्मये पुराणानि नितान्त महनीयानि सन्ति। भारतीयधर्म-सस्कृतीतिहासभूगोलप्रभृतीना सम्यग् बोधाय पुराणानामनुशीलनमत्यावश्यकं विद्यते। भारतीयज्ञानविज्ञानधर्मदर्शनादीना मूलस्रोतोरूपेण विराजमानाना वेदाना यथार्थरहस्यं बोद्धु पुराणानि विशेषतोऽपेक्षितानि सन्ति। 'इतिहासपुराणाभ्या वेद समुपबृहयेत्' तथा 'वेदा प्रतिष्ठिता सर्वे पुराणे नात्र सशय' इत्याद्युक्तयस्तथ्यमिदं पोषयितु राजन्ते। महापुराणाना संख्याऽऽष्टादश वर्तते। तेषु भागवतपुराणमपि परिगण्यते। भागवतेति नाम्ना पुराणद्वयमुपलभ्यते—श्रीमद्भागवत देवीभागवतञ्च। भागवतेति शब्देनोभयो कस्य पुराणस्य बोध· क्रियेत? इति प्रश्नं समाधातुं विद्वासो मतभेदाक्रान्ता सन्ति। कतिपयविद्वांस पुराणगणनाया प्रयुक्तभागवतेति शब्दस्य निरनुबन्धतयोरुभयोरपि (श्रीमद्भागवत-देवीभागवतयोरपि) महापुराणत्वेन गणना क्रियते पुनरपरे पण्डिता. श्रीमद्भागवतं महापुराणं तथा देवीभागवतमुपपुराणं मन्यन्ते।

देवीभागवतपुराणे द्वादशस्कन्धा. सन्ति। ये ३१८ संख्याकेष्वध्यायेषु विभक्ता सन्ति। पुराणेऽस्मिन् प्राधान्येन शक्तिरूपाया देव्या महात्म्यमुपवर्णितम्। पुराणस्यास्य मतानुसार देवी विश्वव्यापिनी वर्तते तथा तदीयं सामर्थ्यमसीमितमस्ति। समस्तमिदं जगत् देवीमय विद्यते तदतिरिक्तमपर किमपि वस्त्वविनश्वर नास्ति—

सर्वं खल्विदमाहं नान्यदस्ति सनातनम्। (दे० भा० १/१५/५२)

पुराणानुसारं देव्या ब्रह्मणश्च मध्ये न कोऽपि भेद। उभयोरैकरूप्यमस्ति। ये खलु उभयोर्भेददर्शनं कुर्वन्ति तत्र तेषां बुद्धिभ्रम एव कारणम्—

सदेकत्वं न भेदोऽस्ति सर्वदैव ममास्य च।
योऽसौ साहमहं यासौ भेदोऽस्ति मतिविभ्रमात्॥

(दे० भा० ३/६/२)

देव्या ईदृग् विश्वव्यापकताकारणात् समस्ते देवीभागवते यत्र तत्रेदृक्तथ्याना-मुद्घाटनं जातं येषु विश्वमाङ्गल्यभावना प्राकाश्यं याति। विशालेऽस्मिन् संसारेऽ-खिलानर्थानां मूले मन कालुष्यमेव विराजते। तद्वशादेव नानाविधधार्मिकविवादरूपा-नर्था भवन्ति, ये खलु सर्वहितघातका: सन्ति। अतो जनकल्याणं कामयमानानां जनानां कर्त्तव्यमिदमापतति यत् सर्वप्रथमं तै: स्वस्वचित्तानां शुचिता विधेया। यतो हि जातायां मन:शुद्धौ च सर्वं शुद्धं जायते—

प्रथमं मनसः शुद्धिः कर्त्तव्या पथ्यमिच्छता ।
शुद्धे मनसि द्रव्यस्य शुद्धिर्भवति नान्यथा ।।

(दे० भा० ४/८/३७)

चित्ते शुद्धे च पवित्राचरणशुद्धि सुगमा भवति। इत्थं येषा मनास्याचरणानि पावनानि सञ्जायन्ते तेषामेव तीर्थयात्रादिक धर्मकार्य साफल्य भजन्त इत्यत्र नास्ति सन्देहलेशः—

तथैवाचारशुद्धिः स्यात्ततस्तीर्थं प्रसिद्ध्यति । (दे० भा० ४/८/३८)

एतस्माद्विपरीतं येषा मानसानि कालुष्यभावभरितानि सन्ति ते तथैव परिशुद्धिं न यान्ति यथा कटुनिम्बफलानि परिपक्वान्यपि माधुर्य न श्रयन्ते—

यथेन्द्रवारुणं पक्वं मिष्टं नैवोपजायते ।
भावदुष्टस्तथा तीर्थे कोटिस्नातो न शुद्ध्यति ।।

(दे० भा० ४/८/३६)

देवीभागवते मन शुद्धिरूपस्य यस्य वस्तुनो माहात्म्यमुपवर्णित तत्तु नितान्त-मुपयोगित्व प्राणिमात्रकल्याणकरत्वञ्च व्रजति। साम्प्रतिके ससारे मानवा 'मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत्' इत्युक्ति कृतार्थयन्ति। मन शुद्धिमन्तरा ते न तथा कुर्वन्ति यथा मनसि चिन्तयन्ति। इदमेव कारणं यत् चित्तशुद्धिमन्तरा कृतान्यखिलानि कार्याणि नाभीष्टफलप्रदानि जायन्ते। सर्वजनकल्याणाय चित्तशुद्धिरूपोपायो निरतिशय प्रशस्य सड्ग्रहणीयश्च।

महत्त्वमापन्ने खलु देवीभागवते सर्वजनहिताय भूतानुकम्पा (प्राणिदया) विधेयत्वेन चर्चिता। तत्रोक्तं यन्मानवै प्राणिषु दयाभावं धारयेत् तथा परोपकाराय तत्पराश्च स्युः। धारिते च दयाभावे परोपकारभावे च तत्कार्यसिद्धिरवश्यमेव सकुरा स्यात्—

भूतानुकम्पनं चैव कर्त्तव्यं कर्मणा धिया । (दे० भा० ४/८/३९)

चित्तशुद्ध्या सहाचारशुद्धे. तथा परोपकारभावस्य विश्वकल्याणाय महत्या-वश्यकता। निस्सन्देहमाचारशुद्धौ परोपकारभावे च पारस्परिकी माङ्गलिकभावना राजते। वस्तुत. संसारे व्यावहारिकजीवने आचारस्य महत्त्वपूर्णं स्थानम्। अत एवाचार परमधर्मत्वेन निर्दिश्यते सर्वजनकल्याणपरैर्बुधै·। सन्दर्भेऽस्मिन् उक्तिरप्येषा स्मृतिपथमायाति यत् ये खल्वाचारहीना सन्ति तान् वेदा अपि पावयितु न क्षमा —

'आचारहीनं न पुनन्ति वेदाः'।

'वृत्ततस्तु हतो हत·' इति बहुमूल्ये वचनेऽप्याचारस्यैव प्रतिष्ठा दृश्यते। नून-

मन्त्रावधेय यन्मन शुद्धेराचारस्य परोपकारभावना स्वत एव प्रतिष्ठां याति या विश्वकल्याणाय नितान्तमावश्यकी ।

न स धर्मो योऽन्यधर्म पीडयति । वस्तुत. महान् धर्म स एव येन परक्लेशो न जायेत । अत एव देवीभागवते परपीडनरूपाधर्मात् विरतये निर्देशो विहित —

धर्मज्ञा न प्रकुर्वन्ति व्रतभङ्गं परस्य वै ।। (दे० भा० ४/१७/१०)

साधारणत समस्ते लोके मातृभूमि सर्वोपरि स्थाने प्रतिष्ठाप्य जना· पूजयन्ति । जननी जन्मभूमिश्चेत्यादिवचनानि तथ्यमिदमेव परिपुष्टि नयन्ति । परन्तु देवीभागवते मानवमात्रस्य व्यापकहितबुद्ध्या समुद्घोषितम्, यत् चेन्मनुष्यो जन्मभूम्यापि सुखशान्तिं न प्राप्नोति तथा रक्षितो न भवति तदा जन्मभूमिरपि न हितकरी । यदि विदेशेष्वपि स सुखादिक लभते तर्हि सोऽपि (विदेशोऽपि) तत्कृते पैतृकदेश (जन्मभूमि·)—

सुखेन स्थीयते यत्र स देशः खलु पैतृकः ।। (दे० भा० ४/२४/२२)

वचनेनानेन न जन्मभूम्या पितृभूम्या वाऽवहेलनापि तु मानवकल्याणायैव—उक्तिरियम् ।

परस्परवैरभाव सकलप्राणिनां कृते विनाशावह । विश्वकल्याण परस्परमैत्रीभाव एव प्रतिष्ठितम् । देवीभागवते स खलु सुगम सहजश्च घोषितः । देवीभागवतानुसार सप्तपदात्मकेन सहगमनेन सवादेन च मैत्रीभावस्य सम्भवः—

मैत्री सप्तपदी मता ।। (दे० भा० ५/३२/४८)

मैत्रीभावस्य सहजता सरलता ख्यापनेन लक्ष्यमिदमेव प्रतिभाति यदखिलैः जनै. मैत्रीभावोऽङ्गीकरणीय ।

लोभोऽखिलपापकारणत्वेन मन्यते लोके—'लोभः पापस्य कारणम् ।' देवी-भागवते लोभस्य लुब्धस्य च निन्दां विधाय तयो· परिवर्जनाय निर्देशः कृत शोभते । लोभवशात्नर· स्वमातृपितृभ्रातृगुरुसम्बन्धिभि· साक पूज्यविदुषोऽपि द्वेषभावेन पश्यति । लोभाभिभूतो मानव. कि कि न पाप कुर्यादिति भाव मनसि निधायैव पापबुद्धयो जना अविश्वसनीया इत्युक्तं देवीभागवते—

भ्रातरं पितरं मित्रं सुहृदं बान्धवस्तथा ।
गुरुं पूज्यं द्विजं द्वेष्टि लोभाविष्टः सदा नरः ।।
(दे० भा० ५/३२/१७)

पापबुद्धिषु विश्वासो न कर्त्तव्यः कदाचन ।
किन्न ते वै प्रकुर्वन्ति ये लोभवशगा नराः ।।
(दे० भा० ५/३२/१६)

नि.सशय लोभलुब्धभर्त्सनाया तयोर्वर्जनाया च जनमङ्गलभावना लोकमङ्गलभावना चैव राजेते। सशयापन्ने मनसि मनुष्य कथमपि शान्ति न विन्दति। सशयालुर्मनुष्यश्च कथमपि सुख न लभते। गीतानुसार—'सशयात्मा विनश्यति', ब्रजत्यशान्तश्च सुखाद्दूरम्— 'अशान्तस्य कुत सुखम्'।

देवीभागवते सृष्टिप्रक्रियाजिज्ञासासन्दर्भे नारदो ब्रवीति ब्रह्माण यत् सन्देहग्रस्त चित्तं तीर्थेषु, मन्दिरेषु (पूजागृहेषु) तदितरस्थानेषु च कथमपि शान्ति नाधिगच्छति—

सन्देहान्दोलितं चेतो न प्रशाम्यति कुत्रचित्।
न तीर्थेषु न देवेषु साधनेष्वितरेषु च।।

नारदोक्त्याऽनया भावोऽय व्यज्यते यच्छान्तिसुखप्राप्तये सन्देहनिवृत्ति परमावश्यकी। उक्तिरियं तेभ्यो जनेभ्य उपदेशरूपाऽस्ति, ये स्वय सन्देहग्रस्ता सन्त बाह्याडम्बरेष्वेव विश्वसन्ति। पारस्परिकद्वेषेर्ष्याग्रस्ता च ससारेऽशान्ति जनयन्ति। महाजना. पीडितासहायभयभीतजनाना रक्षणमेव धर्मत्वेन मानयन्ति। तमेव मानवतावादभावितं शाश्वतं धर्मं दृष्टिगत विधाय देवीभागवतेऽयोध्याराजवंशस्य महाराज्ञो मन्त्री मुनिवरं भरद्वाजं वदति यत् पीडितशरणागतयो रक्षणेन यज्ञादप्यधिक पुण्यं मन्यते। विशेषतो भयाक्रान्तस्यानाथस्य च रक्षण समेषा मानवानां कर्त्तव्यम्। निश्चयमेव देवीभागवततयाऽनयोक्त्या यस्य कस्यापि धर्मावलम्बिनः सम्प्रदायानुसारिणश्च रक्षणं विधेयमस्ति। ससारे ये खलु दु खभाजो भयभीताश्च सन्ति तेषा समेषां रक्षणायाह्वान जातम्। प्रसङ्गस्यास्य महनीयतत्त्वमिदमस्ति यत् दीनहीनाना रक्षणे महापुण्यमङ्गीकृतम्। देवीभागवतोक्तेयं भावना नि सन्दिग्धरूपेण विश्वमङ्गलविधायिनी। सन्दर्भेऽस्मिन् देवीभागवतस्याय श्लोक· अवश्यमेव ध्येयो यस्मिन्नङ्किता विश्वमङ्गलभावना पराकाष्ठां गता भ्राजते—

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं भियो धिया।
मनश्च भद्रं भजतामधोक्षजे
आवेश्यतां नो मतिरप्यहेतुकी।।

(दे० भा० ८/९/३)

भक्तप्रह्लाद. कामयते यत् समस्तविश्वस्य कल्याणं भवेत्, दुष्टबुद्धिषु पावनी भावना जागृयात्। सर्वे जना· पारस्परिकहितचिन्तन विदध्युः, अस्मन्मन· सन्मार्गे प्रवृत्तं स्यात्तथाऽस्माकं बुद्धिर्निष्कामभावे संसक्ता भवेत्। नूनं विश्वमङ्गलभावनाभावतेयं प्रह्लाददृष्टिः सर्वलोकमाङ्गल्यविधानाभिलाषपरा चेत् समेषां बुद्धिषु सद्भावना आदुर्भवेत्, समे जनाः पारस्परिकहितचिन्तनपराः कार्यं कुर्युः, समेषां चेतांसि सन्मार्गप्रवृत्तानि स्युः, समेषा

बुद्धय ईश्वरससक्ता तिष्ठेयु , तर्हि समस्ते भवे विश्वकल्याणभावना चाकारता यायात् ।

वस्तुतो देवीभागवते देवी भगवती सनातनशक्तिरूपेण मान्यास्ति । सा शक्तिमता परमात्मना साकमभेदरूपेण निगमागमेषु प्रतिपाद्या वर्तते । ईदृशी सर्वव्यापिनी शक्ति केन्द्रबिन्दुत्वेन निर्धार्य देवीभागवत ईदृशानि तथ्यानि विचारपथमानीतानि यान्यखिलविश्वमाङ्गल्यविधानसमर्थान्युपयोगीनि च सन्ति । देवीभागवतस्याध्ययनायाथवा श्रवणाय समयादिबन्धन न विहितमस्ति । तदध्येतार श्रोतारश्चापि नियमविधानबद्धा न कृता । देवीभागवते तत्कथा श्रोतु कस्यचित्मासस्य दिनस्य वा नियमविशेषो नास्ति । यतो हि तत्पुराण सर्वदा श्रवणीय सेव्यञ्चास्ति—

मासानां नियमो नात्र दिनानां नियमोऽपि न ।
सदा सेव्यं सदा सेव्यं देवीभागवतं नरैः ।।

(दे० भा०, माहात्म्ये श्लो० ३०)

देवीभागवतस्य वैशिष्ट्यमेकमत्रावश्यमेवोल्लेख्य यद् यद्यपि तस्मिन् सनातनी सर्वशक्तिमती च देवी मुख्यप्रतिपाद्यरूपेण प्रतिष्ठिता, अतस्तस्मिन् तस्या एव प्राधान्यम् । तथापि तामाश्रित्यापि या सर्वकल्याणपराश्च यस्मिन् कस्मिन् प्रसङ्गे, येन केनापि जनेन स्फुटता नीतास्तत्र तत्र पुराणस्यास्य सर्वमङ्गलमूलकोद्देश्यमेव व्यञ्जितमस्ति । समासत कथनेऽस्मिन् नास्ति काचिदतिशयोक्तिर्यद् देवीभागवतस्य सर्वजनकण्ठहारभूतस्याधस्तनश्लोकस्य भाव· पदे पदेऽभिव्यज्यते—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

●●

कालिदासीयकाव्येषु राष्ट्रियचेतना

महाकविकालिदासो न केवल सस्कृतसाहित्यस्य महान् कविरस्ति, अपि तु स विश्वसाहित्यस्य महाकविरूपेण परिगण्यते लोके। सोऽधुना विश्वकविरूपेण प्रतिष्ठा लभमानो भारतीयकीर्तिध्वजमुत्तोलयति। संस्कृतसाहित्यस्यान्यकवीना रचनाक्षेत्र, कलाक्षेत्र, भावक्षेत्रं च सीमितमस्ति परन्तु कालिदास सर्वेषु क्षेत्रेषु पराकाष्ठा गतो राजते। रघुवंशकुमारसम्भवे विरचय्य स महाकाव्यक्षेत्रे, अभिज्ञानशाकुन्तल, मालविकाग्निमित्र विक्रमोर्वशीय च रचयित्वा नाट्यक्षेत्रे मेघदूतमृतुसंहारञ्च निर्माय खण्डकाव्यक्षेत्रे (गीतिकाव्यक्षेत्रे) सर्वान् अपरान् कवीन् अतिशेते। तथ्यमिद तद्विरचितकाव्यानुशीलनेन ज्ञातुमतिसुकरम्।

कालिदासस्य काव्यकला स्वहृदयावर्जकरूपेण सर्वान् सहृदयजनान् विमोहयति। नूनं तत्काव्येषु रसपरिपाक , भावाभिव्यञ्जना, अलङ्कारयोजना, प्रकृतिचित्रण, चरित्रचित्रण, च पराभूमि गत्वा सरसजनचित्तेषु तं प्रति (कालिदासम्प्रति) अनुपमामेकां भावभूमिं सृजन्ति। परिणामत सचेतसां जगदपरान् सर्वान् कवीन् कदाचित् विस्मर्तुमपि शक्नुयात्, परन्तु तत् (सहृदयजगत्) कालिदास स्वस्मृतिपथाद् दूरीकर्त्तु न पारयति। परन्तु सन्दर्भेऽस्मिन् न विस्मर्त्तव्य तथ्यमेतद् यत् कालिदास एतादृशो महाकविरस्ति यस्य काव्येषु भारतीय समाज , भारतीया सस्कृति., भारतीयं स्वरूपं, भारतीया चेतना (राष्ट्रिया चेतना) च सम्यक् रूपेण प्रतिबिम्बिता यान्ति। अस्माकं समग्रं राष्ट्र प्रत्येकदृष्ट्या चित्रितं कालिदासकाव्येषु। सामाजिकदृष्ट्या, सांस्कृतिकदृष्ट्या, भौगोलिकदृष्ट्या च राष्ट्रमस्माकं बिम्बितं कालिदासीयकाव्येषु। यदि कश्चिद् भारतस्य वास्तविक स्वरूपं द्रष्टु वाञ्छति स नून कालिदासीयकाव्य पठेत्।

कालिदासस्य वाणी राष्ट्रियभावनया संवलिताऽस्ति। तस्य हृदय एकतो राष्ट्रियमहापुरुषान् राष्ट्रिया संस्कृति, राष्ट्रियां भावनां, तदेकतामखण्डता च प्रति प्रगाढोऽनुराग· पुनरपरतो भारतीयं वनमुपवनं सरिता पर्वतान् भूमि पशुपक्षीन् च प्रत्यपि तदीयं गम्भीर प्रेम प्रकाश्यते।

अभिज्ञानशाकुन्तलस्य प्रथमेऽङ्के नान्द्यां तेन भगवतः शङ्करस्य यासामष्टमूर्तीना समुल्लेखः कृतस्ता अष्टमूर्तयः सन्ति—सूर्यः, चन्द्र·, यजमानः, पृथ्वी, जलम्, अग्नि., वायु· तथा आकाशः —

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।

यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ।।

(अ० शा० १/१)

शिवस्य प्रत्यक्षाभिरष्टमूर्तिभि कवि सर्वजनकल्याण कामयते। अस्मिन् मङ्गलात्मके श्लोके राष्ट्रस्याखण्डता, एकता च दरीदृश्येते। एतासा सर्वाषा प्रत्यक्षमूर्तीना प्रतिष्ठा सम्पूर्णे राष्ट्रे विद्यते। उक्तमूर्तिसम्बद्धाना तीर्थाना सोमनाथचन्द्रनाथपशुपतिनाथादीना स्थिति समस्ते भारते विद्यते। शिवमूर्तिस्वरूपाणा पञ्चमहाभूताना क्षितिजलपावकादीनां सूचिकाना मूर्तीना स्थिति दक्षिणभारते विद्यते।

कुमारसम्भवस्य षष्ठसर्गस्य षड्विंशतितमे श्लोके सप्तर्षीन् प्रति भगवत शङ्करस्य उक्तावपि—अष्टाभिर्मूर्तिभिर्न केवल राष्ट्रमङ्गलभावना अपि तु विश्वमङ्गलभावना परिलक्ष्यते स कथयति—

विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः।
ननु मूर्तिभिरष्टाभिरित्थं भूतोऽस्मि सूचितः ।।(कु०स० ६/२५)

त्यागमन्तरा किमपि राष्ट्र स्वाम्युत्थानं विधातु न प्रभवति इति तथ्य जानता कालिदासेन स्वीयकाव्येषु त्यागस्य महिमा गीत । तत्काव्ये चित्रिता राजान. त्यागमूर्तय सन्ति। तेषा सिद्धान्तोऽस्ति यन् मेघो जलवर्षणायैव समुद्रादिभ्यो जल गृह्णाति तथैव सज्जनामादानं त्यागायैव एव भवति—

आदानं हि निसर्गाय सतां वारिमुचामिव ।(१-६)

तत्काव्ये रघुवशीया राजानः दानाय (कल्याणाय) एव प्रजाभ्य· करग्रहण सत्याय मितभाषण, यशसे विजयकामनां तथा सन्तानाय गार्हस्थ्यजीवनं कामयमाना आसन्—

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।

(रघु० १/७)

कस्यचिदपि राष्ट्रस्य जीवने तत्समुन्नयने च राज्ञां (शासकानाम्) नितरा महत्त्व भवति। राष्ट्रियविकासे राज्ञा महद्योगदानं निर्विवादम्। 'यथा राजा तथा प्रजा'—उक्तिरियं निस्सन्देह युक्तत्वं याति। तथ्यमिदमवगत्यैव महाकविकालिदास. स्वीयकाव्येष्वनेकत्र राज्ञाम् (शासकानाम्) उदात्त स्वरूपं समुद्घाटितं येन सिद्धमिदं भवति यत्कालिदासमते तादृशा राजानोऽभिप्रेताः समाजस्य कृते, ये खलु स्वप्रजापालनद्वारा समग्रं राष्ट्रमुन्नतिपथं नेतुं प्रभवन्ति। रघुवंशीयाः सर्वे राजान· प्रजापालनपरा सन्तः स्वीयकर्त्तव्यं परिपालयन्ति।

अन्यै सह तेऽपि जानन्ति यत् प्रजानामर्थाद् राष्ट्रियजनानामुन्नतावेव राष्ट्रस्योन्नतिर्निहिता। अत्रापराणि कतिचिदुदाहरणान्युद्धहरणीयानि सन्ति।

अभिज्ञानशाकुन्तलस्य पञ्चमेऽङ्के प्रथमो वैतालिको राज्ञो दुष्यन्तस्य स्वरूप वर्णनधिया कथयति यत्स (दुष्यन्त) स्वसुखे निरभिलाष सन् लोकाराधनाय तथैव कष्ट सहते, यथा वृक्ष स्वयं कष्ट सोढ्वा स्वाश्रितान् जनान् सुखयति—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्।।

(शा० ५/७)

अद्यतने काले शासकाना रक्षणाय नैकोपाया विधीयन्ते, परन्तु कालिदासकाव्य-गता राजान. स्वरक्षार्थं नापेक्षन्तेऽन्यसाहाय्यं, यतो हि ते स्वरक्षाविधाने स्वयमेव सामर्थ्य व्रजन्ति। रघुवशस्य द्वितीयसर्गेऽध प्रकारेण विहितेन दिलीपवर्णनेनेदमेव तत्त्व समुद्घाट्यते—

व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः।।

(रघु० २/४)

राजसम्बद्धानेकप्रसङ्गा विलसन्तितरा कालिदासकाव्येषु यैस्तदीया राष्ट्रियभावना समेषा समक्ष समापतति सहजत ।

अभिज्ञानशाकुन्तलस्य भरतवाक्ये भव्या राष्ट्रचेतनारूपा भावना प्रकटिता। चेद् राष्ट्रे राजानोऽर्थात् शासका लोककल्याणाय कार्यं कुर्यु , कवीना काव्यं सर्वत्र समाहित भवेत् तथा भगवान् शङ्कर· सर्वान् मुक्तिभाजः विदध्यु तदा नूनमेव राष्ट्रकल्याणं स्यात्—

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः।।

(शाकु० ७/३५)

कालिदासो जानाति यत् व्यष्टिसमष्ट्योर्मध्ये घनिष्ठः सम्बन्ध.। व्यष्टि· समष्टेरेव अङ्गम्। अतः समाजोन्नतौ व्यष्टेरपि उन्नतिर्निहिता। उन्नत्यै पारस्परिकः सहयोग· वाञ्छित· ।

वसिष्ठद्वारा सम्पादितेन यज्ञेन सम्यक् वर्षण भवति—इत्थ समाजस्य राष्ट्रस्य वा कल्याण जायते—

हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम् ।।

(रघु० १/६२)

कालिदासीयराजनैतिकमानचित्रे अखण्डं भारतं प्रतिष्ठितम् । अखण्डभारतस्य परिकल्पनया स नितरामनुप्राणित । रघुदुष्यन्तपुष्पमित्रादीना दिग्विजयवर्णनेन स स्वकल्पना मूर्तिमती करोति ।

एतदवश्यमेव दृष्टिपथ नेय तथ्यं यत् कालिदासप्रणीतकाव्येष्वखण्डभारतस्य कल्पना नितान्तमुदात्तभावमनुप्राप्ता सति सर्वान् सहृदयान् प्रभावमण्डितान् विधत्ते । तत्काव्येषु नरेशा प्रजापालनपरा राष्ट्रस्य निर्माण एव दत्तचित्ता परिदृश्यन्ते । कस्यचिदपि राष्ट्रस्य निर्माण केवल भवनराजमार्गादिनिर्माणेनैव कर्तु न शक्यते । यावद् राष्ट्रस्य प्रजावर्ग· राजशासनेन सन्तुष्ट· शान्त. प्रसन्नश्च न भवेत्, तावद् राष्ट्रनिर्माणमशक्यमेव । एतद्बुदद्धवै रघुवशीयाश्चन्द्रवशीया नरेन्द्रा वा प्रजासेवामेव राष्ट्रसेवा मत्त्वाऽखिलानि कार्याणि विदधति । अखण्डिता पृथिवी शासितु (पालयितु) त उद्यता दृष्टिगोचरता यान्ति । अधस्तनेनोदाहरणेन कथ्यमिद प्रमाणयितु शक्यते—

कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ।।

(रघु० १५/१)

रघुवंशस्य द्वितीये सर्गे दिलीपम्प्रति सिहस्य कथनेऽस्मिन् प्रजापालन (प्रजारक्षणं) मुख्यतया राजधर्मत्वेन विभाति—

भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमति त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ।।

रघुवंशीयनरेशा इव चन्द्रवशीयपृथिवीपाला अपि सन्दर्भेऽस्मिन् स्मरणीया । विक्रमोर्वशीये त्रोटके (नाटके) तन्नायको पुरूरवा ब्रूते—

सामन्तमौलिमणिरञ्जितपादपीठं एकातपत्रमवनेर्न तथा प्रभुत्वम् ।
अस्याः सखे ! चरणयोरहमद्य कान्तं आज्ञाकरत्वमधिगम्य यथा कृतार्थः ।।

(विक्र० ३/१९)

कालिदासकाव्येषु न केवलं शासका कोविदा जना एव राष्ट्रियचेतनाभरा

सन्ति। वीतरागमहर्षयोऽपि राष्ट्रियभावभाविता परिलक्ष्यन्ते। शाकुन्तलगतस्य मारीचस्याश कथन दुष्यन्तम्प्रति नूनमेव विचरणीयं यस्मिन् व्यापिनी राष्ट्रिया चेतना प्रकाश्यते—

रथेनानुद्घातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदयनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्।।

(शा० ७/३३)

किमपि राष्ट्र प्रजासौख्यशान्तिमन्तरा स्वपदवी धारयितु समर्थ न भवति। कालिदासकाव्येषु प्रतिबिम्बित विरुपद्रव प्रजासौख्य राष्ट्रस्य विमल स्वरूप प्रख्यापयति—

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद् ब्रह्मवर्चसम्।।

(रघु० १/६३)

अभिज्ञानशाकुन्तलस्य भरतवाक्यमिव विक्रमोर्वशीयमिदं भरतवाक्य नून द्रष्टव्य यस्मिन् सर्वमाङ्गल्यावप्राप्तिरूपा राष्ट्रिया भावना प्रकाश नीता—

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्।।

(विक्र० ५/२४)

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु।।

(विक्र० ५/२५)

अर्थात् लक्ष्मी सरस्वती च सदा परस्पर वैमुख्य भजेते तथा तयोर्सामुख्य नितान्तं कठिनं परन्तु ते उभे प्रार्थ्येते यत् ते सज्जनकल्याणाय सान्निध्यमवाप्नुयाताम्। समेषां जनानां विपत्तयो दूर व्रजन्तु। सर्वे भद्राणि पश्यन्तु (सर्वे कल्याणयुता भवेयु)। सर्वे स्वाभिष्टान् पदार्थान् प्राप्नुवन्तु तथा सर्वे सर्वत्रानन्दमनुभवन्तु।

भरतवाक्येऽस्मिन् लक्ष्मीसरस्वत्यो सामुख्यकामनाया अयमेवाभिप्रायो यत् लक्ष्मीवन्तो विद्वास. विद्वासो लक्ष्मीवन्तश्च भवेयु। प्रायेण ससारेऽस्मिन् ये खलु लक्ष्मीभाजो न ते सरस्वतीभाज तथा ये सरस्वतीभाजो न ते लक्ष्मीभाज.। अनयोक्त्या इदमेवाभिप्रेत सर्वे लक्ष्म्या· सरस्वत्याश्च कृपाभाजननत्वं विन्दन्तु। भरतवाक्येषु कालिदासीयेऽभिव्यक्ता सर्वमाङ्गल्यपरा भावना नून हृद्या। अस्मन्मते सा (उक्ता भावना) तदीयराष्ट्रियभावनाया

पराकाष्ठा गतमुदस्त रूपम्।

कुमारसम्भवस्य प्रथमसर्गे कालिदासकृतहिमालयवर्णन भारतस्य भूगोल साक्षादिव कर्त्तु प्रभवति—येनैकं भव्य भारतचित्र मानसपटले चित्रित जायते—

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधावगाह्यः स्थितः पृथिव्या इव मानदण्डः।।

(कु० स० १/१)

एवमेव रघुवशस्य त्रयोदशसर्गे सीतालक्ष्मणादिभि साक पुष्पकविमानेन लङ्काया अयोध्या यावत् कृता श्रीरामयात्रा भारतराष्ट्रस्य बृहत्कायिका स्थिति दृष्टिपथं नयति। सा रामयात्रा अखण्डभारतस्यैक्यसूचिका। विमानेन लङ्काया अयोध्या यावत्कृताया तस्या यात्राया गोदावरी, पञ्चवटी, अगस्त्यशातकर्णि-सुतीक्ष्ण-शरभङ्गप्रभृतिमहर्षीणामाश्रमसम्बद्धीनि वर्णनानि जातानि। तदनन्तर चित्रकूटस्य प्रयागराजस्य च भव्य चित्र नेत्रविषयीकृतभाति। यात्राप्रसङ्गे निषादपते निवासभूत शृङ्गवेरपुरमपि नेत्रपथमानीतम्। यात्राप्रसङ्ग एवायोध्याराजपद व्रतमिव धारयतो भरतस्य पदाते रामं सत्कर्त्तु भारताभिधानराष्ट्रस्यैकताभव्य-तादिनिष्ठस्वरूपस्य परिचायकम्।

यात्राप्रसङ्गे पावनसलिलायाः सरय्व्वा रामकृतमधस्तन वर्णन तदीय राष्ट्रप्रेमैव (जन्मभूमिप्रेमैव) प्रकटयति —

सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता। (रघु० १३/६३)

सर्वाषु कालिदासीयकाव्यकृतिषु या सामाजिकी, सांस्कृतिकी, भौगोलिकी, राजनीतिकी, धार्मिकी दशा प्रतिबिम्बिता राजते तया तत्तद् विषयसम्बद्धानि भूयासि चित्राणि मानसे प्रतिबिम्बितानि भवन्ति।

वस्तुत कालिदासीयकाव्येषु समग्रमिद भारतराष्ट्रं स्वविविधरूपेण दृश्यता व्रजति। सन्तन्येऽपि महाकवयो भारते, परन्तु भारतस्याखिल विविधविषयकं रूप यथा कालिदासकाव्येषु बिम्बितं, न तथान्यकाव्येषु। नून कविरयं स्वयं भारतीयराष्ट्रियचेतनाभावितोऽतः तत्काव्यान्यपि तेनैव तद्भावभावितानि विहितानि। निस्सन्देहं कालिदासो युगयुगान्तं यावत् स्वयश·कायेन ससम्मानं स्थास्यति लोक इति शम्।

●●

माघे सन्ति त्रयो गुणाः

महाकविमाघ प्राचीनकालादेव सस्कृतमहाकाव्यगगनस्यैक देदीप्यमाननक्षत्रमिव भासतेतराम्। स (माघ) सस्कृतकाव्यजगतोऽलङ्कृतमार्गस्य मूर्धन्य कवि । महाकविभारविणा संस्थापितालङ्कृतमार्गस्तेन पराकाष्ठा नीत । माघेनैकमेव महाकाव्य विरचितन्तदस्ति 'शिशुपालवधम्'। विशतिसर्गात्मके शिशुपालवधे १६५० श्लोका सन्ति। सङ्क्षिप्तमपि महाभारतीय कथानक गृहीत्वा माघेन तद् विविधवस्तुवर्णनविस्तारेण विशालाकारतां नीतम्। शिशुपालवधमाश्रित्य विरचितस्य तस्य 'शिशुपालवधमिति नाम सार्थक्यं याति। महाकविमाघप्रणीतशिशुपालवधनामा ग्रन्थो माघेति नाम्नाऽपि संस्कृतसाहित्यजगति ख्याति यातः—'मेघे माघे गत वय', 'काव्येषु माघ कविकालिदास' इत्युक्तानि वचनानि तत्प्रमाणयन्ति। अलङ्कारमार्गस्य मूर्धन्यकविरूपेण माघेन स्वीये महाकाव्ये नैकविषया वर्णिता । वर्ण्यविषयबाहुल्येनैव महाकाव्यमिद दीर्घाकारत्वङ्गतम्।

महाकवेरस्य जीवनविषये विस्तरशो न किमपि ज्ञायते। केवलमेतावदेव विज्ञायते यत्तत्पितुर्नाम दत्तक·, पितामहस्य च नाम सुप्रभदेव आसीत्। महाकविमाघस्य शैशव यौवन प्रौढत्वञ्चेति सर्व सुखपूर्वक व्यतीतम्। तदीय पितामह. (सुप्रभदेव) धर्मनाभनामकस्य धर्मलाताभिधानस्य वा भूपालस्य राजकविरासीत्।

एतत्त्वत्र ध्येय यन्माघे नानाविधशास्त्रज्ञानस्यापूर्वो राशिर्विलसतितराम्। अप्रतिमपाण्डित्यमण्डिते तस्मिन्नप्रतिमा काव्यप्रतिभाऽपि लक्ष्यतेतराम्। शिशुपालवधानुशीलनेन प्रकाशतां यातीद तथ्य यत्तस्मिन् (शिशुपालवधे) यादृशं काव्यचातुर्य, कल्पनावैभवं, वस्तुवर्णनकौशल वस्तुसौन्दर्य भव्यमलङ्कारविधानञ्चावाप्यते तन्नून रमणीयमस्ति। शृङ्गाररसचित्रचित्रणगतन्तु तदीयं नैपुण्यं सर्वातिशायि। प्रकृतिवर्णनगतं प्रागल्भमपि माघस्य नि संशयमाश्चर्यकरमस्ति। प्रकृतिगतानि नानाविधान्यलङ्कृतचित्राणि सम्पूर्णे महाकाव्ये विलसन्तितराम्। तदीय रैवतकपर्वतवर्णनं सर्वथा हृद्यम्। तत्कृतं प्रभातवर्णनन्तु समस्ते काव्यजगति काव्यभावकानां नितरां प्रशस्तिभाजनत्वङ्गतं शोभते। तद्गतमाहात्म्यन्त्वनेनैवाधिगन्तुं शक्यते यत् स्वविशदालङ्कृतप्रभातवर्णनान्माघो 'घण्टापथमाघेत्यभिधानेनाप्यभिधीयते काव्यस्वरूपविश्लेषणपरैरालोचकैः। नूनमेतद् वैशिष्ट्यं माघस्य तद्यशो विस्तारयति सस्कृतकाव्यलोके।

माघस्य सर्वाश्चर्यकर पाण्डित्यं खल्वपरान् सर्वान् कवीन् सुतरामतिशेत इति

नास्त्यत्र मनागपि सन्देहलेश । माघे वेदवेदाङ्गदर्शनपुराणेतिहासराजनीतिसङ्गीतकाम-शास्त्रपशुविद्याप्रभृतीना ज्ञानराशि सुष्ठुरूपेण विभ्राजन्तेतराम्। यादृश कल्पनावैभवं माघे विद्यते न तादृशमन्यत्र । ईदृशापरिमितगुणवैशिष्ट्यादेव महाकविमाघ काव्यतत्त्वविदामालोचकानां भूरिशश्चर्चाविषयता यात इति सर्वे काव्यतत्त्वानुशीलनपरा पण्डिता जानन्ति । एतस्मिन् विषयेऽधोऽङ्कित सस्कृतकाव्यजगति ख्यातमाघविषयकप्रशस्तिजात नून ध्येयम्—

१ मुरारिपदचिन्ता चेत्तदा माघे रति कुरु ।
२ मेघे माघे गत वय ।
३ माघे सन्ति त्रयो गुणा ।
४ नवसर्गगते माघे नवशब्दो न विद्यते ।
५ माघो माघ इवाशेष क्षम कम्पयितु जगत् ।
श्लेषामोदभर चापि सम्भावयितुमीश्वर ।
६ कविताकुन्दविकासनकृतिने विजितजनतानिदाघाय ।
दलितोद्दामाघाय प्रणति कलयामि माघाय ॥
७ माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।
स्मरन्तो भारवेरेव कवय कपयो यथा ॥
८ तावद्भा भारवेर्भाति यावन्माघस्य नोदय ।
उदिते च पुनर्माघे भारवेर्भा रवेरिव ॥
९ कृत्स्नप्रबोधकृद् वाणी भारवेरिव भारवे ।
माघेन च माघेन कम्प कस्य च जायते ॥

आभि प्रशस्तिपराभिरुक्तिभिर्माघोऽभिवन्दित सस्कृतालोचनासंसारे। उक्तय सर्वा यथार्था वाऽतिशयोक्तिमूला इति विषयेऽपि भावकै स्वस्वमतानुसार विचारशीला समवलोक्यन्ते । अत्र विश्वख्याताऽद्यस्तनोक्तिर्विचारपथ नेया—

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

उक्तावस्या चतुर्णा कवीना कालिदासभारविदण्डिमाघाना प्रशस्तिर्विभ्राजते । तथ्यमेतद् ध्येयमत्र यत् कवित्रितय (कालिदास , भारवि , दण्डी च) क्रमशो विमलो-पमाप्रयोगकृते, विशिष्टार्थगौरवकृते, कमनीयपदलालित्यकृते च प्रशस्तिभाजनत्वङ्गत जायन्ते । चतुर्णा कवीना मध्येऽस्ति माघ एतादृशो यो गुणत्रयकृते (उपमार्थगौरव-पदलालित्यरूपगुणत्रयकृते) शंसित काव्यमर्मज्ञै । सम्प्रति 'माघे सन्ति त्रयो गुणा' इत्युक्तिविवेचनमपेक्ष्यते । उपमाऽर्थगौरवपदलालित्याना त्रयाणामपि मध्ये प्रथम माघ-स्योपमागतवैशिष्ट्यं विवेच्यते ।

उपमेति नामकोऽर्थालङ्कार आसृष्टे काव्यजगति प्रयुज्यमानोऽस्ति। नास्तीदृश कोऽपि कविर्यस्य काव्य उपमाचारुत्व न दृश्यते। परन्तु समेषामुपमागत चारुत्व न समम्। सम्प्रति शिशुपालवधगतमुपमाप्रयोगचारुत्व दर्शनीयम्।

शिशुपालवधस्य प्रथमे सर्गे धस्तनेश्लोके पीताम्बरधरो पूर्णेन्दुसुन्दरमुख श्रीकृष्णो वाडवा-नलज्वालाऽभिव्याप्त पयोनिधिरिव शोभां धत्ते। अयम्भावोऽस्य श्लोकस्य यद् 'यथा नीलजलराशिर्विशालसमुद्रो वाडवाग्निज्वालाभिरभिव्याप्तो नितान्तं शोभा धारयते तथैव तप्तस्वर्णकान्तिसदृश पीताम्बर धारयन् नीलकान्तिः श्रीकृष्णोऽपि सौन्दर्यमाश्रयते। अत्र श्रीकृष्ण उपमेय, अम्भोनिधिरुपमानः, इवेति वचाकशब्द, वाडवाग्निज्वालासन्निभवस्त्रधारणादिकं साधारणधर्म। चतुर्भिरुपमाङ्गैश्चित्रितं इदमौपम्यचित्र निरतिशयं चारु—

स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।
विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः।।

(शिशु १/२०)

तत्रैव सर्गे चोऽपमालङ्कारमण्डित वर्ण्यमानं नारदरूपमपि दर्शनपथ नेयम्। श्रीकृष्णगृहमागच्छन्तमाकाशान्नारद समाश्रित्य कवि कथयति—

पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति।
सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम्।।

(तदेव, १/६)

श्लोकेऽस्मिन् पिशङ्गमौञ्जीमेखलाधरस्योपमेयभूतस्य नारदस्योपमा स्वर्णमय-मेखलाधारिणोऽपमानभूतेन बलरामेण कृता नितान्तमौचित्यं चारुत्वञ्च भजमाना सती सरसजनचेतासि नितरा रमयति।

माघेन स्वीये शिशुपालवधमहाकाव्ये निजौपम्यविधाने चराचरप्रकृतेरप्युपमानत्वेन सफलप्रयोगो विहित। एकं चारु चित्रं द्रष्टव्यम्—

अध्यासामासुरुतुङ्गहेमपीठानि यान्यमी।
तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा।। (तदेव, २/५)

मन्त्रणाव्यापाररतानां स्वर्णमयोच्चसिंहासनस्थानामुद्धवबलरामश्रीकृष्णानामवस्थानं दृष्टिगतं विधायौपम्यविधानकुशलो महाकविर्वर्णयति यत् विभूतित्रयाश्रितस्य सिंहासनस्य तथैव शोभा जायते, यथा शिखरे सिंहाश्रितस्य त्रिकूटमहीधरस्य सुषमा दृश्यविषयता याति। अत्रोपमेयभूतस्य सिंहासनस्योऽपमानभूतेन त्रिकूटशिखरेण चित्रितोपमा वर्ण्यविषयस्य बिम्बं ग्राध्यति।

युधिष्ठिरयज्ञे विभिन्नदेशेभ्य आगता विशालकाया राजान समवेता सन्ति। सामाजिकौपचारिकतां निर्वहन्तस्ते परस्पर मिलन्ति। एतद् दृश्य दृष्टिगतं विधाय कविरौपम्यविधानेन समलङ्करोति तद्वर्ण्यविषयम्—

सममेत्य तुल्यमहसः शिलाघनान् घनपक्षदीर्घतरबाहुशालिनः।
परिशिश्लिषुः क्षितिपतीन्क्षितीश्वराः कुलिशात्परेण गिरयो गिरीनिव।।

(शिशु०, १३/१५)

उद्धवबलरामश्रीकृष्णाश्रितस्योपमेयभूतस्य सिहासनस्य तुलना सिहत्रयाश्रितेन त्रिकूटपर्वतशिखरेण नितान्त काव्यसौन्दर्यमावहति।

शिशुपालवधे यत्र कुत्रचित् पौराणिकमाख्यानमाश्रित्यापि माघेन निजौपम्य-विधान समलङ्कृतम्। अधस्तनमुदाहरणमेतदथ समवलोकनीय यस्मिन् पौराणिको-पाख्यानगतो विषय केन्द्रीभूतत्वेनौपम्यविधानगत विद्यते—

व्याप्तं लोकैर्दुःखलभ्यापसारं संरम्भित्वादेत्य धीरो महीपः।
सेनामध्यं गाहते वारणः स्म ब्रह्मैव प्रागादिदेवोदरान्तः।।

(शिशु० १८/४०)

श्लोकस्यास्यायमर्थः—

कश्चित् क्रुद्धो हस्ती युद्धभूमौ समुपस्थितसेनाया मध्ये तथैवेतस्ततो भ्रमति यथा मार्कण्डेयप्रभृतयोर्मुनयः श्रीकृष्णस्योदरमवाप्य कर्त्तव्यशून्या भूत्वेतस्ततो भ्रमन्ति।

अत्रोपमेयभूतस्य क्रुद्धगजस्योपमा विष्णुभगवदुदरस्थैर्मुनिभिर्विहिता चारुत्व विस्तारयति।

महाकविर्माघः कालिदास इव स्वप्राकृतिकवर्णनप्रसङ्गेऽचेतनप्राणिना प्रकृति-गतानामौपम्यं चेतनप्राणिभि सह विधत्ते। एतत्सम्बन्धिसुचारुचित्रमेकं द्रष्टव्यमत्र—

अरुणजलजराजीमुग्धहस्ताग्रपादा बहुलमधुपमालाकज्जलेन्दीवराक्षी।
अनुपतति विरावैः पत्रिणां व्याहरन्ती रजनिमचिरजाता पूर्वसन्ध्या सुतेव।।

(तदेव, ११/४०)

अत्र रात्रिमनुसरन्त्या सन्ध्याया औपम्यं नवजातबालिकया सह विहितं सातिशय चारुत्वं धरते।

शिशुपालवधे क्वचिदमूर्त्तपदार्थानामुपमाऽमूर्त्तपदार्थै कृता परिलक्ष्यतेतराम्। एतत्सम्बद्धं चित्रमेकमत्र विचारपथं नेयम्—

नालम्बते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ।।

(तदेव, २/८६)

श्लोकस्यास्य अयमभिप्राय —यथा कोऽपि विज्ञो मनुष्य एकान्ततया नाश्रयते दैष्टिकता (भाग्यम्) न वा पौरुषम्। स तथैव द्वयम् (भाग्य पुरुषार्थञ्च) अवलम्बते यथा सत्कविरुभौ शब्दार्थौ समाश्रयते। अर्थात् यथा सुकवि स्वकाव्यरचनाविधाने शब्दमर्थञ्च गृह्णीते तथैव पण्डितोऽपि भाग्य पुरुषार्थञ्च समाश्रयति।

अत्रामूर्तरूपयोर्भाग्यपुरुषार्थयोरुपमाऽमूर्तरूपाभ्या शब्दार्थाभ्या कृता हृदय चमत्करोति।

महाकविमाघस्यौपम्यविधाने शास्त्रीयसिद्धान्ता अपि स्थानमवाप्ता दृश्यन्ते। एतत्सम्बन्धिचित्रमेकं द्रष्टव्यम्—

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ।।

(तदेव, २/५९)

अस्मिन् श्लोके श्रीकृष्णस्यौपम्य साङ्ख्यदर्शनस्य पुरुषेण कृत महाकविमाघस्य शास्त्रीयपाण्डित्य विज्ञापयति।

सम्प्रति काव्यलोकविश्रुतस्यैकस्यौपम्यविधानस्य विचारविषयीकरणमावश्यकम्। यतो ह्यनेनैवौपम्यविधानेन महाकविर्घण्टापथमाघेत्युपाधिना विभूषितश्चिरकालात् सहृदयचित्तचञ्चरीक मोदयन् विभ्राजते—

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ।।

(तदेव, ४/२०)

अत्र प्रात काले रैवतकपर्वतसमीपमुदीयमान सूर्यमस्ताचल व्रजन्त चन्द्रमस विलोक्य कविर्वर्णयति यदय रैवतकपर्वतस्तस्य गजस्य शोभा धरते यमुभयतो घण्टाद्वय विलम्बते। अत्र रैवतकवर्णनप्रसङ्गे कविना पर्वतमुभयतो वर्तमानौ सूर्यचन्द्रमसौ गजस्योभयपार्श्वयोर्विलम्बमानेन घण्टाद्वयेनोपमितौ। नितरां हृद्यमेतच्चित्र नून चेतोहरम्।

माघेन शिशुपालवध उपमाप्रयोगे प्रकृतौ मानवत्वारोपोऽपि विहित । एतादृशस्थलेषु तदीयमौपम्यविधान नितान्त हृद्यता भव्यताञ्चाधिगच्छति। एकमन्य सौन्दर्यावहञ्चित्रितञ्चित्रमवश्यमेव दृश्यम्—

विद्वद्भिरागमपरैर्विवृतं कथञ्चि-
च्छुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः ।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं
गूढार्थमेष निधिमन्त्रगणं बिभर्ति ।।

(तदेव, ४/३७)

पुरोदृश्यमानोऽय रैवतकभूधर श्रेष्ठब्राह्मणेन समो विविधविद्याविभूषितेन समं गूढार्थमन्त्रसमूहमिव निधि धारयति ।

अत्र नैकरत्नानिधारयतो रैवतकपर्वतस्योपमा नानाविद्यालङ्कृतब्राह्मणेन विहिता सती महाकविमाघस्यौपम्यविधानदाक्ष्य प्रकटयति ।

इतराण्यपि चारुचित्राण्यौपम्यगतानि शिशुपालवधे विद्यमानानि विभान्ति यत्र तत्र । यैर्माघस्य तद्गतं महत्त्वावीण्यं परिलक्ष्यते । नि सन्दिग्धरूपेण माघीयौपम्यविधानस्य क्षेत्र गम्भीरमुदात्त भव्यञ्चास्ते ।

माघकाव्ये शिशुपालवधेऽर्थगौरवस्यापि चारुच्छटा नयनगोचरताङ्गता मनासि मोदितानि विद्यत्ते । समस्ते माघकाव्ये नैकसूक्तयोऽर्थगौरवावहा दृश्यन्ते । तासु शाश्वतिकतथ्यानां समावेशश्चेतासि प्रभावयति समाह्लादयति च । एतादृशस्थलेष्वर्थगौरवम्प्रतिपादयितुमर्थान्तरन्याससाहाय्यं नितरा चारु विद्यते—

अधोलिखितेन श्लोकेन माघस्यार्थगौरवम्प्रति नितान्तोदात्तधारणा प्रकाश्यते—

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ।
अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ।।

(तदेव, २/७३)

प्रथमसर्गस्याधोऽङ्किते श्लोकार्धे जन्मजन्मान्तरगतस्य स्वभावस्य (प्रकृतेः) स्वरूपं वर्णितम् । दार्शनिकजन्मान्तरसिद्धान्तानुसारं प्राणिन (मानवस्य) स्वभावो जन्मान्तरेष्वपि त तथैवानुगच्छति यथा सती पतिव्रता नारी जन्मान्तरेऽपि स्वपतिं प्राप्नोति—

सतीव योषित्प्रकृतिः सुनिश्चिला पुमांसमभ्येति भवान्तरेष्वपि ।।

अस्मिन् श्लोके दर्पोद्धत्यादिपूर्णस्य शिशुपालस्य जन्मान्तरीया प्राणिपीडाकर स्वभावोऽतिगम्भीरतयोपवर्णित. ।

शिशुपालवधस्य प्रथमे सर्गेऽधस्तने पद्येऽर्थगौरवस्य भव्या छटा सर्वान् भावभरितान् कुरुते—

प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोऽतिरागाद्दशमं चिकर्तिषुः ।
अतर्कयद्विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः ।।

(तदेव, १/४९)

अत्र मुनिनारदो रावणस्योद्धत्य वर्णयन् कथयति यत् 'त्रैलोक्यस्वामित्वमवाप्तु-कामेन रावणेन स्वाराध्यशिव प्रसादयितु श्रद्धातिशयेन स्वदशमशिरश्छेदनोत्सुकतया शिववरदानरूपप्रसादो विघ्नसन्निभो बुद्ध ।

अस्मिन् श्लोके रावणसाहसस्य तदीयशिवभक्तेश्च नितान्तमर्थपूर्ण वर्णनम्। श्लोकोऽय नितान्तमर्थगौरव धारयते।

मानवस्य स्वाभिमान एव तज्जीवन गौरवपूर्ण विधातु सामर्थ्यमेति। स्वाभि-मानविहीनमनुष्यस्य जीवन सारहीनमेव। महाकविर्माघो निरभिमानस्य जनस्य जीवनं धूलेरपि हीन मन्यते—

पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्मादेवापमानेऽपि देहिनस्तद्वरं रजः ।।

(तदेव, २/४६)

माघेनालङ्कृतशैल्या वर्णितेषु बहुषु स्थलेष्वर्थगौरवच्छटा दृश्यमाना तस्यार्थ-गौरवमयी दृष्टि प्रकाशयन्ती भ्राजते। अधस्तनश्लोकगतार्थगौरवदर्शन विधातु युज्यते—

अपशङ्कमङ्कपरिवर्तनोचिताश्चलिताः पुरः पतिमुपैतुमात्मजाः ।
अनुरोदितीव करुणेन पत्रिणां विरुतेन वत्सलतयैष निम्नगाः ।।

(तदेव, ४/४७)

उदयशिखरिशृङ्गप्राङ्गणेष्वेष रिङ्गन्
सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोऽङ्के हेलया बालसूर्यः ।।

(तदेव, ११/४७)

प्रथमे श्लोके रैवतकपर्वतो नदीजातम्प्रति तनूजावात्सल्य धारयन् प्रवहशीलास्ता विलोक्य रोदितीति गम्भीरोऽर्थोऽलङ्कारचारुत्वमण्डितोऽवभासते। अत्र वात्सल्यमयार्थ-गाम्भीर्य नून हृद्यम्।

द्वितीये श्लोके प्रातरुदीयमानो बालसूर्य आकाशे स्वरक्तकिरणान् प्रसार्योपरि समारोहति तदा बालरूप त वात्सल्यभावभरिता द्यौर्मातेव समाह्वयति। सरसमाधुर्य-

पूर्णार्थगौरवमयमेतच्चित्र नि सशय नितान्त मनोहरम्।

शिशुपालवधेऽर्थगौरवावहा नैकसूक्तयो भासमाना भासते। समस्ते शिशुपालवधे नैका अर्थगौरवभारभरिता अर्थान्तरन्यासालङ्कारमण्डिता सूक्तय सहृदयलोककण्ठाहारगता भासमाना विद्यन्ते। तासा काश्चिदत्र समासत समुलिख्यन्ते—

१ सदाभिमानैकधना हि मानिन । १/६७
२ गृहानुपैतु प्रणयादभीप्सवो भवन्ति नापुण्यकृता मनीषिण ॥ १/१४
३ सर्व स्वार्थ समीहते। २/६५
४ समय एव करोति बलाबलम्। ६/४४
५ हतविधिलसिताना हि विचित्रो विपाक । ११/६४
६ ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिन । १/१७
७ शरीरभाजा भवदीयदर्शन व्यनक्ति कालत्रितयेऽपि योग्यताम्। १/२६
८ तथापि शुश्रूषुरह गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते। १/२९
९ ऋते रवे· क्षालयितु क्षमेत क क्षपातमस्काण्डमलीमस नभ । १/३८

समासतो वक्तु युज्यते यन्माघप्रणीते शिशुपालवधे भूयासि भव्यचित्राण्यर्थगौरवरूपगुणभरितानि प्रकाश यातानि। तेषामर्थगौरवावहचित्राणा विश्लेषणेन माघीयार्थगौरवमयचित्रचित्रणविधानदाक्ष्य नूनमायाति समक्षम्। अर्थगौरवरूपचित्रचित्रणे माघाङ्गीकृतालङ्कारसाहाय्यमपि नितरा प्रशस्तिभाजनत्वमावहति। माघकृतार्थगौरव प्रतिपादनकलाऽपरालङ्कारै सहार्थान्तरन्याससहयोगेन नितान्त साफल्य याता। एतेनार्थगौरवप्रकाशस्थलेषु न यानि काव्यचारुत्वं निहतम्।

अलङ्कृतमार्गाश्रयिणा कवीना मध्ये माघ ईदृशो महाकविर्यस्य काव्ये दण्डिपदलालित्यच्छटा यत्र कुत्रचिद् नयनगोचरतां प्रयाति। अलङ्कृतपथपथिकस्य श्रीहर्षस्यापि पदलालित्यशोभा माघकाव्ये स्थानमवाप्तेव विलोक्यते। भारव्यपेक्षया माघे पदलालित्यशोभा समधिकरूपेण नयनगोचरताङ्गता समेषा चेतासि माधुर्येण रमयति। अत्र माघोक्तानि पदलालित्यरूपमहनीयगुणप्रख्यापकाणि कानिचिद् वचनानि विचारतां नीयमानान्यपेक्ष्यन्ते।

शिशुपालस्यैकादशे सर्गेऽस्मिन् श्लोके पदलालित्यजनिता महती शोभा नि - सन्दिग्धरूपेण चमत्कुरुते सरसपाठकान् सर्वान्—

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतितविधिलसितानां ही विचित्रो विपाकः ।।

(तदेव, ११/६४)

तथ्यमेतत्तु नून ध्येयमस्मिन् सन्दर्भे यत् प्रायेणेदृशेषु स्थलेषु माघेन माधुर्यगुणावहा कोमलकान्तपदावल्येव' प्रयुक्ता। वसन्तादिकोमलवर्णनीयविषयवर्णनावसरेषु पदलालित्यशोभा अतिशयचेतोहररूपाणि दधत् परिदृश्यते। एवम्भूतानि स्थलानि शब्दालङ्कारेण विशेषतोऽनुप्रासयमकालङ्कारेण समलङ्कृतानि जायन्ते। एतत्सम्बन्धीनि कानिचिच्चित्राणि नून विचारपथ नेयानि।

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुललान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः।।

(तदेव, ६/२)

वसन्तशोभावर्णनपरेऽस्मिन्श्लोके कोमलकान्तपदावली यमकाभिधानशब्दालङ्कारेण निरतिशयमलङ्कृता नादव्यञ्जनामपि विधत्ते। अत्र कोमलर्तुवसन्तस्य कमनीयमनोहररूप चारुतया प्रकाशित सत् सरसलोकचित्तचञ्चरीक परमानन्दभरितं विदधाति। अत्रेदमपि नेय विचारपथे वसन्तचित्रचिणपर पद्यमिद नितान्त सहृदयलोकप्रियता यातम्।

तद्विषयकमेकमपर चित्रं दर्शनीयमत्र—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।

(तदेव, ६/२०)

अत्रापि वासन्ती सुषमा यथा सङ्गीतमय्या पदयोजनया प्रस्फुटता सती समसरसजनचित्तानि हरते तत्तु नून प्रशस्यतरम्। कोमलर्तुवसन्तस्याभिव्यक्ता सर्वातिशायिनी सुषमा कस्य चेतो न रञ्जयति?

शिशुपालवधस्य षष्ठे सर्गे वसन्तशोभावर्णनपराण्यपराण्यपि चित्राणि विलोकनीयानि—

नवकदम्बरजोरुणितम्बरैरधिपुरन्ध्रि शिलीन्ध्रसुगन्धिभिः।
मनसि रागवतामनुरागिता नवनवावनवायुभिरादधे।।

(तदेव, ६/३२)

एवमन्यान्यपि सन्ति माघस्य पदलालित्यमयानि पद्यानि येषु पदानि नृत्यकर्मपराणीव विलोक्यन्ते। कतिपयपद्यान्येतत्तथ्यप्रकाशकानि समवलोकनीयानि—

गजकदम्बकमेचकमुच्चकैर्नभसि वीक्ष्य नवाम्बुदमम्बरे।
अभिससार न वल्लभमङ्गना न चमके च कमेकरसं रहः।।

(तदेव, ६/२६)

वर्षावर्णनपरेऽस्मिन् श्लोकेऽनुप्रासाश्रितपदावली निजकमनीयलालित्यावह रूप

प्रदर्शयन्ती सभ्यजनचेतासि प्रसादयति।

सुरभिणि श्वसिते दधतस्तृषं नवसुधामधुरे च तवाधरे।
अलमलेरिव गन्धरसावमू मम न सौमनसौ मनसो मुदे।।

(तदेव, ६/१२)

वसन्तभावभरितेऽस्मिन् श्लोके प्रसादगुणमय्या माधुर्यगुणपूरितया च शैल्या रमणीयचित्रमेक शृङ्गारपर चित्रितम्।

सितं सितिम्ना सुतरां मुनेर्वपुर्विसारभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः।।

(तदेव, १/२५)

अस्मिन् पद्ये श्रीकृष्णगृहागतस्य नारदस्य नितान्तमलङ्कृत वर्णन नितरा चारु। अस्मिन् प्रयुक्ताया पदावल्या निरतिशय लालित्य कस्य चेतो न हरति।

विकचकमलगन्धैरन्धयन् भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्षः ।।

(तदेव ११/१९)

अस्मिन् प्रात कालीनपवनस्य नितान्त शोभाकर रूपं मधुरया लालित्यभरितया शैल्या चित्रितम्।

पदलालित्यावहानीतराण्यपि चित्राणि चित्रितानि परिलक्ष्यन्ते माघकाव्ये।

माघकाव्ये पदलालित्यावहा शोभा निरतिशयेन प्राप्यते। तत्पदलालित्यं निश्चितरूपेण प्रशस्य महनीयञ्चास्ति नात्र सन्देह कोऽपि।

अत्र यावन्माघस्योपमाया अर्थगौरवस्य पदलालित्यस्य च सोदाहरण विवेचनं यातम्। अधुना 'माघे सन्ति त्रयो गुणा' इत्युक्तेर्युक्तायुक्तत्वविमर्शो विधेय। कथनस्यास्यायमेव भावो विद्यते यन्माघस्य काव्ये कालिदासीयोपमासौन्दर्य, भारवेरर्थगौरवच्छटा दण्डिन पदलालित्यशोभा च स्थान भजन्ते। विषयेऽस्मिन् वक्तुमिदं न्याय्य सङ्गतञ्च यन्माघकाव्ये नून सादृश्यमूलकान्यालङ्कारै सहोपमाया अपि ललितनिबन्धनं यात परन्तु तत्र कालिदासीयोपमासौष्ठव नाधिगम्यते। अत्र कारण स्पष्टमेव। कालिदासीयो मार्गो रससिद्धोऽस्ति। काव्यकर्मजाते तदीया रसपरा दृष्टिर्नयनगोचरता याति। अत एव कालिदासीयोपमाया बाह्याभ्यन्तरगतं रूप नितान्त गभीर व्यापक चेतोहरञ्च विद्यते। स

स्वीयौपम्यविधानेन कस्यचिदपि वस्तुनो बाह्यरूपेण साकमान्तरिकमपि रूप प्रकाशयितु सर्वथा क्षमता भजते। तदीयोपमायामपूर्व सौन्दर्य भावव्यञ्जकत्वं बिम्बग्राहित्वञ्च विलसति तराम्। एतद्विपरीतमलङ्कारपथपथिकस्य माघस्योपमाया नास्ति तादृशी स्थिति·। निस्सन्देह महाकविमाघ उपमालङ्कारचित्रणे साफल्यमधिगच्छति परन्तूपमाप्रयोगे स कालिदाससाम्यमवाप्तु न क्षमते। एवमेवार्थगौरवस्यापि तादृश रमणीय गभीरञ्च रूप नाधिगम्यते माघकाव्ये यथा भारविकाव्ये। भारवेरिय विशेषता खलु दृष्टिगता कर्त्तव्या यत् स स्वल्पैरेव शब्दैर्नैकविषय-भरित गभीरमर्थ प्रकटयति। शिशुपालवधे यत्र तत्रार्थगौरवच्छटा परिदृश्यते परन्तु (तस्मिन् माघकाव्ये) भारविकाव्य इव न तस्य (अर्थगौरवस्य) भव्यं रूपमवाप्यते। माघकाव्ये परिदृश्यमाना पदलालित्यशोभा नून प्रशस्या। शिशुपालवधे यत्र तत्र वसन्तादिवर्णनेषु चित्रितानि पद-लालित्यचारुचित्राणि निरतिशय चेतोहरत्वं यान्ति। एतत्तु निश्चितं यन्माघो गुणत्रयकृते सदा काव्यभावकाना स्मृतिपथ यास्यत्येव।

●●

कादम्बर्यां महाश्वेता

संस्कृतगद्यकाव्यनायकस्य महाकविबाणभट्टस्य कृति 'कादम्बरी' लोकविश्रुताऽस्ति। कादम्बरी काव्यविधादृष्ट्या कथाकोटिके गद्यकाव्ये परिगण्यते। अस्यां भागद्वय विद्यते—पूर्वभाग उत्तरभागश्च। पूर्वभागो बृहत्कायकस्तथोत्तरभागो लघुकायकश्चास्ति। एव मन्यते यदुत्तरभागस्य रचना दिवगते बाणे तद्योग्यकविपुत्रेण भूषणभट्टेन (पुलिन्दभट्टेन) विहिता। कादम्बरीकथाया चन्द्रापीडो नायकस्तथा पुण्डरीकोपनायकोऽस्त॰। कादम्बर्यामनयोर्नायकोपनायकयोर्जन्मत्रयस्य कथा गुम्फिता। कादम्बर्याः प्रधानो रस शृङ्गारोऽस्ति। यस्य चारुचित्रणं सम्पूर्णकादम्बर्या जातम्। केचिद् विद्वास कादम्बरी प्रेमकाव्यत्वेन स्वीकुर्वन्ति। तेषां मान्यतेय नास्ति निराधारा यतो हि तस्या कादम्बरी-चन्द्रापीडयोः महाश्वेता-पुण्डरीकयोश्च प्रणयकथा मुख्यतश्चित्रिता। प्रेमसाफल्य एव कथाप्यन्त याति। वस्तुतः कादम्बरीदृशी प्रणयगाथाऽस्ति यस्या कवित्व रसमयता च पराकाष्ठां यात्वा चिरकालाज्जनमानस समाह्लादयत। रसभावितहृदयस्य बाणभट्टस्य कादम्बरी स्वरसपरिपाकात् सहृदयानां कृते सा कोमलनवोढावधूरिव विद्यते, या रससिक्तहृदया सती स्वयमेव शय्यां प्रति प्रयाति। बाणतनयस्य भूषणभट्टस्याधोलिखित कथन याथार्थ्यमेवाश्रयति—

कादम्बरीरसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्।

कादम्बर्या नैके वृत्तान्ता सुगुम्फिता॰, येषु महाश्वेतावृत्तान्तोऽप्येकतम। महाश्वेतावृत्तान्त॰ स्वरसमयतया भावप्रवणतया च सहृदयजनचेतांसि हठाद् रससिक्तानि विधत्ते। महाश्वेतावृत्तान्ते महाकवे कल्पनाशक्ति, सूक्ष्मनिरीक्षणदृष्टिर्वर्णनभव्यता, नवातिनवशब्दराशिश्च सरसपाठकान् चमत्कुर्वन्ति। तस्मिन् महाश्वेतापुण्डरीकयो सयोगे सम्भोगशृङ्गारस्य द्वयोर्वियोगे च विप्रलम्भशृङ्गारस्य भावभरिता छटा कं न रसाप्लावित कुरुते? कादम्बर्या॰ खण्डभूते महाश्वेतावृत्तान्तेऽनेकपात्राणि चित्रितानि सन्ति। अत्र महाश्वेताया विषये किञ्चिद् वक्तव्य प्रसङ्गोपेतम्।

महाश्वेता गन्धर्वराजहसस्य दुहिताऽस्ति। तज्जनन्या नाम गौरी अस्ति। महाश्वेताया नाम 'यथा नाम तथा गुणः' इत्युक्ति चरितार्थयति। विषयेऽस्मिन् महाश्वेता स्वयं चन्द्रापीडं वदति—

'अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान्'।

अनपत्यतया गन्धर्वराजो हंस॰ महाश्वेतायाः जन्म सुतजन्मातिरिक्तेन महोत्सवेन सत्कृतवान्। एवं पितृभ्यां सह परिजनानां स्नेहभाजनतया महता सुखेन महाश्वेताया शैशवं व्यतीतम्—

"तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मज्जन्माभिनन्दितवान्। अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान्। साह पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्क, सञ्चरन्त्यविदितस्नेहशोकायासमनोहर शैशवमतिनीतवती"।

महाश्वेताया नैसर्गिकसौन्दर्य दर्शकान् कोमलभावभरित चमत्कृतञ्च विधत्ते। तस्या धवलवर्णस्य (गौरवर्णस्य) यथार्थबिम्ब प्रकाशयितु बाणभट्टोऽनेकान्युपमानानि प्रस्तुतीकृतानि। अन्ते च स ता (महाश्वेता) धवलताया सीमान घोषयति—'श्वेतद्वीप-लक्ष्मीमिव 'शुक्लपक्षपरम्परामिव पुञ्जीकृताम्', 'सर्वहसैरिव धवलतया कृतसवि-भागाम्', 'आविर्भूतां ज्योत्स्नामिव', 'चन्द्रमण्डलादिवोत्कीर्णाम् ' 'इयत्तामिव धवलिम्न '।

महाश्वेताया व्यक्तित्वे सञ्चरिता पावनता समाश्रित्य बाणभट्ट उत्प्रेक्षते—मन्ये ध्यानसम्पत्तिर्देहधारिणी जाता गौरीमन शुद्धिर्विग्रहवती सञ्जाता। शङ्के सा धर्महृदयादिव विनिर्गता—

'देहवतीमिव मुनिजनध्यानसम्पदम्', 'गौरीमन.शुद्धिमिव कृतदेहपरिग्रहाम्', 'धर्महृदयादिव निर्गताम्'।

महाश्वेताव्यक्तित्वस्य वैशिष्ट्यमिदमुल्लेख्य यत् तदाकृतिदर्शनमात्रेणै तदीया दिव्यता नि:सन्दिग्धेव प्रतिभाति। ता विलोक्य चन्द्रापीडस्येद कथनं युक्तत्वमेवावहति—

'नहि मे सशीतिरस्या दिव्यता प्रति। आकृतिरेवानुमापयति अमानुषताम्। अति महानयमवकाश आश्चर्याणाम्'।

महाश्वेताया कुलीनता निर्विवादा। अत एव सोच्चकुलानुरूप शिष्टाचारं सम्यग् जानीते। अपरिचितमप्यतिथिभूत चन्द्रापीडम्—(स्वागतम् अतिथये) इत्युक्त्वा त स्वकुटीर नयति तथा त यथाविधि सत्कुरुते। चन्द्रापीडेन तत्तपश्चर्याविषये पृष्टा सा निरतिशय कष्टमनुभूयापि निजसम्मानितातिथि कथमपि नैराश्यगर्ते पातयितु नेहते। परिणामस्वरूप स्ववृत्तान्त विज्ञापयति। तच्चित भावसवलित विद्यते। येन पुण्डरीक-रूपलावण्येन मन्त्रमुग्धा सती सर्वाशत परवशता याति। यद्यपि सा स्वीयकौमार्य-स्थिति विमलवशमर्यादाञ्च सम्यग् जानीते तथाप्यात्मेन्द्रियाणि वशीकर्त्तु कथञ्चिदपि सामर्थ्य नैति। सा मनसि विचारयति—

'हा। हा। किमिदमसाम्प्रतमतिह्रेपणमकुलकुमारीजनोचितमिद मया प्रस्तुतम्'।

नूनमनेन महाश्वेताया मादकतामय चित्रमेव प्रकाश्यते। मदनाक्रान्ता सती सा पुण्डरीकद्वारा स्वकर्णयो संस्थापितकुसुममञ्जर्या अनौचित्य नावबुध्यते। स्वजनन्या साकमच्छोदसरोवर स्नातु याति तथा स्नानेन सा निजेष्टदेवाय स्वहृदय समर्प्यैव परावर्तते।

पुण्डरीकस्य प्रणयपत्र प्राप्य तदीयो मदनविकारो नितरा वर्द्धते। स्वप्रियतमविषये

नितान्तमौत्सुक्येन तरलिकया साक वार्त्तालाप कुर्वती स्वकाल यापयति। तथा सहोपस्थिता तरलिका विलोक्य शङ्कित कपिञ्जल सा वदति—

'भगवन्! अव्यतिरिक्तेयमस्मच्छरीरात्'।

स्वसहचरी प्रति महाश्वेताया औदार्यमिद नून प्रशस्यम्।

पुण्डरीक प्रति तदीय प्रेम नि सशयमविचल वर्तते, परन्तु तत्सापेक्षत्व निराकर्तु न शक्यते। सापि पुण्डरीकमात्मानम्प्रति समाकृष्ट कामयते। पूर्व शान्तात्मान सासारिक-विषयवासनाविरहितं पुण्डरीकसन्निभ मुनि प्रति सम्बन्धस्थापनाय कामदेव भर्त्सयति, परन्तु यदा सा तरलिकया कपिञ्जलेन च परिज्ञापितां स्वा प्रति तदीयामासक्ति विजानाति तदा सा कामदेव प्रशसन्ती स्वं सौभाग्यशालिनी मन्यमाना विचारयति—

'दिष्ट्या तावदयमनङ्गो मामिव तमप्यनुबध्नाति'।

कौमार्यतया तदीया मानसेऽनेकसङ्कल्पविकल्पा ऊहापोहा प्रादुर्भवन्ति, परन्तु सा स्वकुलशीलमातृपितृमर्यादादिक तिरस्कृत्य पुण्डरीक मिलितु प्रस्थान विधत्ते। तदानीन्तने काले तदीयवेशभूषादयस्तद्वियोगविधुरहृदयव्यथा प्रकाशयन्ति। अतिपाविते विमले च तदीये हृदये तत्प्रियतमसम्बद्धा समस्ता मङ्गलामङ्गलरूपा घटना प्रतिबिम्बिता भवन्ति। प्रियतम मिलितुं प्रस्थानसमये दक्षिणनेत्रस्फुरणेन याऽमङ्गलाशङ्का तदीये भावपरीते हृदये स्फुरिता तस्या परिणति प्रियतममरणवज्राघातरूपेणाऽभूत्। प्रियतमसयोगात् प्रागेव स्वकर्णकुहरेषु (कपिञ्जलस्य) समापतितमार्तनादमिममशृणोत्—

"हा हतोऽस्मि। हा दग्धोऽस्मि। हा वञ्चितोऽस्मि। हा किमिदमापतितम्। कि वृत्तम्। उत्सन्नोऽस्मि। दुरात्मन् मदनपिशाच, पाप निर्घृण किमिदमकृत्यमनुष्ठितम्। आ. पापे दुष्कृतकारिणि, दुर्विनीते महाश्वेते किमनेन तेऽपकृतम्?"

आर्त्तनादमिमं श्रुत्वा तदीयः श्वासोऽवरुद्ध , शरीरे भृशं प्रकम्पा अजायन्त, हृदयं छिन्नभिन्नता यातम्। यस्य प्रियतमस्य सयोगाशया सा प्रस्थिता, स तु जीवितो न मिलितस्तत्स्थाने तदीय शवो दृष्टिपथमायात । साऽधोलिखितरूपेण विलपितुमारब्धा—

"हा अम्ब, हा तात, हा सख्य' इति व्याहरन्ती, 'हा नाथ जीवितनिबन्धन, आचक्ष्व क्व मामेकाकिनीमशरणामकरुण, विमुच्य यासि, पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था, युगसहस्रायमाण कृच्छ्रेण नीतो दिवस , प्रसीद सकृदप्यालप, दर्शय भक्तवत्सलताम्, ईषदपि विलोक्य, पूरय मे मनोरथम्, आर्तास्मि, भक्तास्म्यनुरक्तास्म्यनाथास्मि, बालास्म्यगतिकास्मि, दु:खितास्म्यनन्यशरणास्मि, मदनपरिभूतास्मि, किमिति न करोषि दयाम्.. .।'

महाश्वेताया अध:प्रकारेण करुणविलापानां चेद् विमर्श: क्रियेत तदा नूनमिद

तथ्यं समायायात्, समक्षमस्माकं यत् सा सर्वतोभावेन स्वप्रियतम पुण्डरीक प्रति समर्पितास्ति। सा आत्मान त्वाराध्यस्य भक्तरूपेण मन्यते। सा त सकृदप्यालपितु, भक्तवत्सलता दर्शयितु, स्वल्पमपि विलोकयितु मनोरथ पूरयितु पौन.पुन्येन याञ्चा कुरुते। सा नितान्त दु खिता, अनन्यशरणा, मदनाक्रान्ता असहायबाला, अगतिका अस्ति। सा पृच्छति स्वप्रियतम स कथ न दया करोति? कोऽवापराधस्तस्या । तया च तत् सर्वमनुष्ठित यत् तत् प्रियेण समादिष्टम्। तया तस्य सर्वाऽज्ञा समादृता। सा न जानीते किमर्थ तस्या प्रियतम· क्रुद्धो जात ।

'कथय किमपराद्धम्। कि वा नानुष्ठित मया। कस्या वा तवाज्ञाया नादृतम्। कस्मिन् वा त्वदनुकूले नाभिरतम्, येन कुपितोऽसि'।

नितान्तं दु·खिता महाश्वेता पुण्डरीकसखायं कपिञ्जलमनुनयन्ती चाब्रवीत्— 'वारमेकं पुनरिमं जीवित कुरु। पुन चिरकाल यावत् तरलिकाकण्ठ हस्तेन गृहीत्वा विलापमकरोत्। अन्ते सा मूर्च्छिता जाता। महाश्वेतां तस्या दशायां समवलोक्य कस्य हृदयं करुणार्द्र न भवति? कस्य हृदये शोकप्रवाहो न प्रवहति। असह्यविरहदु खकातरया तया स्वसहचरी तरलिका समाहृतकाष्ठै. चिता निर्मातुमादिष्टा तथा स्वजीवितेश्वरमनुसर्तु स्वकामना प्रकाशितवती—

'अय्युत्तिष्ठ। निष्ठुरहृदये कि यद् रोदिषि काष्ठान्याहृत्य विरचय चितामनुसामि जीवितेश्वरम्'।

किञ्चिदनन्तरमेव गगनतलादवतीर्णेन दिव्याकृतिना प्राणिना उपरत तं पुण्डरीकमुत्क्षिप्य गगन गच्छता महाश्वेताऽऽश्वस्ता—

'वत्से महाश्वेते। न परित्याज्यास्त्वया प्राणा पुनरपि तवानेन सह भविष्यति समागम ..।'

तदेवाश्वासन महाश्वेताकृते तज्जीवनाधारतया जातम्। तदाश्रित्यैव महाश्वेता स्वप्रियतमस्य पुनः सयोगाशया भगवन्त भूतनाथ सेवमाना जीवन धारयति।

कादम्बर्या महाश्वेता यद्यपि प्रगाढोद्दामप्रेम्णोन्मत्तप्रेमिकारूपेण नेत्रसमक्षमायाति तथापि तदीयप्रणयस्याविचलता तथा गम्भीरता एवं तदीयहृदयनिष्कपटता ता प्रणयस्योच्च-भूमिकायां प्रतिष्ठापयति। सा हृदयस्याविचलभावनया ओतप्रोता तपस्याज्वालया भृश तप्ता सती निष्कलुषं पावनं तथा जन्मजन्मान्तरीयसौहार्दभावेन संवलितप्रेम्णा दिव्यता-मवाप्नोति, यद् वशात् सा कादम्बरीपाठकाना हठात् केन्द्रबिन्दुत्वेन राजमाना तिष्ठति। नूनं महाश्वेतया स्वदिव्यानुरागेण कादम्बरीप्रणयगाथा कृतार्थीकृतेतिदिक्।

●●

मृच्छकटिके समाजचित्रणम्

सस्कृतसाहित्ये महाकविशूद्रकविरचितमृच्छकटिकस्य नितान्त विशिष्ट स्थानम्। नाट्यशास्त्रीयदृष्ट्या तत् सङ्कीर्णकोटिक प्रकरणमस्ति। तस्य नायकश्चारुदत्तो नायिका वसन्तसेना च वर्तेते। मृच्छकटिक दशाङ्केषु विभक्तमस्ति। तस्मिन् धीरप्रशान्त-कोटिकनायकभूतचारुदतस्य तथा नायिकाभूताया गणिकावसन्तसेनायाश्च कल्पित-प्रेमकथोपवर्णिता। मृच्छकटिकस्य लोकप्रियता ख्यातिश्च बहुकारणाश्रिते। सस्कृतनाट्यसाहित्ये मृच्छकटिकमीदृश नाटकम् (प्रकरणम्) अस्ति, यस्मिन् प्रणयकथापरकस्य प्रकरणस्य, धूर्तबहुलभाणस्य, राजनैतिकनाटकस्य च नैकानि वैशिष्ट्यानि दृष्टिविषयता प्रयान्ति। तस्मिन् प्रायेण राजनैतिककथावस्तु परित्यज्य मध्यवर्गीयसमाजसम्बद्धकथानकं तदाधारत्वेनाङ्गीकृतम्। ततु प्राचीनसस्कृतनाटकस्यैतादृशी रचना यस्या याथार्थ्यस्य दर्शन पदे-पदे जातम्। तस्मिन् समाजस्य सर्ववर्गपात्राणा स्थिति। तत्पात्राणामपि वर्गद्वय स्पष्टत परिलक्ष्यते। एकस्मिन् वर्गे आदर्शप्रेमी चारुदत्त·, त्यागमूर्तिर्गणिका वसन्तसेना पतिव्रता नारी धूता, अभिन्नहृदय मित्र मैत्रेयश्चोदात्तकोटिकानि पात्राणि सन्ति। अपरस्मिन् वर्गे दुष्टहृदय शकार, द्यूतकारो माथुर, प्रेमी चौरशर्मिलकश्चेति सामान्यपात्राणि सन्ति। वर्गद्वयसम्बद्धपात्रै साकमन्ये द्यूतकारा, भिक्षुका, राजनैतिकषड्यन्त्रकारिणो, रक्षिणश्च चित्रणमागताः विद्यन्ते।

'साहित्य समाजस्य दर्पण भवति' इत्युक्तेर्मृच्छकटिकेऽपि तत्कालीन· समाज· सर्वाशतश्चित्रितो जात।

भारतीय समाजो वर्णव्यवस्थाश्रित। अत साहित्येऽपि तत्प्रतिबिम्बन स्वा-भाविकमेव। चतुर्वर्णाना मध्ये प्राचीनकालादेव ब्राह्मण पूजनीयता गतो विद्यते। तत्कालीनसमाजेऽपि ब्राह्मणस्य पूजनीया स्थिति अक्षुण्णा लक्ष्यते। प्रकरणस्य द्वितीयेऽङ्के मदनिका यदा वसन्तसेना पृच्छति यत् कि सा विद्यालङ्कृते कस्मिश्चिद् ब्राह्मणयुवके स्निह्यति? तदा सा (वसन्तसेना) ददात्युत्तरम्—'पूजनीयो मे ब्राह्मणजन·'।

तदानी ब्राह्मणवदेव गोजातेरपि पूज्या स्थितिरासीदित्यपि वसन्तसेनावचनेन सिध्यति—'अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च तद्गृह्णामि'।

ब्राह्मणपूजास्थितिरनेनैवाकालयितुं शक्यते यत्तदा कृतेऽपि (मृ० तृतीयोऽङ्क) पापकर्मणि ब्राह्मणोऽबध्य आसीत्। धर्मादिदृष्ट्या समायोजितेषु महनीयेष्ववसरेषु ब्राह्मणा सत्क्रियन्ते स्म। केषाञ्चिद् धनादिसम्पन्नाना ब्राह्मणाना धनादिग्रहणनिवृत्तिरपि परिलक्ष्यते।

कतिपयब्रह्मणा विद्यादिसम्पन्ना कर्मकाण्डादिनिपुणा धनिकैर्विशेषत पूज्यता गता दृश्यन्ते। वसन्तसेनयापि पूजार्थ नियुक्तो ब्राह्मण परिज्ञायते।

तदा शूद्रा वेदपाठाय नानुमता आसन्। मृच्छकटिकस्य नवमेऽङ्के शकारम्प्रत्य-धिकरणिकवचनेन सूच्यत इदम्—

'वेदार्थान् प्राकृतस्त्वं वदसि, न च ते जिह्वा निपतिता' । (मृ० ९/२१)

कायस्थाना समाजे नासीदादरास्पद स्थानम्। जनै सर्पादिभि कृता तुलना तेषा ज्ञापयति तथ्यमिदम्—'कायस्थसर्पास्पदम्'।

ब्राह्मणादीना मध्ये केचिद् ब्राह्मणाश्चौर्यादिनिन्द्यकर्मपरा अपि दृश्यन्ते। शर्विलक ईदृश एव ब्राह्मणाधम ।

प्रकरणपात्राणा सर्वेषामाकलनेन प्रतीयते यद् तदानीन्तने काले ब्राह्मणादिवर्णा स्वकृते धर्मशास्त्रनिर्धारितानि कर्माणि (व्यवसायान्) विहाय तदतिरिक्तव्यवसायमपि स्वीकुर्वन्ति स्म। आनुवंशिकरूपेण चारुदत्तप्रभृतयो ब्राह्मणाऽपि व्यवसायकर्मनिरता आसन्। चारुदत्त स्वय स्वपूर्वजाननुसृत्य सार्थवाहपददायित्व निर्वहन् दृश्यते। नापितभूतो वीरकस्तथा चर्मकारभूतश्चन्दनकश्च क्रमश सेनापति-दलपतिसदृशमहनीयपदमलङ्कुर्वाणौ दृश्येते। इत्थ प्रतीयते यन्मृच्छकटिककाले वर्णव्यवस्थाया जातिव्यवस्था प्रचलिताऽऽसीत्। केचित् स्वपैतृकव्यवसायनिरता , पुनरपरे तदतिरिक्तव्यवसायपराश्च दृष्टिविषयता यान्ति। जनाना कृते स्वेच्छानुसार व्यवसायादिचयने नासीत् कश्चित् कठोरो नियम । नीचवर्ण(जाति)गतानामपि जनानामुच्चपदप्राप्तौ नासीत् कश्चिद् बाध । गोपालपुत्रस्यार्थकस्य राजपदप्राप्ति साधयति कथ्यमिदम्।

अधोलिखितेनोद्धरणेन सिध्यतीद यत्तदा स्पृश्यास्पृश्यकुप्रथा नासीद् भृश विकृता—

'वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः' । (मृ० १/३२)

नून पण्डितब्राह्मणाना नीचजातिमूर्खै सहैकस्यामेव वाप्या स्नानं गीतोक्त वचनमिद स्मारयति—**'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनिचैवश्वपाके च पण्डिताः समदर्शिनः'** ।

अद्यतना विकृतजातिप्रथायास्तदा प्रचलन जन्म गृहीतं दृश्यते। परन्तु जाति-गतोऽभिमानस्तदाऽपि निन्दां यातो दृश्यते—

न खलु वयं चाण्डालाश्चाण्डालकुले जातपूर्वा अपि।
येऽभिभवन्ति साधुं ते पापास्ते च चाण्डालाः।।

(मृ० १०/२२)

चाण्डालस्थानेन कथनेनानेन द्योत्यते यदुच्चजातिजनाना दृष्ट्या नीचजातिगता-जनास्तिरस्कृतास्तथा जन्मगतजातिव्यवस्थाम्प्रति नीचजातिजनानामाक्रोश आसीत्।

मृच्छकटिकप्रकरणाध्ययनेन निवासादिगता व्यवस्थापि दृष्टिपथमायाति। आधुनिककाल इव तदानीमपि विविधजातिव्यवसायगताना जनाना कृते पृथक् पृथगावासव्यवस्था दृश्यमानता याति। व्यवसायी चारुदत्त श्रेष्ठिचत्वरे निवसति स्म।

यथा साम्प्रतन्तदानीमपि गमनागमनकृते राजमार्गा आसन्। परन्तु तत्सौलभ्य विरलमेव। कुत्रचित् विशेषमहनीयस्थानेषु विशेषमार्गा समवलोक्यते। प्रायेण राजमार्गा प्रकाशविहीना एव, परन्तु विशिष्टा केचित्प्रकाश्यमाना प्राप्यन्ते। जनरक्षणार्थं रक्षिणोऽपि रक्षाकर्मतत्परा भवन्ति स्म तदा सामान्यत प्रकाशानुपलब्धे क्रियमाण चौर्यादिकमपि दृष्टिपथमायाति—

राजमार्गो हि शून्योऽयं रक्षिणं सञ्चरन्ति च।
वञ्चना परिहर्तव्या बहुदोषा हि शर्वरी।।

(मृ० १/५८)

शूद्रककालीनसमाजस्य यथार्थस्थितिबोधाय तत्प्रणीत मृच्छकटिक मुख्य स्रोत। तत्र पुरुषाणामिव नारीणामपि यथार्था स्थितिश्चित्रिता। यद्यपि नाटकस्यास्य मुख्यनायिकाया वसन्तसेनाया एव तस्मिन् मुख्यतया चित्रण, परन्तु तया सह कुलवधूप्रभृतीनामपि तत्र चित्रणं जातम्। चारुदत्तस्य कुलवध्वा धूताया स्थितिपरिशीलनात् तदानीन्तनस्य कुलवधूना वास्तविकी स्थितिरवबुध्यते। कुलवध्व· स्वपतिमेव जीवनसर्वस्व मन्यमाना सुखशान्तिपूर्वक जीवनं यापयन्ति स्म। तथा ता स्वपतिमाभूषणरूपत्वेन मानयन्ति स्म। चारुदत्तस्य कुलवधू धूता वदति—

'आर्यपुत्र! एव ममाभरणविशेष इति जानातु भवती'।

सतत पतिसेवापरा अपि कुलनार्य· स्वपतिचरित्रविषये चिन्तनशीला आसन्। तासा मते तत्पतीनां यशसश्चारित्र्यस्य च रक्षणं सर्वथा श्रेयस्करम्। आदर्शकुलनारी धूता तदर्थ स्वबलिदानमपि विधातु प्रस्तुता दृश्यते—'वरमिदानी स शरीरेण परिक्षतो न पुनश्चारित्रेण''।

कुलनारीणा पतिप्रेम्ण उदात्तत्वं सुपरीक्षित यतो हि ता निजपतिप्रेमावाप्तु निजपुत्रस्यापि स्निग्ध वात्सल्य हातुमुद्यता दृश्यन्ते।

मृच्छकटिके गणिकारूपवसन्तसेनाया· स्थितिर्विशेषतश्चित्रिता। तदवगत्य वक्तुमिद सुकर यत् तत्कालिकाना गणिकानामार्थिकी स्थितिर्नितान्त दृढाऽऽभूत्। तासा भवनानि नानारत्नमण्डितानि भव्यानि चासन्। असीमिता सम्पत्तीस्ता धारयन्ति स्म। वाराङ्गनाना न स्वाभिलाषिपुरुषान् प्रति अपि तु तत्सम्पत्ती प्रति प्रेमभावो जायते स्म। जारपुरुषाणा

धनादिग्रहणानन्तर तेषां तिरस्कार एव ताभिर्विधीयमानो विलोक्यते। परमनिन्दा गतो गणिकाव्यवसायस्तदा प्रचलित इति विभिन्नप्रमाणैरवगम्यते। मैत्रेय स्वमित्र चारुदत्त गणिकास्वभावव्यवहारादिविषये परामृशति—'गणिका नाम पादुकान्तरप्रविष्टेव लेष्टुका दु खेन पुनर्निराक्रियते''।

वाराङ्गना सर्वसुलभा आसन्। समाजे तासां स्थितिर्न सम्मानावहाऽऽसीत्। सम्मानितजनानां गृहेषु तासा प्रवेशो वर्जनीयोऽभवत्। नृत्यवाद्यगीतकलादिनिपुणा गणिका कामुकजनाना प्रतारणेऽपि प्रवीणा प्राप्यन्ते एतस्मिन् विषये वदति विट —

इयं रङ्गप्रवेशेन कलानां चोपशिक्षया।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता।।

(मृ० १/४२)

स्मरणीय यद् वेश्यासमाजे वसन्तसेनासदृश्यो गणिका अपवादरूपा अप्यासन्। या न धनादिग्राहिण्योऽपि तु गुणग्राहिण्य। वसन्तसेना मदनिका स्वगुणग्राहिस्वरूप-मेभिर्वचनै प्रकाशयति—'गुण. खल्वनुरागस्य कारण च पुनर्बलात्कार'। शकारस्य प्रचुरधनदानप्रस्तावं वसन्तसेना निम्नाङ्कितरूपेण तिरस्कुरुते—

''यदि मां जीवन्तीमिच्छसि तदा एवं न पुनरहं मात्राज्ञापयितव्या''।

गणिका सत्यपि वसन्तसेना चारुदत्तेन साकमात्मान प्रणयसूत्रेण बद्धा सम्मान-जनकं जीवन यापयन्ती तिष्ठति स्म।

मृच्छकटिके दासीप्रथाऽपि विद्यमानाऽवलोक्यते। नैकनार्य पुरुषाणा नारीणा वा दास्यमङ्गीकृत्य स्वभरणपोषण कुर्वाणा नयनगोचरता यान्ति। यद्यपि दास्य. परिवारसदस्यत्वेन परिगणितास्तथापि तासा दास्यन्तु कष्टकरमेवासीत्।

भारतीयसमाजस्य सर्वाङ्गपूर्णाभ्युन्नतये षोडशसस्कारा निर्धारिता सन्ति। तेषा मध्ये विवाहस्य मुख्य स्थानम्। सामान्यतो मृच्छकटिकसमये सवर्णविवाहस्यैव प्रथा प्रचलिता। परन्तु क्वचिदसवर्णविवाहस्यापि स्थितिरधिगम्यते। पुरुषोऽनेकस्त्रीभि सह विवाहं कुरुते स्म। सर्ववर्णश्रेष्ठो ब्राह्मणो वाराङ्गनया साकमपि वैवाहिकसम्बन्ध स्थापयति स्म, परन्तु समाजेऽपेक्षानुसार न तिरस्क्रियते स्म। ईदृश्येव स्थिति शर्विलकमदनिकासम्बन्धेऽप्यस्ति। वसन्तसेनाप्रभृतयो गणिका अपि विवाहसम्बन्धेन बद्धा दृश्यन्ते।

साम्प्रतिकसमाजे इव तत्कालीनसमाजे नार्यपहरणादिकुत्सितव्यवहारो भृश न प्रचलितो विलोक्यते परन्तु दुर्बलजनस्त्रीणामपहरणात्मिकास्तदा घटना घटिता अभूवन्—

'ज्योत्स्ना दुर्बलभर्तृकेव वनिता प्रोत्सार्यमेद्यैर्हता'।

तदानीन्तने काले शिक्षायां धर्मग्रन्थाना वेदमनुस्मृत्यादीनामध्ययनस्य स्थिति परिज्ञायते। सङ्गीतदृष्ट्या सामवेदस्याप्यनुशीलन क्रियते स्म। तदा पुराणमहाकाव्यादीनामप्यध्ययन जायते स्म। तदानी अश्वहस्तिविद्यादिग्रहणस्यापि विद्यमानता परिज्ञायते।

मृच्छकटिककालस्य वैशिष्ट्यमेक नूनमेवोल्लेख्यमत्र यत्तदा सङ्गीतादिविविधकला. पराकाष्ठा गता सलक्ष्यन्ते। नृत्यवाद्यगीतात्मकसङ्गीतस्य विशिष्टा स्थितिरिति परिज्ञायते। तत्कालिकनार्यो विशेषत सङ्गीतकलानिपुणाः क्रियन्ते स्म। वसन्तसेना स्वयमेव सङ्गीताभिनयकलादौ प्रशिक्षिताऽऽसीत्। वसन्तसेनाचारुदत्तगृहविद्यमानाना मृदङ्गदर्दुरपणववीणावंशा प्रभृतीनां वाद्यानामुल्लेखेनापि प्रमाणितमिद कथ्यम्। चारुदत्तस्याध.कथनेन वीणानामकवाद्ययन्त्रस्य विशेषा स्थिति परिज्ञायते—

'वीणा हि नामासमुद्रोत्थितं रत्नम्'।

सन्दर्भेऽस्मिन् प्रकरणनायकस्य चारुदत्तस्य सङ्गीतप्रियता विशेषत उल्लेखनीया।

सङ्गीतातिरिक्त चित्रकलामूर्तिकलास्थापत्यकलादीनामपि विशेषसत्ता परिज्ञाता भवति। मनोरञ्जनाय सङ्गीतादिविविधकलाभि· सह नाट्याभिनया अपि प्रयुज्यन्ते स्म। एतदत्र ज्ञेय यत् सङ्गीतादिक्षेत्रेषु स्त्रीणां पुरुषाणाञ्च समानरूपेण सहभागित्वम्। गृहेषु शुकपोतादिपरिपालनदशापि परिलक्षिता भवति।

तत्कालीने समाजे उत्तरीयवस्त्रधारणस्य क्वाचित्की स्थिति· परिबुध्यते। अवगुण्ठनप्रयोगोऽपि विवाहिताभिर्नारीभिः क्रियते स्म। तासामाभूषणप्रियत्वमपि लक्ष्यतेतराम्।

मृच्छकटिकाध्ययनेन तत्कालीनभोजनादिविषयेऽपि परिज्ञानं भवति। तदा भोज्यपदार्थेषु तण्डुलस्य विशेषप्रयोगो दृश्यते। दुग्धदधीनामपि भोज्यत्वेन स्थितिरवबुध्यते।

मृच्छकटिककालीने समाजे विद्यमाना कतिपयकुरीतयोऽपि (दुर्व्यसनान्यपि) परिलक्ष्यन्ते। तासु द्यूतस्य प्रधान स्थानमासीत्। द्यूतक्रीडा तदानी न प्रतिबद्धा। द्यूतकराणा विशिष्टा मण्डल्यपि विद्यमानादृश्यते—"कथ द्यूतकरमण्डल्या बद्धोऽपि"।

उपर्युक्तविश्लेषणेन विशेषेण प्रकाशता व्रजत्येतद् यत् समस्तेषु संस्कृतनाट्येष्वेकमस्ति मृच्छकटिकमेदृशं यस्मिन् भारतीयसमाजस्य विभिन्नविषयिकाः स्थितयो यर्थार्थधरातलाश्रिताश्चित्रिता। मध्यमवर्गीयनायकनायिकाना स्थित्या तत्र मध्यवर्गीयो निम्नकोटिकश्च भारतीय. समाजो विशेषतो वर्ण्यविषयतां यात।

●●

भारतीयसंस्कृतिः संस्कृतञ्च

सौभाग्यवशाद् भारतवर्ष स्वातन्त्र्यमधिगतं विराजते । वय सर्वे स्वतन्त्रदेशस्य नागरिका सन्त स्वभाग्य निर्मातु सर्वथा स्वाधीना. । चेद्वय स्वातन्त्र्यमधिगत्यैव परमा शान्ति चरम सन्तोष च भजामस्तदा नूनमेवास्माकमधोगतिर्भविष्यति, इदानीन्तने युगे पाश्चात्त्यसभ्यतया भौतिकवादेन च समाक्रान्ता जना सर्वदा चार्वाकदर्शनस्यैव पन्थानमनुसरन्तो दृश्यन्ते—

यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।।

अन्यै.सह वयं सर्वेऽपि धनमाहात्म्यमङ्गीकुर्मस्तथा जानीम ।

'धनाद् धर्मस्ततः सुखम्', 'धनैरापदं मानवा निस्तरन्ति'
'अर्थस्य पुरुषो दासोऽर्थो दासो न कस्यचित्' ।

इत्यादिरूपेण प्रतिपादितं तथ्यमपि नोपेक्षामहे पर धनमेव भगवन्त न मन्यामहे । भारते चतुर्णा पुरुषार्थानां मध्येऽर्थस्य निवेशोऽस्ति परन्तु धर्मनामक. पुरुषार्थो महत्त्वपूर्ण स्थान भजते ।

'धर्म एव हतो हन्ति' । 'धर्मो रक्षति रक्षितः' । 'धर्मादर्थश्च कामश्च किमर्थ स न सेव्यते' ।

इत्यादिकथनैर्भारतीयजीवने धर्मप्रधानभावना परिलक्ष्यते । महाभारतकारो व्यासस्तारस्वरेण घोषयन् धर्मस्य महिमान कथयति—

ऊर्ध्वबाहुर्विरौम्येष न कश्चित् शृणोति मे ।
धर्मादर्थश्च कामश्च किमर्थं स न सेव्यते ।।

उक्तेरस्या अयमेवाभिप्रायो यद् धर्मादेवार्थकामयोरपि सिद्धिरतो धर्माश्रमण-मवश्यमेव करणीयम् ।

अधुना धर्मेति शब्दस्यप्रयोग:सङ्कीर्णेऽर्थे क्रियते । परन्तु वास्तविकरूपेण तस्याधोलिखिता परिभाषैव तदीय यथार्थ रूप प्रकाशयति—

'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'

अर्थात् स एव यथार्थधर्मो येन मनुष्यो लौकिकमाध्यात्मिकञ्चोभयविधामुन्नति लभते ।

सस्कृतस्य माहात्म्य न केवलं भारतीया एव गायन्त्यपि तु भारतस्य पारतन्त्र्य-कालेऽप्यनेके पाश्चात्त्यविद्वासो देववाणीमहत्त्वमङ्गीकृत्य तस्या नि स्वार्थसेवा कृतवन्त । पाश्चात्त्यविद्वद्भि-कृता सस्कृतसेवा कदापि विस्मर्तुं न शक्यते । वेदज्ञानविचक्षणेन मैक्समूलरमहोदयेन सप्तविंशतिवर्षाणि यावदहर्निश कठोरश्रमेण त्रिसहस्रपृष्ठात्मकः सायणभाष्यसहित ऋग्वेद. सम्पादितः, विल्सनाख्येन पाश्चात्त्यविदुषा ऋग्वेदस्याङ्ग्लभाषायामनुवादो विहित । ग्रासमानमहानुभावेन ऋग्वेदस्य जर्मनभाषायां पद्यानुवादस्तथा ग्रीफिथमहानुभावेन चतुर्णा वेदाना पद्यानुवादो विहित । एवमेव कीथपीटर्सन-मैकडानलप्रभृतयोऽपरे सस्कृतानुरागिण पाश्चात्त्यपण्डिता अपि यथा सस्कृत सुसेवितवन्तस्तदपि स्मरणीयमेव ।

केचिज्जना सस्कृतभाषा मृतभाषामुक्त्वा स्वजिह्वालौल्यं प्रकटयन्ति । मन्ये एतादृशा जना सस्कृतमाहात्म्यनभिज्ञा स्वस्यैव मृतप्रायत्व सूचयन्ति । आसृष्टे-रिदानी यावत् सस्कृतेऽसख्याका विविधज्ञानविषयका ग्रन्था विरचिता विरच्यन्ते च । सस्कृतनिबद्धविविधविषयमाश्रित्य शोधकार्याणि च सम्पाद्यन्ते । विद्यालयेषु, महा-विद्यालयेषु, विश्वविद्यालयेषु च लक्षशो विद्यार्थिन सस्कृतमधीयन्ते । प्रतिदिन-माकाशवाण्या दिल्लीकेन्द्रतो वारद्वयं दूरदर्शनतश्चप्रतिसप्ताहमेकवारं देववाण्या समाचारा प्रसार्यन्ते । एतत्सर्व विस्मृत्य चेत् केचिज्जना सस्कृत प्रति दोषपरां दृष्टिमेव धारयन्ति तदा सस्कृतस्य अस्माक वा को दोष ?

इदानी प्रकृतमनुसृत्य किमप्युच्यते । सर्वप्रथम विचार्य यत् सस्कृतिशब्दस्य कोऽर्थः ? कश्च भाव ? संस्कृतव्याकरणानुसारेण 'सम्' इत्युपसर्गपूर्वकात् 'डुकृञ्करणे'(कृ) धातोः क्तिन् प्रत्ययसंयोजनेन 'संस्कृतिपदं' निष्पद्यते । व्युत्पत्ति समाश्रित्य पदस्यार्थ शुद्धिपरिष्काराद्यनेकेऽर्था भवन्ति । सम्प्रति सस्कृतिपदमाङ्ग्लभाषाया 'कल्चर' इति पदप्यार्थे प्रयुज्यमानमस्ति । इदानीन्तने काले यस्मिन्नर्थे सस्कृतिशब्द प्रयुज्यते तस्मिन्नर्थे प्राक्तने सस्कृतवाङ्मये प्रयुज्यमान सम्भवतो न दृश्यते, तत्र तु सस्कारशब्द एवोपलम्यते । समाजस्य व्यापकरूपेण सामान्यतया प्राप्ताना सस्काराणां समष्टिरेव तस्य समाजस्य संस्कृतिः कथ्यते । संस्कृतिशब्देन केवलं बाह्याचारा एव न गृह्यन्तेऽपि तु तेनान्तरिकविचार प्रभावकल्पनाभावनाप्रभृतितत्त्वान्यपि गृह्यन्ते ।

विश्वस्य विभिन्नदेशेषु विभिन्ना सस्कृतय. विलसन्ति, तासु सर्वासु भारतीया संस्कृतिः न केवलं प्राचीनतमाऽपि तु महत्तमा । विषयेऽस्मिन् नास्ति सन्देहलेशो विवादावसरो वा । पुरातने काले यदाऽन्यदेशीया जना असभ्या. संस्कारहीनाश्च सन्तो यावज्जीवेत्सुखं जीवेदित्यादिमन्त्र जपन्त स्वीय जीवनं यापयन्त आसन्, तस्मिन्नेव काले सुसंस्कृता भारतीया मनीषण. उदात्तसंस्कृतिगुणान्विता सदाचारोपेता न केवल भारतीयजनानपि तु समस्तमानवलोकं च शिक्षयितुं सर्वत समर्थाः आसन् । मनुना यदुक्त नास्ति तत्र

काचिदतिशयोक्ति.—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।

अमरीकादेशे निवसता स्वामिविवेकानन्देन भारतीयसस्कृते पाश्चात्यसस्कृतेश्च यदा भेदमुद्घाट्य भारतीयसस्कृतिरहस्य प्रकाशितवान् तदाऽनेके जनास्तस्य शिष्यतामङ्गीकृत्य भारतीयसंस्कृतेर्भारतीयदर्शनस्य च रहस्य विज्ञातुमुद्यता जाता ।

कस्याश्चिदपि सस्कृते स्वरूपद्वय भवति बाह्यमान्तरिकञ्च । आचारादिक तस्या बाह्यस्वरूपेण गृह्यते । तदेव धर्मपदेनापि व्यपदिश्यते । आन्तरिके स्वरूपे समाजस्य विचारधारा समायाति, यामाश्रित्य समाज प्रचलितो भवति । सस्कृतवाङ्मये सस्कृतेरुभयरूपस्य सम्यग् दर्शन क्रियते । तस्मिन् मानवसमाजस्य सर्वाङ्गीणविकासाय, निर्धारिताना चतुर्णा पुरुषार्थाना परमा सत्ता । तस्मिन् धर्मप्रतिपादका वेद-ब्राह्मणारण्यक-स्मृत्यादिग्रन्था., अर्थपरिबोधका कौटिल्यादिकृता अर्थशास्त्रादय , कामप्रतिपादका वात्स्यायनविरचितकामसूत्रादयस्तथा मोक्षबोधका षड्दर्शनग्रन्था विद्यन्तेतराम् । भारतीयसंस्कृतौ धर्मस्य दर्शनस्य चापूर्वा सत्ता विद्यते । तत्र धर्मस्य मुख्य स्थानम् । अत्रेदमवश्यमेव बोद्धव्य यद् भारतीयसस्कृतौ धर्मस्य न तथा सङ्कुचितोऽर्थो गृह्यते यथान्यसंस्कृतिषु । काश्चिद् धर्मपरिभाषा ध्यातव्या —

धारणाद् धर्म इत्याहुर्धर्मो धारयति प्रजाः ।
यत् स्याद्धारणसंयुक्तः स धर्म इत्युदाहृतः ।।
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम् ।।

इत्यादिरीत्या धर्मस्य व्यापकस्वरूपमेव भारतीयसस्कृतौ स्वीक्रियते ।

भारतीयसस्कृतेर्द्वितीय महत्त्वपूर्णमङ्ग वर्तते दर्शनम् । मानवजीवनस्य परमपुरुषार्थो मोक्षो वर्तते । मोक्षप्राप्तिस्तावन्न भवति यावदात्मज्ञानं न जायते —

'ऋते ज्ञानान्न मुक्तिः' ।

अस्मद्देशीया दार्शनिका तारस्वरेण उद्घोषयन्ति—

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' ।

वर्णाश्रमव्यवस्था भारतीयसमाजस्य भारतीयसस्कृतेर्वा महनीयो गुण । गुणकर्मविभागशो निर्मिताश्चत्वारो वर्णास्स्वस्वकर्माणि सम्यक् परिपालयन्त एवं स्वस्य समाजस्य च सेवा विधातुं समर्था स्युरित्येतस्य दर्शनं संस्कृतवाङ्मये भवति । 'स्व-स्वकर्मण्यभिरत· संसिद्धिं

लभते नर'। वर्णा इव चत्वार आश्रमा अपि समुज्ज्वलरूपेण दृष्टिगोचरता व्रजन्ति सस्कृते। सस्कृतवाङ्मये ब्रह्मचर्याश्रमस्य, गृहस्थाश्रमस्य, वानप्रस्थाश्रमस्य, सन्यासाश्रमस्य च व्यावहारिकं वर्णन यत्र तत्रोपलम्यते।

उदारत्व समन्वयवादित्व वा भारतीयसस्कृतेरपरो महान् गुण। भारतीया सस्कृतिर्भगवती भागीरथीव स्वमध्यपतितान् स्वेतरसस्कृतिनदीनदान् आत्मरूपेण परिणमयन्ती आत्मसात् कुर्वन्ती च अधुनापि निर्बाध प्रवहति। हूण-कुषाणादय आक्रामकरूपेणागता। परन्त्वत्र भारतीयसस्कृतिसस्कृता सन्तो भारतीया जाता। भारतीयसस्कृतेरौदार्यरूप गुण सस्कृत पदे पदे धारयति—

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।

इय विश्ववन्द्या कौटुम्बिकी भावना भरतीयसस्कृतेर्महनीयो गुणो यस्य प्रकाशन सस्कृते पदे पदे जातमस्ति। 'कृण्वन्तो विश्वमार्यमि'ति परमोदात्तां भावना धारयन्ती भारतीया सस्कृति सर्वजनमाङ्गल्य कामयते। सर्वसौख्य सर्वनीरोगत्व, मङ्गलपरादृष्टिश्च तस्या सहजा गुणा। भारतीयसस्कृतिभव्यभावनाभावितो जनो स्वकृते न राज्य कामयते, न स्वर्ग याचते न वा पुनर्जन्म वाञ्छति स केवल समस्तप्राणिना दु खनाशमभिवाञ्छति।

'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्'।।
'न त्वहं कामये राज्यं न स्वर्ग नापुनर्भवम्।
कामये दुःखतप्तानां प्राणिनामर्तिनाशनम्'।।

अनेकतायामेकतारूपभावो भारतीयसंस्कृतेरद्भुतवैशिष्ट्यम्। भारतीया मनीषिण· सर्वेषु प्राणिष्वेकस्यैव आत्मनो दर्शन कुर्वन्ति। भगवान् कृष्णो गीताया वदति—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।

सर्वगुणसमुज्ज्वलभारतीयसस्कृतिसमुपासकाना भारतीयमहापुरुषाणा जीवनगाथा सस्कृत एव सुगुम्फिता। गुरो., शिष्यस्य, मातापित्रो, पुत्रस्य, राज्ञ., प्रजायाश्चादर्शचरित्राणि सस्कृत एव सम्यक् चित्रितानि। यानि विज्ञाय न केवल भारतीया प्रत्युत वैदेशिका अपि स्वस्वचरित्रं परिमार्जयितुं समर्था भवेयुरिति। कस्मिन् वाङ्मये रामसदृशो राजा वर्तते यो हि लोकस्याराधनाय सहधर्मचारिणी सीतासदृशी स्वपत्नीमपि परित्यक्तु सहजत उद्यतो जात·। श्रीरामो वदति भवभूतिविरचित उत्तररामचरिताभिधाने नाटके—

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ।।

कस्मिन् साहित्ये सुमित्रासदृशी माता स्वपुत्रं लक्ष्मणेमेवमुपदिशति—

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवी विद्धि गच्छ तात यथासुखम् ।।

कस्मिन् साहित्ये भरतोपमा भ्रातर , हनुमत्सदृशा नि स्पृहसेवका , भीमार्जुनसमा वीरा , शिविदधीचिहरिश्चन्द्रसन्निभा राजान , कपिलगौतमकणादशङ्कराचार्यसन्निभा दार्शनिका , पाणिनिकात्यायनपतञ्जलिसदृशा भाषाविदो वैयाकरणा , जनकनन्दिनीसदृश· सतीनार्य , वाल्मीकिव्यासकालिदासादिसमा महाकवय ?

भारतीयसस्कृतौ षोडशसंस्काराणानापूर्व वैशिष्ट्यम् । संस्कारमन्तरा भारतीय-सस्कृते स्वरूपमवगन्तुं न पार्यते । तेषा समेषा सस्काराणा विधान सस्कृतभाषामाध्यमेनैव भवति समस्ते भारते । वेदा: सस्कृते निबद्धा , वेदानां मन्त्रैरेव समेषा सस्काराणा धार्मिक विधानं क्रियते । अखिले भारते नैका भाषा सन्ति । तत्तत्प्रदेशीया जना स्वमातृभाषयैव दैनन्दिन व्यवहारं समाचरन्ति । परन्तु सस्कारविधानकाले च सर्वे जना· (विशेषतो हिन्दूधर्मावलम्बिन) सस्कृतभाषामेवाश्रयन्ति । विभिन्नभाषाभाषिणामपि संस्कृतभाषानिबद्धवैंदिकमन्त्रैरेव समे सस्कारा सम्पाद्यन्ते । इत्थ सस्कृतस्याखिल-भारतीयस्थितिर्विद्यते ।

आध्यात्मिकभावनाया कृते भारतीया सस्कृतिर्विश्वविदिता । सा खलु भावना सस्कृतवाङ्मय एव विलसतितराम् । साख्ययोगन्यायवैशेषिकवेदान्तमीमांसादिषडास्तिकदर्शनेषु सर्वाशत आध्यात्मिकमेव चिन्तन जातम् । चराचरजगतो यादृश सूक्ष्म चिन्तन सस्कृतेऽभून्न तथाऽन्य वाङ्मये क्वचित् । चरमपुरुषार्थस्थ सिद्धये दर्शनाना चिन्तनमपरिहार्यम् । यावदात्मज्ञान न भवति तावन्न मोक्षावाप्ति । 'आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य ', 'ऋतेज्ञानान्न मुक्ति.', 'ब्रह्म सत्य जगन्मिथ्या सत्यं ब्रह्मैव नापर ' इत्याद्युद्घोषा प्रकारान्तरेण मोक्षमवाप्तुमेव प्रेरयन्ति ।

अन्ते वक्तुमिदं युज्यते सस्कृतभाषा निबद्ध भारतीयसस्कृतिस्वरूपं परिपूर्णतोऽवगन्तुं विशालसंस्कृतवाङ्मयस्यानुचिन्तनमपरिहार्यम् । विशाले वैदिकवाङ्मये, पौराणिकसाहित्ये धर्मशास्त्रीयदार्शनिकग्रन्थेषु काव्यजगति च भारतीयसंस्कृति. प्रतिबिम्बिता राजते । संस्कृतस्या-खिलं वाङ्मयं विशेषत प्राक्तनवाङ्मयन्तु भारतीयसंस्कृते· प्रख्यापकमेव । प्रसङ्गेऽस्मिन् वक्तुमिदं नितरां युक्त यत् संस्कृतभाषा भारतीयसंस्कृतेर्वाहिकाऽस्ति ।

भारतीयसविधाने षोडशभाषा राष्ट्रभाषात्वेन स्वीकृता, परञ्च तासु सर्वासु सस्कृत विहाय नास्त्येकाऽपि यस्या वैदिककालादारभ्याधुना यावद् भारतीयसस्कृते समाजस्य च सम्यक् चित्रण भवेत्। सस्कृतमन्तरा नास्त्यपरा भाषा या समस्त भारत-मैक्यसूत्रे निबद्धु क्षमा। अस्माकीने मते यथा समाजसस्कृत्योरविच्छिन्नसम्बन्धो यथा जातिव्यक्त्योरविनाभावसम्बन्धस्तथैव भारतीयसस्कृते सस्कृतस्य चाविनाभावसम्बन्ध। सस्कृतमन्तरा न भारतीयसस्कृते स्वरूपमप्यवधारयितु शक्यते, न वा भारतीयसंस्कृति विना सस्कृतस्य स्वरूप कल्पयितु पार्यते। एतत्सर्व मनसि निधाय अधोलिखिता सूक्तिर्यार्थार्थ्यमेव भजते—

यावद्भारतवर्षं स्याद्यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम्।।

●●

नीतिशतकपर्यवेक्षणम्

सस्कृतवाङ्मये नीतिग्रन्थपरम्पराऽन्यकाव्यविधापरम्परेव नितरा प्राचीना । तस्यामेव परम्पराया भर्तृहरिप्रणीतनीतिशतकमतिमहत्त्वमावहति । नीतिशतक नैतिकव्यावहारिकोपदेशाना भाण्डागारोऽस्ति । वस्तुततत् (नीतिशतकम्) दैनन्दिनजीवनोपयोगिना सुभाषितानामप्यमूल्यो निधि । नीतिशतके नैकनैतिकसिद्धान्ताना प्रतिपादनमस्ति, ये मानवजीवनस्य प्रतिक्षेत्र महनीयसाहाय्यरूपा भूमिका निर्वाहयन्ति । नीतिशतकगता उपदेशा शाश्वता सार्वजनीना जातिधर्मसम्प्रदायनिरपेक्षाश्च सन्ति । वस्तुतो जीवनस्याखिलाङ्गानि दृष्टिगतानि विधायैव तेषा रचना जाता । नीतिशतके व्यावहारिकजीवनोपयोगीन्यनेकविधानि सुभाषितानि नयनगोचरता यान्ति । नीतिशतकस्य वर्ण्यविषयाणा क्षेत्रमतिविशालमस्ति । तस्मिन्, मूर्खस्य, विदुष , दुर्जनस्य, सुजनस्य, दैवस्य, कर्मण , शौर्यस्य, शीलस्य, धनस्य, धैर्यस्य, परोपकारस्य, विद्याया , सत्सङ्गतेश्चाटुकारित्वस्य च नितरामाह्लादजनकानि वर्णनानि समुपलभ्यन्ते । अपरे विषया अपि तस्मिन् वर्ण्यता याता सन्ति । नीतिशतक मुक्तककाव्यविधाया गण्यते, येषामनुशीलनेन भर्तृहरेर्विविधविषयगतज्ञानस्यावबोधो जायते तथा कोऽपि तेषामध्ययनेन स्वजीवने महत्सौविध्य प्राप्तु शक्नुयात् । कतिपयोदाहरणान्युद्धृत्य कथ्यमिद विस्तरशः प्रकाशयितुं काम्यते ।

'तावत् शोभते मूर्खो यावत् किञ्चिन्न भासते' लोकश्रुति गतामुक्तिमिमां मनसि विधाय भर्तृहरिर्व्यञ्जनया कथयति यद् विधात्रा मूर्खाणा कृते मौनरूपमेतादृश छादन निर्मित यदाश्रयणेन मूर्ख स्वमौढ्याच्छादन विधातु समर्थ स्यात् । मौनरूपाच्छादन स्वाधीन, गुणयुक्तं विद्यते । पण्डिताना समाजे तु (सभायान्तु) तदाभूषणमिव मूर्खान् शोभयति—

स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ।।

(नी० श० ७)

अल्पज्ञे मनुष्ये स्ववैदुष्यस्याभिमानो जागर्ति । परन्तु शनै शनैर्विद्वज्जनसम्पर्कादवाप्ते च विशेषज्ञाने तदीयोऽभिज्ञानः सद्य एव चूर्णतां व्रजति । यथार्थमिदमधस्तने श्लोके शोभनरूपेण प्रकाशं यातम् —

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।

यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।।

(नी० श० ८)

अनेन श्लोकेन सारतत्त्वमिदमनायासेन समक्षमापतति यदज्ञ एव स्वल्पज्ञान-विषयेऽभिमानमाश्रयते न विशेषज्ञ ।

मूर्खस्य मूर्खतामपसारयितु नास्ति कश्चिदुपायो लोक इति तथ्य प्रकाशयितु भर्तृहरिर्ब्रूते यत् समेषा रोगाणा शास्त्रोक्तमौषधमस्ति परन्तु मौढ्यरोगस्य नास्ति शास्त्र-विहितमौषधम् । विभिन्नदृष्टान्तैर्भर्तृहरि स्पष्टयति यदग्निना जलस्य, छत्रेण सूर्यातपस्य, मदोन्मत्तगजराजस्य तीक्ष्णाङ्कुशेन, गोगर्दभयोर्दण्डेन, औषधसेवनेन रोगस्य, विभिन्नमन्त्रप्रयोगेण विषस्य निवारण कर्त्तु शक्यते परन्तु मूर्खस्य मौढ्य दूरीकर्त्तु न शक्यते—

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।।११।।

य साहित्य सङ्गीत कलाञ्च न जानीते स साक्षात्पशुरेव । भर्तृहरि स्ववर्ण्य प्रभावकर विधातुं व्यञ्जनया वृत्या कथयति यत् सङ्गीतादिविहीनो नर शृङ्गपुच्छविहीन· पशुरिव मूल्यहीनोऽस्ति । यद्युच्येत केनचिद् यत् पशुस्तु तृणमत्ति परन्तु मनुष्यरूप-पशुस्तु तृण नात्ति, भर्तृहरिर्व्यनक्ति यत्तृणाभक्षणमीदृशानां पशूनां (मूर्खाणा) वास्तविकपशूना कृते हितकरमेव—

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।।१२।।

साधारणतो धनधान्यादिसमृद्धिशालिनो जना (राजान) आश्रयदातृत्वेन विदुष प्रत्यभिमानं दधति । ईदृशान् राज्ञ (धनाढ्यजनान्) प्रति भर्तृहरिर्ब्रवीति यद् राजभि· कदापि विद्वांसो नावमन्तव्या यतो हि ते खल्वीदृशविद्याना गुप्तं धन धरन्ते यददृश्यं, कल्याणकरं व्यवस्थाया वर्धनशीलं शाश्वतमक्षुण्णञ्चास्ति—

कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनम् ।
येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ।।१६।।

यथा कुपितोऽपि ब्रह्मा हसस्य नीरक्षीररूपा विवेकशक्तिं कथमपि हर्त्तु न क्षम-स्तथैव कुपितोऽपि राजा विद्वास विविधदण्डैर्दण्डयितु समर्थ· स्यात्, परन्तु स विदुषो

जन्मजात वैदुष्यमपहर्त्तुं न क्षम स्यात्—

अम्भोजिनीवनविहारविलासमेव
हंसस्य हन्ति नितरा कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्त्तिमपहर्तुमसौ समर्थः ।।१८।।

अधस्तने श्लोके वाणीरूपस्य (विद्यारूपस्य) आभूषणस्य यथार्थता साधयितु भर्तृहरि· प्रतिपादयति यत् केयूराद्याभूषणानि क्षीयमाणानि सन्ति तथा तानि न तथा पुरुष भूषयन्ति यथा वाग्भूषणम्—

क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।१९।।

सस्कृतवाड्मये सत्सङ्गस्य महत्त्वमङ्गीकृतं तत् प्रशक्तिश्चानेकत्र कृता विभाति । 'ससर्गजा दोषगुणा भवन्ति' अर्थात् सत्सङ्गाद् गुणा· कुसङ्गाच्च दोषा भवन्ति' इति सदुक्तिमनुसृत्य सत्सङ्गतिरेव मानवकृते हितापहाऽस्ति न कुसङ्गति । मानवै सदा सत्सङ्गतिरेवाश्रयणीयेति मनसि निधाय नीतिविशारदो भर्तृहरि सत्सङ्गत्या गुणान् वर्णयति तथाऽन्त तउद्घोषयति यत्सङ्गत्या सर्वाभीष्ट साधयितु शक्नोति मनुज । सत्सङ्गतिर्बुद्धेर्जडता हरति, वाण्या सत्य निवेशयति, सम्मानवृद्धि जनयति, पापं दूरीकरोति, मानस प्रसादयति, सर्वासु दिक्षु च कीर्ति विस्तारयति, वस्तुत· सत्सङ्गत्या किमभीष्टमवापु न शक्यम् ?—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ।।२३।।

महाकविना भर्तृहरिणा निम्नाङ्किते श्लोके निर्दिष्टा कल्याणमार्गा नून मानवाना कृते कल्याणप्रदा । तेषा समाश्रयणेन मनुष्यो निश्चितरूपेण स्वीय व्यापक हित विधातु समर्थः स्यात् । प्राणिहिसाया विरति , परसम्पत्तिहरणान्निवृत्ति·, सत्यवादित्व, समये स्वशक्त्यनुसार दान, स्त्रीविषयकचर्चाया मौनाश्रयण, लोभावरोधः, गुरुजनान् प्रति विनयश्च निर्विवादरूपेण मानवकल्याणकरा मार्गा· सन्ति—

प्राणघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ।।२६।।

कार्यसम्पादनदृष्ट्या भर्तृहरिणा मनुष्याणा कृत श्रेणीत्रियत निश्चितरूपतया प्रभावकर युक्तञ्च विद्यते—

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ।।२७।।

सज्जनै समाश्रित कर्मव्रत खड्गधारेव तीक्ष्णं वर्तते । तद्व्रत नूनमतिकठिनम्—

'सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्' ।।२८।।

महाकविभर्तृहरिर्विभिन्नस्वभाववर्णने नितरा प्रवीण । श्लोकेऽस्मिन् कुक्कुरस्य हस्तिनश्च माध्यमेन क्षुद्रजनस्य स्वाभिमानिनश्च सहजस्वभाववर्णन सुतरां मनोहरं यथार्थञ्चास्ति । एकत श्वा स्वभोजनदातु समक्ष पुच्छचालन तच्चरणावपात तथा धरण्यां पतित्वा निजमुखमुदरञ्च दर्शयति परन्त्वेतद्विपरीतं गजराज स्वसमक्ष स्वामिद्वारा समानीतं खाद्यपदार्थ गम्भीर पश्यति' । शतशोऽभ्यर्थ्यमानश्च सन् भुङ्क्ते । श्लोकेनानेन चाटुकाराणा स्वाभिमानिनाञ्च स्वभाववर्णनमत्यत्त प्रभावकरमस्ति—

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ।।३१।।

ससारे धनस्य महिमाऽपूर्वोऽस्ति यतो हि तेनाकुलीनोऽपि कुलीनोऽपण्डितोऽपि पण्डितोऽमर्मज्ञोऽपि मर्मज्ञोऽगुणज्ञोऽपि तथा गुणज्ञो मन्यते जनै । सर्वे गुणाः काञ्चनमेवाश्रयन्ति—अर्थात् सर्वगुणानां मूल धनमस्ति—

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ।।४१।।

ससारे विकासस्य हेतूनां ज्ञान यथाऽऽवश्यकन्तथैव विनाशस्य कारणानामपि बोधोऽप्यपेक्षित । अधोलिखिते श्लोके केन हेतुना को विनश्यति? इति प्रश्नस्य समाधिरत्यन्त क्षेमकर । भर्तृहरिमते कुमन्त्रणात् राज्ञ , आसक्ते संन्यासिन , लाल-

नात्पुत्रस्य, अनध्ययनाद् ब्राह्मणस्य, कुपुत्रात् वंशस्य, दुर्जनसेवनात् सदाचारस्य, मदिरापानात् लज्जाया , अनन्वेक्षणात् कृषे , परदेशवासात् स्नेहस्य, प्रेमाभावात् मैत्र्या , अनीते समृद्धे , प्रमादपूर्वकव्ययाद् धनस्य च विनाशो भवति। एकस्मिन्नेव श्लोके बहूना नाशहेतुत्ववर्णन नितरां महनीयम्—

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षाणादपि कृषिः स्नेहः प्रवासाश्रया–
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ।।४२।।

ससारे राजनीतेर्नास्ति किञ्चित् सुनिश्चित रूपम्। विभिन्नावसरेषु तस्या स्वरूपवैविध्यं दृश्यतेतराम्। भर्तृहरिमते राजनीतिर्वेश्येव परस्परविरोधिस्वरूप धरते। तस्या (राजनीत्या) कदाचित्सत्याश्रयण क्वचिदसत्याश्रयण, क्वचित्परुषत्वाङ्गीकरणं, क्वचिच्च प्रियवादित्वाङ्गीकरण, क्वचिद् हिंसाया क्वचिद् दयायाश्च समाश्रयण क्रियते। क्वचिदर्थपरता दृश्यते पुन· क्वचिदुदारत्व विलोक्यते, क्वचिन्नित्यव्ययता क्वचिच्च धनागमश्च दृष्टिगोचरतां यान्ति—

सत्याऽनृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चाऽर्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ।।४७।।

निम्नाङ्किते पद्ये भर्तृहरिणा अगुणापेक्षयां लोभस्य, पातकापेक्षया पिशुनताया , तपोऽपेक्षया सत्यस्य, तीर्थापेक्षया मन शुद्धे , गुणापेक्षया सौजन्यस्य, मण्डनापेक्षया महिम्न·, अन्यधनापेक्षया विद्याधनस्य, तथा मरणापेक्षयाऽपयशसोऽधिकमाहात्म्य प्रख्यापयति। अर्थात् तन्मते लोभ , पिशुनता, सत्य, मन शुद्धि., सौजन्य, महिमा, विद्याधनम्, अपयशः क्रमशोऽगुणात्, पातकात्, तपस., तीर्थात्, गुणात्, मण्डनात्, भौतिकधनात्, मरणाच्चाधिको हानिकरा जायते मानवानां कृते—

लोभश्चेदगुणेन किं पिशुनता यद्यास्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ।।५५।।

'लोके सेवाधर्मो नितान्तकठिनो विद्यते इति सर्वे जानन्ति। तपस्विनामपि कृते

सेवाधर्मपरिपालन दुष्करमेव' इति तथ्य प्रकाश नेतु कवि प्रभावोत्पादिका शैली-माश्रित्य कथयति यत् सेवको मौनाश्रयणात् स्वाम्यादिभिर्मूक , प्रवचनपाटवाद् वाचालो, बहुभाषी वा, सान्निध्यवासाद् धृष्टो दूरवासाद् बुद्धिहीन , क्षमाश्रयणात् कायरोऽ-सहनकरणादकुलीनश्च मन्यते। सेवकस्यैतादृशी स्थिति सेवकवृत्त्याश्रयणाद् भवति—

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाऽप्रगल्भः।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।।५८।।

अधस्तने पद्ये महात्मनां स्वाभाविकगुणाना वर्णन कीदृशमाह्लादजनकमस्ति। महात्मानो विपत्तौ धैर्य, अभ्युन्नतौ क्षमा, सभाया वाक्पटुत्व, युद्धे पराक्रमं, यश-प्राप्त्यै कामना, वेदाध्ययन उद्योगञ्च समाश्रयन्ति—

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।६३।।

सज्जना सत्पात्रेभ्यो गुप्तरूपेण धन ददति। दत्वा च तत्प्रचार न कुर्वन्ति, गृहमागतमतिथि सत्कुर्वन्ति, कस्यचित्प्रिय (हित) विधायापि न तद्वदन्ति, स्वम्प्रत्यन्य-कृतमुपकार सभायामपि नि सङ्कोच वदन्ति, स्वसम्पत्तिकाले गर्व न धारयन्ति, पर-चरित्रवर्णने निन्दां नाश्रयन्ति, एतत्सर्वाणि समुल्लेख्यानि कृत्यानि सज्जना स्वयमेव सम्पादयन्ति। कस्यचित् प्रेरणाभाव एव ते तीक्ष्णखड्गधारेव कठोर व्रतं पालयन्ति—

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चात्युपकृतेः।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ।।६४।।

घनवृक्षसज्जनदृष्टान्तेन परोपकारिणा जनानां सहजस्वभाववर्णनमप्रतिमरूपेणा-कर्षकं भव्यञ्चास्तेऽधोलिखिते पद्ये—

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।

अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ।।७१।।

अधोऽङ्किते श्लोके प्रतिपादित सन्मित्रस्यातिभव्य लक्षणं क न प्रभावयति?—

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।७३।।

परहितसम्पादनदृष्ट्या मनुष्याणा (दुर्जनाना) श्रेणीचतुष्टयस्य स्वरूप ज्ञापयितु भर्तृहरिर्वदति यत्प्रथमश्रेण्यां ते महापुरुषा· परिगण्यन्ते ये स्वार्थ विहाय परार्थ साधयन्ति । द्वितीयश्रेण्या त आपतन्ति ये स्वार्थसाधनेन साकं परार्थमपि साधयन्ति । तृतीयश्रेण्याश्च तेषा मानुषराक्षसानां गणना क्रियते ये खलु स्वार्थाय परार्थ नाशयन्ति । श्रेणीत्रयगताना नराणां व्यक्तिरिक्ता ईदृशा अपि नराधमा. सन्ति ये निरर्थकमेव परहित विघ्नन्ति—तेषा गणना कस्यां श्रेण्यां क्रियेत ?—इति न ज्ञायते । श्लोकेऽस्मिन् कारणमन्तरैव परहितहननशीलानां जनाना दुष्कृत भृशं गर्हितम्—

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।।७५।।

भर्तृहरिणा 'विद्याविहीन. पशु.' इति प्रतिपादयितुं विद्याया अनेकान् गुणान् निम्नाङ्किते श्लोके वर्णयति । तन्नून हृदयावर्जक समाकर्षकश्च—

विद्या मनुष्यस्य विशेषं रूपमस्ति तच्चातिगुप्तं धन विद्यते तच्चौरैरपि न हार्य भवति, विद्या भोग यश सौख्यञ्च प्रदत्ते । विद्या गुरूणामपि गुरुरस्ति विदेशगमनकाले-विद्या बन्धुवत् साहाय्य विधत्ते । विद्या समुत्कृष्टको देवोऽस्ति । विद्या राजभिरपि पूज्यते न हि धनं पूज्यते । वस्तुत एतादृशगुणसम्पन्नया विद्यया हीनो मनुष्यः पशुरेवास्ति—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ।।२०।।

'शील पर भूषणमिति कथ्यं स्पष्ट प्रकाशं नेतु कवि कस्य किमाभूषणमिति वर्णयति पद्येऽस्मिन्। तदनुसार सौजन्यमैश्वर्यस्य, वाक्यसयम शौर्यस्य, शान्तिर्ज्ञानस्य, विनम्रता विद्याया (शास्त्रज्ञानस्य), सुपात्रदान धनस्य, क्रोधविहीनता तपस्याया , समर्थप्रभो क्षमा, धर्मस्य निश्छलत्व च भूषण भवति। परन्तु सकलानामैश्वर्यादीनामपि श्रेष्ठमाभूषणं शील (सद्वृत्तम्) अस्ति। न केवलमेतावदेव शीलनामकमाभूषणं समस्ताभूषणानां सुजनतादीना कारणभूतमस्ति यतो हि शील विना सुजनातादयो नोत्पद्यन्ते—

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।।८३।।

'न्यायपथमारूढा धैर्यशालिनो निन्दा, स्तुति, लक्ष्मीगमनागमन, सद्यो युगान्तरे वा मरणमनपेक्ष्यैवाविचलरूपेण न्यायपथपथिका भवन्ति' द्रष्टव्यमेतद्विषय चारुचित्रमधस्तने श्लोके—

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।८४।।

वस्तुतो नीतिशतकमेतादृशो ग्रन्थोऽस्ति यद्गता उपदेशा जनताजनार्दनस्य हृदयहारतां याता सन्तो नितान्त लोकप्रियत्वमवाप्ता। प्रबुद्धा जनाः पदे-पदे नीतिशतकगतानुपदेशानुद्धरन्ति। तदङ्कितानि सुभाषितानि तु मानवजीवनयात्राया सम्बलरूपतयैव जातानि। तेषां कतिपयानि विशिष्टानि निम्नाङ्कितानि सन्ति—

(१) ज्ञानलवदुर्विदग्ध ब्रह्माऽपि तं नरं न रञ्जयति।

(२) विभूषण मौनमपण्डितानाम्।

(३) नहि गणयति क्षुद्रो जन्तु परिग्रहफल्गुताम्।

(४) विवेकभ्रष्टानां भवति विनिपातः शतमुख।

(५) मूर्खस्य नास्त्यौषधम्।

(६) कवयस्त्वर्थं विनापीश्वरा.।

(७) विद्याविहीनः पशुः।

(८) क्षीयन्ते खलु भूषणानि सतत वाग्भूषण भूषणम्।
(९) सत्सङ्गति कथय किं न करोति पुसाम्।
(१०) न खलु वयस्तेजसो हेतु ।
(११) प्रारब्धमुत्तमजना न परित्यजन्ति।
(१२) सता केनोद्दिष्ट विषममसिधाराव्रतमिदम्।
(१३) सर्वः कृच्छ्रगतोऽपि वाञ्छति जन· सत्त्वानुरूपं फलम्।
(१४) स जातो येन जातेन याति वश. समुन्नतिम्।
(१५) सर्वे गुणा. काञ्चनमाश्रयन्ति।
(१६) वाराङ्गनेव नृपनीतिरनेकरूपा।
(१७) दुर्जन. परिहर्तव्यः विद्ययालङ्कृतोऽपि सन्।
(१८) छायेव मैत्री खलसज्जनानाम्।
(१९) होतारमपि जुह्वान स्पृष्टो दहति पावक ।
(२०) सेवाधर्म परमगहनो योगिनामप्यगम्य ।
(२१) अनुद्धता सत्पुरुषा समृद्धिभि ।
(२२) सन्त· स्वय परहिते विहिताभियोगा ।
(२३) विभाति काय करुणापराणा परोपकारैर्न तु चन्दनेन।
(२४) न निश्चितार्थाद्विरमन्ति धीरा ।
(२५) शीलं परं भूषणम्।
(२६) मनस्वी कार्यार्थी गणयति न दु खं न च सुखम्।
(२७) न्याय्यात् पथ. प्रविचलन्ति पदं न धीराः।
(२८) नास्त्युद्यमसमो बन्धुः।
(२९) आलस्य हि मनुष्याणा शरीरस्थो महान् रिपु ।
(३०) सन्तः सन्तप्यन्ते न दुःखेषु।
(३१) कर्मायत्तं फलं पुंसाम्।
(३२) रक्षन्ति पुण्यानि पुराकृतानि।

(३३) तेजस्विन सुखमसूनपि सन्त्यजन्ति सत्यव्रतव्यसनिन न पुन प्रतिज्ञाम्।

एतदत्रावश्यमेवावधेयम्। यद्यपि नीतिशतकाभिधानग्रन्थो नीतिप्रकाशनपर एवास्ति। तथापि तस्य स्थिति शुक्रनीतिचाणक्यनीतिप्रभृतय इव नास्ति। नीतिशतकं वस्तुतो मुक्तकाव्यविद्याया परिगण्यते। अतस्तस्मिन् काव्यसौन्दर्यमपि राजतेतराम्। तस्मिन् छन्दसामलङ्काराणा विशद प्रयोग। स्वल्पकायात्मके ग्रन्थेऽस्मिन् चतुर्दशछन्दसां प्रयोगो जाता येषु शार्दूलविक्रीडितछन्दोऽधिकरूपेण प्रयोगं यातम्। शार्दूलविक्रीडितछन्द समाश्रित्यैव भर्तृहरिरेकस्मिन्नेव श्लोके नैकप्रतिपाद्यविषयाणा समावेशः कृत।

नीतिशतकेऽलङ्कारसमावेशोऽपि नितान्त चारुतरः। भर्तृहरिणा स्वकविताकामिनीमलङ्कर्तुं विविधा अलङ्कारा प्रयुक्ता। अनुप्रासच्छटा तु पदे-पदे नयनगोचरता याति। साधर्म्यमूलकालङ्कारनिवेशे भर्तृहरिकाव्यचातुर्य निरतिशयेन प्रकाशते। उपमाया प्रयोगो बाहुल्येन यात। उपमेतरालङ्कारेषु रूपकदृष्टान्तातिशयोक्तिसमासोक्तिनिदर्शनाऽर्थान्तरन्यासप्रभृतीना विद्यमानतया नीतिशतके मनोहरं काव्यसौन्दर्य निविष्टम्।

एव विविधविषयकमहनीयनीतिवचनदृष्ट्या नीतिशतकमेकतो स्वपाठकान् सम्यग् दिशानिर्देश विधत्ते पुनरपरत स्वकाव्यगतसौन्दर्येण सहृदयजनचित्तचञ्चरीकं रससिक्तञ्च कुरुते। नून नीतिशतकमिद स्वीयमहनीयवैशिष्ट्यात् चिरकाल यावत् प्रभावा भारित त्स्थास्यतीये।

●●

राजकविर्भर्तृहरिः

संस्कृतमहाकवीना मध्ये महाकविभर्तृहरेर्नाम सादर गृह्यते सहृदयजनै । 'कीर्त्तिर्यस्य स जीवती'ति तथ्यमङ्गीकुर्वद्भिर्भारतीयैर्मनीषिभिर्महाकविभिर्यश शरीर कामयमानै स्वमहनीयकृतिभिरजरताऽमरता चाधिगता । तन्मते जीवनवृत्त न महत्त्वपूर्णम् । अत एव तै स्वजीवनवृत्तविषये प्रायश किमपि न लिखितम् । तत्परम्पराया महाकविभर्तृहरिरपि स्वजीवनविषये स्पष्टतो न किमपि कथितम् । फलतस्तस्य जीवनवृत्तं नानाविधकिंवदन्तीभिर्जनश्रुतिभिर्लोकवृत्तान्तैश्च समावृतम् । बाह्याभ्यन्तरसाक्ष्यैरेव तज्जीवनवृत्तविषये किमपि परिज्ञातु शक्यते ।

विश्वविदितवैदेशिकपर्यटकश्रीइत्सिङ्गमते वाक्यपदीयकारो भर्तृहरिर्बौद्धमतावलम्बी आसीत् तथा तस्य निधनं सप्तमशताब्द्या उत्तरार्द्धे एकपञ्चाशदुत्तरषट्शततमे (६५१ तमे) वर्षेऽभूत् । मैक्समूलरप्रभृतयो विद्वांसो वाक्यपदीयकारं भर्तृहरिमेव शतकत्रयस्य कर्त्तारं भर्तृहरिं मन्यन्ते । एतादृशै पण्डितैर्भर्तृहरेर्बौद्धमतावलम्बित्वमपि स्वीक्रियते । परन्तु शतकत्रयस्य विवेचनेन भर्तृहरिर्वैदिकमतावलम्बितयाऽद्वैतवेदान्तसिद्धान्तसमर्थक प्रतिभाति । शतकत्रये वैदिकादर्शमूलकभारतीयसंस्कृतिविचारधारैव परिलक्ष्यते । अपरे केचिद् विद्वांसो भट्टिकाव्यस्य कर्तु. महाकविभट्टेर्भर्तृहरेरभिन्नता मन्यन्ते । कविभट्टेर्वैष्णवता भर्तृहरेश्च शैवता मतस्यास्य स्वीकरणे बाधकत्वेन समायात· । इत्थमेव मन्दसौरशिलालेखोल्लिखितस्य बलदपट्टेर्भर्तृहरेश्चाभिन्नताऽपि स्वीकर्त्तु न युज्यते । एवमेव 'वाक्यपदीयकारो भर्तृहरिर्महाकविभर्तृहरिश्चैक इति मतस्यापि पूर्वैव गति· ।

भर्तृहरिजीवनवृत्तविषये किवदन्त्योऽप्यपूर्वा भूमिका निर्वाहयन्ति । ता समाश्रित्य समधिका विद्वांस· शतकत्रयस्य रचयितार भर्तृहरिं मालवनरेश मन्यन्ते । तदनुसारं भर्तृहरे पितृनाम गन्धर्वसेन आसीत् । तस्य भार्याद्वयमभूत् । एकस्या भर्तृहरिर्द्वितीयायाश्च विक्रमादित्यो जन्म गृहीतवन्तौ । विक्रमादित्यस्य मातामहो धारानरेश पुत्रहीनोऽभूत् । तेन (धारानरेशेन) स्वदौहित्रविक्रमादित्येन सार्ध भर्तृहरिरपि सुशिक्षया समलङ्कृतो विहित. । विक्रमादित्यानुरोधमनुश्रित्य भर्तृहरिर्धारानरेशस्योत्तराधिकारित्वमङ्गीचकार । विक्रमादित्य· सम्राजो भर्तृहरेर्मन्त्रित्वमुरीकृत्य तत्साहाय्यं विदधौ प्राशासनिके कार्ये । भर्तृहरि· शनैः शनै· राजमदेन विषयासक्ति गत. । अन्ततस्तस्मिन् वैराग्यबुद्धि· समुत्पन्ना । कि वदन्तीगतं तथ्यमिद मनसि निधाय मन्यते यद् विषयासक्तिदशायां भर्तृहरि , शृङ्गारशतक तथा वैराग्यदशायां वैराग्यशतकञ्च विरचयामास ।

विषयेऽस्मिन् नि सन्दिग्धरूपेण किमपि निर्णेतु न पार्यते । अद्यापि भर्तृहरि-

लोकगीतैर्दन्तकथाभिश्च जनताजनार्दनस्य स्मृतिपथमारूढो राजतेतराम्। वस्तुतः राजकविभर्तृहरिजीवनवृत्तादिविषये गवेषणाऽपेक्ष्यते।

जीवनवृत्तमिव भर्तृहरे स्थितिकालोऽपि विविधमतमतान्तरकारागारनिबद्धः। चेत् कहरूरयुद्धे हूणविजेतुर्विक्रमादित्यस्य ज्येष्ठभ्रातृत्वेन भर्तृहरि स्वीक्रियेत, तदा तस्य स्थितिकाल षष्ठशताब्द्या पूर्वार्द्ध सिध्यति। इत्सिङ्गमताङ्गीकारे तस्य स्थिति सप्तमशताब्द्या पूर्वभागे स्वीकर्तु युज्यते। सप्तमशताब्द्या अन्तिमे भागे विराजमानामरुकविरचितशृङ्गारपरकपद्येषु भर्तृहरिकवित्वप्रभावमभिलक्ष्य वक्तुमिदं समीचीन यद् भर्तृहरिरमरुकपूर्ववर्ती आसीत्। नवमशताब्द्या उत्तरार्धे स्थितेन ध्वन्यालोककारेणापि ध्वन्यालोके समुद्धृतानि पद्यानि भर्तृहरेस्तत्पूर्ववर्तित्वमेव साधयन्ति।

नीतिशतकस्य कानिचित् पद्यानि शाकुन्तले (भवन्ति नम्रास्तरव.), मुद्राराक्षसे (प्रारभ्यते न खलु), पञ्चतन्त्रादौ (शशिदिवाकरयोर्ग्रहपीडनम्., दान भोगो नाश , तानीन्द्रियाणि) समुपलभ्यन्ते। ईदृशपद्यानां मूलरचयितृविषये विदुषां परस्परं मतभेद। बहुसख्याका पण्डिता. स्वीकुर्वन्ति यद् भर्तृहरिस्तत्तदग्रन्थेभ्यस्तथाकथितानि पद्यानि स्वग्रन्थेषु समुद्धृतानि। चेत् शाकुन्तले नीतिशतकात् 'भवन्ति नम्रा' इत्यादिपद्यानामुद्धरणं स्वीक्रियेत तदा भर्तृहरे स्थितिः कालिदासादपि पूर्ववर्तिनी स्वीकरणीया भवेत्। वैदिकवाङ्मयस्य सुविख्यातेन विदुषा युधिष्ठिरमीमासकेन वैक्रमाब्दात् पूर्वमेव भर्तृहरिस्थितिसमयोऽभिमन्यते।

सर्वाणि तथ्यानि दृष्टिगतानि कृत्वा वक्तुमिद नासमीचीनं यद् भर्तृहरे· स्थितिकालस्य पूर्वसीमा प्रथमशताब्दी तथा परसीमा सप्तमशताब्दी भवितुं शक्नुयाताम्।

केचिद् विद्वास शतकत्रयस्य रचयितुर्वाक्यपदीयस्य च कर्तुरभेदं मत्वा वाक्यपदीयमहाभाष्यदीपिकाप्रभृतिग्रन्थानामपि रचयितारं भर्तृहरिं मन्यन्ते। परन्तु विषयेऽस्मिन् विवादात् साक्ष्याभावाच्च निर्णयाभावदशायां निम्नाङ्कितशतकत्रयमेव निर्विवादरूपेण भर्तृहरिलेखनीप्रसूतं मत्वा विचारः क्रियते—(१) शृङ्गारशतकम् (२) नीतिशतकम् (३) वैराग्यशतकमञ्च।

(१) शृङ्गारशतकम्

नामानुसारं शतकग्रन्थेषु शतश्लोकैरेव भाव्यम्, परन्तु शतकत्रये नास्तीदृशी स्थितिः। शृङ्गारशतके शताधिका श्लोका प्राप्यन्ते। अस्मिन् शतके नारीणामेतादृश समाकर्षकं रूपमुपवर्णितं येन महान्तोऽपि पुरुषा हठात् समाकृष्टा भवितुं शक्नुवन्ति। शतकेऽस्मिन् युवकयुतीनां प्रणयक्रीडानां भामिनीना हावभावकटाक्षादिविविधकामदशानां च चारुचित्रणं विद्यते येन कवेः शृङ्गारमयानुभूतीनां यथार्थप्रकाशनं जायते। शृङ्गाररसासिक्तोक्तयः सहृदयजनसरसचित्तानि हठात् रसाप्लावितानि विदधाति।

(२) नीतिशतकम्

भर्तृहरिकृत्त नीतिशतक, नीतिमणिमुक्तानामीदृश कण्ठहारोऽस्ति यो दीर्घ-कालादधुना यावत् सहृदयजनकण्ठस्थो भूत्वा तेषा कण्ठशोभा वर्धयन् भ्राजते। जीवनस्य प्रत्येकक्षेत्रस्य सुसम्भावितपरिस्थिति दृष्टिगता विधाय शतकमिद विरचितम्। अस्मिन् मानवीयव्यावहारिकजीवनस्य बहूनि बिम्बानि प्रतिबिम्बितानि। मङ्गलाचरणमपहाय नीतिशतके दशपद्धतीनामन्तर्गते वर्ण्यविषया वर्णिता सन्ति। दशपद्धतय सन्ति—

(१) मूर्खपद्धति (२) विद्वत्पद्धति (३) मानशौर्यपद्धति (४) अर्थपद्धति (५) दुर्जनपद्धति (६) सुजनपद्धति (७) परोपकारपद्धति (८) धैर्यपद्धति (९) दैवप्रशसा (१०) कर्मपद्धति ।

नीतिशतके मूर्खेण साक विदुष , दुर्जनेन सह सुजनस्य, दैवेन सार्ध कर्मणश्च भव्यानि चित्राणि तु चित्रितान्येव तस्मिन् धनमानशौर्यविद्यासत्सङ्गतिपरोपकारचाटु-कारिताप्रभृतिसम्पृक्तानि सदुक्तिचित्राण्यपि समुपलब्धानि। नीतिशतकेऽनेकनैतिकसिद्धान्ता प्रतिपादिता यैर्मानवजीवनस्य सर्वस्मिन् क्षेत्रे साहाय्यमधिगन्तु शक्यते। ते सर्वाशत शाश्वता , सार्वजनीना, धर्मजातिसम्प्रदायनिरपेक्षाश्च सन्ति। ते मानवजीवनस्य कृते नीतिनैपुण्योपदेष्टार सन्त शिक्षयन्ति यद् व्यावहारिककौशलमवाप्य्यैव मानव स्वजीवने साफल्यमधिगन्तु शक्त·।

नीतिशतक नैतिकव्यावहारिकोपदेशानां निरुपमभाण्डागारता भजते। तत्तु सुभाषिताना विशालो निधि:। तस्य लोकप्रियता साधारणजनेष्विव विद्वज्जनेष्वपि तथैव विराजमाना तिष्ठति यथा महाकवितुलसीदासस्य रामचरितमानस हिन्दीभाषाभाषिक्षेत्रेषु समानरूपेण सर्वजनहृदयासने राजमानमास्ते। नीतिशतकमाश्रित्य तदनन्तर दृष्टान्त-शतकबल्लालशतकप्रभृतीनि ग्रन्थरत्नानि विरचितानि जातानि।

(३) वैराग्यशतकम्

वैराग्यशतकेऽपि शताधिका श्लोका सन्ति। अस्याध्ययनेन भर्तृहरेर्वैराग्यमयजीवनस्य विम्ब नयनगोचरता समागच्छति। इत्थ प्रतीयते यत्कविर्जीवनस्य क्षणभङ्गुरता तथा ससारस्यासारता सम्यगवबुध्य वैराग्यमूलक जीवन यापयितु कामयते। ग्रन्थेऽस्मिन् ससारस्य जटिलता, वैभवस्य निरर्थकता, भोगतृष्णाया विभीषिका च नैसर्गिकरूपेण चित्रिता येनेत्थ प्रतिभाति यत्कविरखिल विश्व वैराग्यमय विधातु चेष्टमानोऽस्ति। कविमते सन्तोष एव परम सुखमस्ति। तदवाप्तये वैराग्यभरित जीवनमपेक्ष्यते। अस्मिन् शान्तरसस्यानेकानि सुतरा मनोहराणि समुदाहरणानि सुलभ्यानि यानि परवर्तिमम्मटादिग्रन्थेषु समुद्धृतानि।

भर्तृहरिविरचितशतकत्रयाध्ययनेन नि.सङ्कोचं वक्तु युज्यते यद् भर्तृहरौ तेषा समेषा

महनीयानामुदात्तानाञ्च गुणाना सत्ता येषामपेक्षाऽलौकिककाव्यजगद्विधातरि कवौ क्रियते। भर्तृहरिणा स्वीया मान्यता, सिद्धान्त, व्यावहारिकानुभव च जनसमक्ष समुपस्थापयितु काव्यात्मिका सरसा सरला च शैली समङ्गीकृता। स प्रभुसम्मित शास्त्रीयमुपदेश सुहृत्सम्मित पौराणिकमुपदेश च विहाय कान्तासम्मितोपदेशमेव महनीय मन्यमान स्वरचनयानेकव्यावहारिकोपदेशान् अप्येव समुपस्थापितवान् येन काव्यानन्दाप्लावितपाठकाना सरसचित्तानि तद् ग्रहीतु सहजत एव प्रवृत्तानि भवन्ति।

भर्तृहरे काव्यशैली नितान्त सरसा, सरला, हृदयग्राह्या चास्ति। प्रतिपाद्य-विषयसुप्रतिपादनकौशलमण्डिता तस्य शैली वर्णनीयविषयम्प्रति सरसजनचित्तचञ्चरीकं सद्य एव समाकर्षति। सस्कृतवाङ्मयपयोधिमन्थनतत्परो वैदेशिको विद्वान् डॉ० ए० बी० कीथमहाभाग स्वीयसस्कृतसाहित्येतिहासनामके ग्रन्थे कथयति—

'भर्तृहरिकाव्ये प्रत्येकपद्य सामान्यत स्वत एव परिपूर्णम्। तत्तु शृङ्गारविषयक, वैराग्यविषयक नीतिविषयक वा भाव रुचिमयपरिष्कृतरूपेण सर्वाशत प्रकटयति'।

भर्तृहरि· कटुविषयमपि स्वशैलीमाधुर्येणेत्थ रुचिकर कुरुते येन कटुतामापन्नो विषयोऽपि सहृदयहृदयग्राह्यता व्रजति। एतादृशस्थलेषु तस्य व्यङ्ग्यात्मिका समुत्कृष्टा शैली दरीदृश्यते। मौनप्रशस्तिमाध्यमेन व्यञ्जिता मूर्खनिन्दा पद्येऽस्मिन् सुष्ठु दर्शनीया—

स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥

(नी० श० ६)

साहित्यसङ्गीतकलाविहीनमनुष्यमभिलक्ष्य कृत तीक्ष्यव्यङ्ग्यमिद क न चमत्करोति?

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

(तदेव १२)

भर्तृहरि स्वकविताकामिनी नानाविधालङ्कारैरपि विभूषयितुं सफल प्रयतते। सादृश्यमूलकालङ्कारप्रयोगे तत्काव्यचातुरी सुतरां श्लाघ्या। उपमालङ्कारस्य कानिचिद् भव्यानि चित्राणि द्रष्टव्यानि—

नानाफलैः फलति कल्पलतेव भूमिः। (नी० श० ४६)

वाराङ्गनेव नृपनीतिरनेकरूपा। (नी० श० ४७)

छायेव मैत्री खलसज्जनानाम्। (नी० श० ६०)

प्रथमपद्यभागे भूमेः कल्पलतया द्वितीये राजनीतेर्वाराङ्गनया, तृतीये च दुर्जन-

मैत्र्या छायया च कृता—उपमा कीदृश्याह्लादकरी प्रभावशालिनी चेति सहृदया एव विचारयन्तु। उपमा विहाय रूपकदृष्टान्तातिशयोक्तिसमासोक्तिनिदर्शनार्थान्तरन्यास-प्रभृतयोऽप्यलङ्कारा कविकाव्यकलाप्रयोगविषयतामधिगत्य कृतार्थता याता —

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति।।

(नी० श० ४१)

श्लोकेऽस्मिन् अर्थान्तरन्यासस्य —

अधिगतपरमार्थान् पण्डितान् माऽवमंस्था-
स्तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विसतन्तुर्वारणं वारणानाम्।।१७।।

इत्यस्मिन् च दृष्टान्तस्य मनोहारिणी छटा नूनमेव हृदयनन्दकरी।

भर्तृहरिश्छन्दःप्रयोगेऽपि नितरा नैपुण्य भजते। तत्काव्येषु अनुष्टुप्शिखरिणी-वसन्ततिलकाशार्दूलविक्रीडितप्रभृतीनि छन्दासि दृष्टिगोचरता यान्ति येषा सफल प्रयोगो जातः। तेष्वपि शार्दूलविक्रीडितछन्दः सर्वाधिकप्रयोगता गतं राजते।

भर्तृहरे. काव्यभाषा प्रसादमयी। तस्या माधुर्यस्य सन्निवेश। तत्काव्येषु समस्ता क्लिष्टा च पदावली प्रायेण परित्यक्ता। वाक्ययोजन सरल प्रभावोत्पादकञ्चास्ति। येन श्लोकपठनकाल एव तत्तात्पर्य सहजत एव बोधगम्य जायते। सन्दर्भेऽस्मिन् कतिपयपद्यानि दृष्टिगतानि विधेयानि—

परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम्।।

(नी० श० ३२)

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

(नी० श० ७३)

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन।।

(नी० श० ७२)

एतेषु सर्वेषु श्लोकेषु सरलतया भाषयोदात्तया शैल्या च जन्मसार्थक्यस्य, सन्मित्रस्य, परोपकारस्य च वास्तविको महिमोपवर्णित· । इद महाकवे· काव्यगत व्यवहारगतश्च वैशिष्ट्य नितरा प्रकाश्यते ।

उपर्युक्तानि तथ्यानि समभिलक्ष्य 'प्राधान्येन व्यपदेशा भवन्तीति न्यायेन भर्तृहरिकाव्यशैली वैदर्भीति निस्सन्देह वक्तु शक्यते ।

कविवरभर्तृहरौ भावपक्ष कलापक्षश्चोभावपि सन्निहितौ । कृते च तुलनात्मके विवेचने वक्तुमिद सङ्गत यत्तस्मिन् भावप्रवणता प्राधान्यतो राजते । फलतस्तस्य रचनासु ध्वनेर्भावरसादीनाञ्च स्थिति सहजा । शृङ्गारशतके शृङ्गाररसस्य वैराग्यशतके च शान्तरसस्य बहूनि हृद्यानि बिम्बानि सरसपाठकान् मन्त्रमुग्धान् विधत्ते ।

अहौ वा हारे वा.....शिवशिवेति प्रलपतः ।

पद्येऽस्मिन् शान्तरसस्य भव्या स्थिति क चमत्कर्तु न प्रभवति?

भर्तृहरिशतकत्रयस्यानुशीलनेन कोऽपि विवेकशीलो निष्कर्षममुमवाप्तुं प्रभवेद् यद् भर्तृहरिव्यक्तित्वे काव्यप्रतिभया साक सासारिकानुभवस्य नीतिगतव्यवहारज्ञानस्य, कामशास्त्रावबोधस्य वैराग्यभावस्य चानुपमो योग । चेद् वैराग्यशतकस्यानुशीलनेन तस्य सांसारिकोपभोगवृत्तावनुरागाभावो (भोगविरक्ति) द्योत्यते, तर्हि शृङ्गारशतकस्य परिशीलनेन तदीया पराकाष्ठा गता कामवृत्तिर्व्यव्यज्यते, एवमेव नीतिशतकाध्ययनेन तदीय व्यवहारगत नीतिगत काव्यगतश्च गहन चिन्तनं स्फुट प्रतिभाति । लोके वैराग्यस्य, कामस्य, नीतेश्चैकत्र सम्मेलन दुर्लभमेव ।

भर्तृहरिकृत शतकत्रय संस्कृतकाव्यजगतोऽपूर्वनिधिरूपेण विराजमान युगयुगान्त सहृदयसमाजस्य सेवां विदधत् स्थास्यतीति मदीयो द्रढीयान् विश्वासः ।

●●

युगपुरुषः पण्डितजवाहरलालनेहरूः

भारतस्य प्रधानमन्त्रिचरस्य राष्ट्रानुरागरञ्जितस्य महामानवतावादिन स्वर्गीय-पण्डितजवाहरलालनेहरूमहाभागस्य जन्मैकस्मिन् धनधान्यप्रतिष्ठादिसङ्कुलैककश्मीर-ब्राह्मणपरिवारे नवाशीत्यधिकाष्टादशतम – ईसवीयवर्षे नवम्बरमासस्य चतुर्दशदिनाङ्के (१४।११।१८८७ तमे वर्षे) अभूत्। तस्य पिता पण्डितमोतीलालनेहरूस्तथा माता श्रीमतीस्वरूपरानीनेहरूश्चासीत्। पण्डितमोतीलालनेहरू सुविख्यातो विधिवेत्ता, राजनेता तथा राष्ट्रभक्तश्चासीत्। स्वमातापित्रोरपूर्ववात्सल्यमयस्नेहासिक्तस्य तस्य प्रारम्भिकी शिक्षा स्वगृह एव कुशलैर्भारतीयैर्वैदेशिकैश्च शिक्षकैरभूत्।

वैदेशिकगुरोः श्री टी० ब्रुक्समहोदयस्य प्रभावेण प्रभावितस्य तस्य रुचि पुस्तकाध्ययने जाता। सा तु तज्जीवनस्य सहजा प्रवृत्ति सती यावज्जीवनमक्षुण्णा-ऽऽसीत्। पुस्तकाध्ययनव्यसनवशान्नेहरूमहोदयेन बाल्यकालेऽनेकानि कथोपन्यास-विषयकपुस्तकानि प्रतीच्यभाषानिबद्धान्यधीतानि। श्रीब्रुक्समहोदयो विज्ञानम्प्रत्यपि तस्य रुचि जनयामास। विज्ञानविषयसम्बद्धाभिरुचिस्तस्य समग्रचिन्तने क्रियाकलापे पृष्ठ-भूमित्वेनासीदिति सुविदितम्। श्रीब्रुक्समहाभागसम्पर्कात् नेहरूमहोदयोऽध्यात्मचिन्तन-परा धियोसाफीम्प्रति समाकृष्टो जात। अनेकानेकप्राच्यप्रतीच्यदार्शनिकाना तत्त्वचिन्त-कानामाध्यात्मिकचिन्तनस्य विशदप्रभावेण नेहरू प्रभावितोऽभूत्। उक्तप्रभावस्तस्मिन् पारलौकिकजगत् प्रति समुल्लेखनीयसमाकर्षणजनने समर्थो जात। हिन्दूधर्मम्प्रति तस्योदात्ता भावना जन्म जग्राह। परन्तत्रेद चिन्त्य यत्तस्याकर्षणकेन्द्र हिन्दूधर्मस्य कर्मकाण्डादिक नासीदपि तु श्रीमद्भगवद्गीतोपनिषदश्चासन्। एतत्तु स्वात्मकथाया तेन विशदीकृतम्। तन्मते स एव धर्मो मानवाना कृते श्रेयस्करो यस्मिन् सम्पूर्णमानवजाते कल्याण निहितमस्ति। वस्तुत स—"अय शाश्वतो धर्म एको धराया न सम्भाव्यते धर्मतत्त्वेषु भेद" इति धर्मस्वरूपस्य समर्थक आसीत्। स खलु सर्वधर्मसमभावपरिपोषक आसीत्। धार्मिकी सङ्कीर्णभावना तन्मते राष्ट्रस्यैकताघातिनी तथा विकासबाधिका भवति।

तीर्थराजप्रयागे श्रीमत्या ऐनीविसेण्टमहाभागाया आध्यात्मिकभाषणेन समाकृष्टो नेहरूर्जीवनस्य त्रयोदशवर्ष एव धियोसाफिकलसोसायटीति नाम्न्या· सस्थाया. सदस्योऽभवत्।

बाल्यकाल एव रूसजापानयुद्धयोर्जापानविजयसमाचारेण नेहरूहृदये चरमो-ल्लासः समुत्पन्न·। जापानशक्तिमाहात्म्यमधिगन्तुं स जापानेतिहास पठितवान्। अयमेव कालो यदा तस्य हृदयं नितरां राष्ट्रियभावभावितं जात तथा स्वल्पवयस्केनापि तेन

भारतदेशमेशियामहाद्वीपञ्च पारतन्त्र्यपाशान्मोचयितु सङ्कल्पितम्। तेनात्मकथाया लिखितम्—"मदीय हृदय राष्ट्रियभावभरितमासीत्। अह योरोपीयपारतन्त्र्यपाशान् विखण्ड्य भारतमेशियामहाद्वीप च स्वतन्त्र कारयितु चिन्तित आसम्, तथा शौर्यविषयिका नैका कल्पना कुर्वन् आसम्—'यदह कथ हस्ते खड्ग गृहीत्वा भारत स्वतन्त्र विधातु युद्ध कुर्याम्'। (पृ० १८) इत्थ बाल्यकालादेव तस्मिन् राष्ट्रभक्ति प्रादुर्भूता। वैदेशिकाना शासकानामुपस्थितिस्तस्य कृतेऽरुचिकरा जाता। परञ्च जन्मजातमानवतावादभाविते तदीये हृदये अङ्ग्रेजजातिम्प्रति द्वेषभावो न आसीदिति तेन स्वजीवनकथाया स्पष्टीकृतम्।

पञ्चदशवर्षीयो नेहरू पञ्चोत्तरैकोनविशतितमे ईसवीयवर्षे (१९०५ तमे वर्षे) शिक्षामवाप्तुमिङ्गलैण्ड प्रेषितस्तथा तत्र स हेरोविद्यालय शिक्षामवाप्तुं प्रविष्ट। तस्य प्रमुखा शिक्षा केम्ब्रिजे जाता। तस्मिन् काले इण्डियन-सिविल-सर्विसादिसेवावृत्तिर्नव-युवकाना चित्ताकर्षणकेन्द्रत्वेनासीत्। परन्तु नेहरूमहाभागस्तया कथमपि लुब्धो न जातोऽपि तु स्वपित्रो स्वस्य चेच्छानुसार तेन विधिशिक्षाऽवाप्ता तथा स्वदेशं भारत प्रति समागत। प्रयागस्य उच्चन्यायालयेऽधिवक्तृरूपेण तेन स्वसेवाकार्य प्रारब्धम्। परन्तु शनै शनै तस्य तत्कार्येऽरुचिर्जाता। राजनीतिक्षेत्रम्प्रति तद्हृदये मूलतो विराजमानमाकर्षण वृद्धि गतम्। तज्जीवने गोखले-लोकमान्यतिलकादीना विचारा क्रियाकलापादयश्च स्थानं प्राप्ता। परन्तु तस्यानुरागो लोकमान्यतिलकं प्रति समधिक एवासीत्। षोडशोत्तरैकोनविशतितमे वर्ष इसवीये लक्ष्मणपुरे (लखनऊनगरे) महात्मना गान्धिना साक तस्य प्रथमः परिचयो जात.। दक्षिणाफ्रीकादेशे भारतीयजनाना सेवायां महात्मना गान्धिना यादृशमपूर्व त्यागशौर्यादिपूर्णमुदात्तं कार्य कृतं तेन नेहरूमहोदयोऽपि प्रभावित आसीत्। अत्रेदमवश्यमेव ध्येयं यद् गान्धिविचारधाराप्रभावितस्यापि पण्डितनेहरोः स्वकीया मौलिका विचारा आसन्। स्वविचारान् सिद्धान्तान् वा न कदापि स त्यक्तवान्। गान्धिप्रचालितस्यान्दोलनस्य नैतिकपक्ष तत्सत्याग्रहसिद्धान्त च समर्थयन्नपि स तस्याहिंसासिद्धान्त सर्वांशतो न स्वीकृतवान्।

भारतदेश. कृषिप्रधानोऽस्ति। तस्मिन्नधिकांशा जना ग्रामेषु निवसन्ति तथा तेषां व्यवसाय· प्रधानत· कृषिरेवास्ति। राजनीतौ तत्प्रवेशसमये कृषका श्रमिकादयश्च प्रायशः उपेक्षिता एव आसन्। समाचारपत्रेषु तेषा चर्चा नगण्यैवासीत्। एतादृशी स्थितिर्नेहरूकृते कष्टप्रदा जाता। एतद्विषये तेन भावभरितः स्वविचार आत्मकथायामित्थं प्रकाशितः—

"कस्यचित् समाचारस्य कश्चिदेव पाठक· स्यात्, यो जानाति स्म यद् भारते कोटिश· कृषका. श्रमिकाश्च सन्ति तथा तेषामपि किञ्चिन्महत्त्वमस्ति।" (पृ० स० ५३)।

विंशत्यधिकैकोनविंशतितमे वर्ष ईसवीये तस्य विधिवत् कृषकसम्पर्को जात। कृषकजनानामान्दोलने तेन सोत्साहं भागो गृहीत। अनेकशो ग्रामेषु भ्रमणं विधाय तेन

कृषकाणा प्रगाढं सान्निध्यमवाप्तम्। सान्निध्यकाले तेन तेषा विविधसमस्याना बोध कृतः। कृषकनिर्धनश्रमिकजनाना हितचिन्तन राष्ट्रनायकस्य नेहरो राजनीते प्रमुखमङ्गम्। अपि तु तदेव तद्राष्ट्रभक्तेराधारभूमि ।

पण्डितनेहरूमहाभागस्य हृदयं सर्वाशतो भावपूर्णमासीत्। हृदयस्येव भावपूर्णता तज्जीवनस्य प्रत्येकक्षेत्रे दृष्टिगोचरतां याति। भाषणे, लेखने, नीतिनिर्धारणे च सर्वत्र तस्य भावप्रवणता सहजतो द्रष्टुं शक्यते। भाषणकाले वाण्या साकमेव तन्मनोगतभावास्तन्मुखमण्डले स्फुटतो नयनगोचरतां गता आसन्।

कांग्रेससङ्गठनेऽध्यक्षाद्यनेकगुरुतरपदभारं वहता तेन सम्पूर्णराष्ट्रसेवाव्रते तां संस्था नियोजयितुं यादृश. प्रयासो विहित., स तु सर्वथा श्लाघ्यो विचारणीयश्चास्ति। स्वातन्त्र्यावाप्त्यनन्तर भारतस्य प्रथमप्रधानमन्त्रिपदमलङ्कुर्वता तेन तत्पद येन रूपेण गौरवास्पद विहितं तत्तु सर्वथा विचारार्हम्। सम्पूर्णराष्ट्रं तेन स्वकल्पनानुसारं विकास नीतम्। फलतः स आजीवन तत्पदमलङ्कर्त्तु प्रार्थित· राष्ट्रेण।

पण्डितनेहरूर्वस्तुत कर्मवाद्यासीत्। 'कर्मणैव ससिद्धिमास्थिता जनकादय' "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इत्यादि गीतोक्तवचनानि तेन न केवल दृष्टि गतानि कृतान्यपि तु तानि सर्वाणि सफलीकृतानि। आजीवन स कर्मव्रत परिपालितवान् तथाऽऽत्मानं राष्ट्रसेवायां समर्पितवान्।

भारतस्य प्रधानमन्त्रिणा सता तेन या वैदेशिकी नीतिरङ्गीकृता तया भारतराष्ट्रस्य प्रतिष्ठा निखिलससारे स्थापिता। यथाऽधुना तत्समयेऽपि समस्तं जगत् देशवर्गद्वयेन विभक्तमासीत्। एकस्य प्रधानोऽमेरिकादेशः पुनरपरस्य प्रधानो रूसदेशश्चासीत्। पण्डितनेहरूमहाभागेन वर्गद्वयेनाङ्गीकृता नीतिरखिलविश्वस्याहिताय मताऽतस्तेन तटस्था वैदेशिकी नीतिः स्वीकृता परिपालिता च। तस्य नेतृत्वे तटस्थराष्ट्राणां सम्मेलनमपि समायोजितम्। अद्य तु सा नीतिर्विश्वस्यानेकराष्ट्रै सहजत· स्वीक्रियते। तत्फलमपि हितावहं प्रत्यक्षतो दरीदृश्यते।

पण्डितनेहरूसस्थापित· पञ्चशीलसिद्धान्तः संसारस्य राजनीतिगतेतिहासस्य स्वर्णमयोऽध्याय·। चेन्नेहरूप्रतिष्ठापितस्य पञ्चशीलसिद्धान्तस्य परिपालन सर्वै राष्ट्रै· क्रियेत नूनमेवाखिले संसारेऽशान्तिर्दूरीभवेत्।

व्यक्तिरूपेण चेत् पण्डितनेहरोः समीक्षणं क्रियेत तदा नि.शङ्कमिदं वक्तुं पार्येत यत्तस्मिन् अदम्योत्साह. साहसश्चासीत्। राष्ट्रियः सङ्कटं किं वा अन्ताराष्ट्रियं सर्वत्र तदीयं गुणद्वयं दृष्टिगोचरतां गतम्। समीपस्थेन चीनदेशेन नेहरूसंस्थापितां मैत्री समुल्लङ्घ्य यदा भारतं समाक्रान्तं तदा राष्ट्रस्य समक्षमेका भयावहा कष्टकरी च स्थिति. समुप-

स्थिता। परञ्चास्माक राष्ट्रनायकेन पण्डितजवाहरलालेन यादृश शौर्य, साहसमुत्साहश्च प्रकटीकृतास्तेनातीतगौरवमण्डितस्य भारतदेशस्य गौरवं सुरक्षितमासीत्।

पण्डितजवाहरलाले राष्ट्रप्रेमसरिता सतत प्रवाहिताऽऽसीत्। राष्ट्रप्रेमवशीभूत स भारतस्य स्वातन्त्र्यसङ्ग्रामे नैकवार वैदेशिकशासकै· कारागारनिबद्धीकृत परञ्च तेन सर्व कष्टं सहजत सोढम्। समस्तभारतस्य कीदृश बिम्ब तस्य हृदये बिम्बितमासीदित्यस्याकलनं तस्यैच्छापत्रेण कर्तु शक्यते यस्मिन् तेनोक्त यत्तस्य शवदाहान्ते भस्मराशिर्भारतमातु. क्रोडीभूतेषु पर्वतादिषु विकीर्येत येनाह सर्वाशत. स्वजन्मभूमिससक्त स्याम्।

तस्य प्रेम्ण क्षेत्रमतिविस्तृतमासीत्। समस्तोऽय स्थावरजङ्गमलोकस्तेन क्रोडीकृत:। बालकान् प्रति तु तस्यानुपमानुरागोऽद्यावध्यपि स्मर्यते। तस्य जन्मदिवसो बालदिवसत्वेन मान्यते न केवलं भारतेऽपि तु समस्ते भुवने।

सम्पूर्णभारत सर्वदृष्ट्या विकासयितुं तेन स्वप्रधानमन्त्रित्वकालेऽनेका योजना प्रचालिता·। स स्वदेश वैज्ञानिकै साधनैर्धनधान्यसमृद्धियुक्त विधातु प्रयतवान्। तन्मते भारतस्य सर्वाङ्गीणविकासाय लोकतन्त्रात्मक शासन सर्वथा हितकरम्। यतो हि भारतराष्ट्रमनेकजातिधर्मसम्प्रदायाश्रितानां जनाना देशोऽतस्तस्मिन् धर्मनिरपेक्षतामूलकं लोकतन्त्रमेव साफल्यमधिगन्तुं शक्नुयादिति तस्याभिमतम्। एतदेव कारणमासीद् यत्तेन यावज्जीवन धर्मनिरपेक्षतासिद्धान्त परिपालितस्तथा सम्प्रदायवादोऽनादृत।

स्वजीवनकाले पण्डितनेहरूमहोदयेन जनाना मध्ये यादृशी लोकप्रियताऽवाप्ता न तादृशी केनापि जननायकेनाधिगता। तदीये विश्वमाङ्गल्यभावभरिते मानसे मानवजातिम्प्रति प्रगाढानुरागो राष्ट्रभक्तिश्चानन्या प्रतिष्ठिताऽऽसीत्। वैज्ञानिके युगे स सदैव वैज्ञानिकदृष्ट्या भारतराष्ट्रनिर्माणम्प्रति कटिबद्ध आसीत्। स्वराष्ट्रस्य भारतस्य सर्वाङ्गीणविकासं प्रति स कृतसङ्कल्प आसीत्। तत्प्रधानमन्त्रित्वकाले भारतमपूर्वविकासपथमारूढ इत्यत्र न सन्देहलेश।

'योग कर्मषु कौशलमि'ति विश्रुतामुक्तिमनुसृत्य पण्डितनेहरूमहानुभावस्य कृते 'महान् कर्मयोगी' इत्युपाधि सर्वथा सङ्गत:। तदीयं कर्मकौशलं कर्मयोगित्वं वा सर्वदा सर्वत्र नयनगोचरतां यात्वा सर्वान् चमत्कृतान् अकरोत्। तेन स्वजीवने स्वकर्मकौशलादेव विभिन्नानि महनीयानि पदान्यलङ्कृत्य नैकानि समुल्लेख्यानि कर्माणि समाचरितानि। नैकवारमखिलभारतीयकांग्रेसाध्यक्षपदमारूढेन तेन स्वदल सर्वांशत एकसूत्रनिबद्धं सुदृढ च कृतम्। १५-७-१९४७ तमादीसवीयवर्षादारभ्य २७-५-१९६४ तममीसवीयवर्ष यावत् विश्वस्य विशालतमस्य भारतराष्ट्रस्य प्रधानमन्त्रिपदं समलङ्करोत्। ईदृशसुदीर्घकाल यावत् महत्त्वपूर्णपदभारोद्वहन नितान्तं कठिनमिति को न विजानीते?

पण्डितनेहरूमहाशयस्य वैशिष्ट्यमिदं नूनं ध्येय यत्तेन नानाविधकर्मसम्पादन-

तत्परेणापि साहित्यक्षेत्रेऽपि नितरामुल्लेख्य कार्य कृतम्। तद् बहुमूल्या कृतयोऽधो-लिखिता सन्ति—

(१) भारत की खोज (२) विश्व-इतिहास की झलक (३) मेरी आत्मकथा (४) भारत की एकता (५) कुछ पुरानी चिट्ठियाँ (६) लडखडाती दुनियाँ (७) रिसेन्ट एसेज एण्ड राइटिंग्स (८) भारत और कल (९) आजादी के दस साल (१०) आज एक राष्ट्र एक हृदय।

कर्मयोगिन पण्डितजवाहरलालस्य जीवनावसान २७-५-१९६४ तमे वर्षेऽभूत्। अद्य तस्य भौतिक शरीरं न याति दृष्टिगोचरता परन्तु तस्य मानवतावाद, समाजवादोऽनुपमराष्ट्रभक्ति, धर्मनिरपेक्षता, पञ्चशीलसिद्धान्त, तटस्थपरराष्ट्रनीतिश्च यावत्संसारं विद्यमाना इव स्थास्यन्ति तथा ससारस्य दृष्टिपथात्र दूरीभविष्यन्ति। वस्तुत पण्डितनेहरूर्न केवल युगद्रष्टाऽपि तु युगस्त्रष्टाऽप्यासीत्। न केवल भारतीयेतिहासेऽपि तु ससारस्येतिहासे नेहरूर्युगपुरुषरूपेण स्मर्यमाण स्थास्यति।

●●